No. १४३८

Title अनुमान प्रकाशः

Author म॰ म॰ रुचिदत्तः

Extent २१३ Age ×

Subject न्याय वैशेषिकं

अनुमानप्रकाशः

१४३७

लान्वयित्वेनागमकत्वाद्वा न च तस्य तदाऽगमकस्य व्यतिरेकित्वाभावात्। अन्वयव्याप्त्यस्फुरणदशायां
केवलान्वयित्वेनागमकत्वाद्वा त्वमिष्टमेवेति वाच्यं। एवं यत्र वह्निविरहस्तत्र धूमविरह इति व्यतिरेकव्या
प्तिग्रहे धूमस्यापि वह्निगमकतानापत्तेरविशेषादिति प्रश्ने तादृशव्यतिरेकव्याप्तिग्रहस्वरूपादिविरु
द्धसंयोगविशेषादिसाधारणतयाऽनन्यगत्या गुरोरपि निरुक्तस्यैव गमकत्वे तस्य वाच्यासंभवात्तदात
गमकत्वं तस्येष्टमेव। अत एव धूमस्यापि निरुक्तज्ञानादेव वह्निगमकत्वं नान्यथेत्युत्तरं प्रतिभातीति दिक्॥
अत्र [illegible] सिद्धसाध्यकव्यतिरेकिणि साध्यरूपप्रतियोगिव्यधिकरणत्वेन साध्याभावस्य कथं ज्ञानमिति
चिन्[illegible]यं यत्तु प्रतियोगिव्यधिकरणस्य च समानाधिकरणत्वं ताभावप्रतियोग्यप्रतियोगिकत्वे न साध्याभावो

वि॰ अ॰ प॰
१२०
120

विशेषणीय इति तन्न। व्यतिरेकव्याप्त्यासोच्छेदापत्तेः। न च तत्त्वेन ज्ञानं गमकताप्रयोजकं। तच्च क्वचित्प्रमा क
चिद्भ्रम इति वाच्यं। तत्त्वेन ज्ञानं व्यभिचारिविरोधि न वा। आद्ये व्यतिरेकसहचारमात्रविषयतयैव गमकता
प्रयोजकतोपपत्तौ नियमांशवैयर्थ्यं। अंत्ये त्वभ्रमदशायां रूपादिविरुद्धत्वेन ज्ञातस्यसंयोगविशेषस्य गम
कतापत्तेरिति। अनुमितिमात्र इति। यद्यपि व्यतिरेकिणि व्यापकताज्ञानमात्रं हेतुर्न तु व्याप्तिधीरपि तथापि
तस्य व्यतिरेकव्याप्तिविषयतयैव हेतुत्वमन्वयव्याप्तिज्ञानेन तुल्ययोगक्षेमत्वात्। अन्यथान्वयिन्यपि व्याप
कताज्ञानमेव हेतुः स्यात्। यथा वा तत्र नेष्टापत्तिस्तथोक्तं। ननु तथापि व्याप्तिज्ञानत्वमतिप्रसक्तमिति स्वव्याप्ति
ज्ञानत्वेन हेतुत्वं वाच्यं। तच्च न व्यतिरेकव्याप्तिसाधारणमिति चेत् न। स्वव्यभिचारधीविरोधिधीविषयव्या १२०

स्ति ज्ञानत्वेन हेतुत्वात्। एवं च यद्यपि परामर्शद्वयस्यानुगमयितुं शक्यत्वात्तस्यानुमितिमात्र एव हेतु
त्वसंभवात् विशेषद्वयासन्निधानं विरुद्धं तथापि व्यतिरेकानुमितौ व्यापकतावच्छेदकावच्छिन्नाभाव विषयत्व
मन्वयानुमितौ व्यापकतावच्छेदकावच्छिन्नविषयत्वमनुभूयत इति फलभेदे आवश्यके सामग्रीभेदोप्या
वश्यक इत्यभिप्रायेण तदभिधानं। अत एव टीकादौ नेदं निरात्मकं जीवच्छरीरमित्येवानुमित्याकारप्रद
र्शनमिति भावः। अतिप्रसंग इति। पक्षधर्मताज्ञानं विनापि व्याप्तिग्रहमात्रादनुमित्यापत्तिरित्यर्थः। अन्व
यीति। अतिप्रसंगस्थल इति शेषः। पक्षत्वमिति। संदेहघटितपक्षत्वमित्यर्थः। नन्वनवगममात्रेणासाधा
रण्यं किंतु तद्व्यावृत्तत्वग्रहेणेत्यपरितोषादाह किंचेति। वैधर्म्यमित्यस्यैव विवरणं जलादीति। वैधर्म्येति

वि॰ अ॰ भ॰
१२१
१२१

पृथिवीत्वस्य हेतोर्वैधर्म्यरूपत्वादिति भावः। तथापीति। मिलितस्याप्रसिद्धेरिति भावः। आचार्यमतं शं-
कते। अथेति। ननु तेजोभिन्नत्वे सति जलादिद्वादशभिन्नत्वं कथमुक्तसंज्ञयेनापि विषयीकर्त्तव्यं तस्य तत्पू-
र्वमसिद्ध्या तत्कनकविशेषणज्ञानाभावादित्यत आह। एकेति। एकविशेषणविशिष्टतयोपस्थित इत्यर्थः।
यद्वेति। अत्र त्रयोदशात्वमविवक्षितं समूहालंबनीभूतेकसंज्ञयेपि तावद्भेदानां प्रत्येककोटित्वसंभवादि-
तिध्येयं। यदि त्रयोदशासंज्ञायास्तदा पूर्वपूर्वसंज्ञयोपस्थितभेदविशिष्टत्वेनोपस्थिते धर्मिण्यंतिमसंज्ञा-
येन तावद्भेदसमुदायो विषयीक्रियत इति चेदिष्टव्यां। एकाधिकरण्येन तावद्भेदोपस्थितये उक्तसंज्ञायाम-
सरणात्। अन्यथा कोटिप्रसिद्धिं विना संज्ञायस्याप्यसिद्धेर्निश्चयरूपापि तावद्भेदरूपसाध्यप्रसिद्धिर्भवत्येवा। ए १२१

काधिकरणप्रविशिष्टतावच्छेदकसाधनं चासाधारण्यनिरासार्थं। जलादेर्विपक्षत्वसिद्ध्या व्यतिरेकव्याप्तिग्र
हार्थं वा। अन्यथा तेजोवाय्वादिवृत्तिदशाने देश्यजलादावपि सत्त्वेन योदशाने दानाभावस्य तत्त्वासत्त्वे तदसंभवए
वस्यात्। व्याप्तज्ञप्रतियोगिकाभावानभ्युपगमात्। प्रत्येकत्वे दसाधने चासाधारण्यात्। तथा चैकाधिकरणा
वच्छिन्नत्वरूपविशेषणाभावाद्विशिष्टाभावसत्त्वेन तस्य विपक्षत्वान्न तदसंभव इति भावः। संवलितेति ऐ
काधिकरण्यावच्छिन्ने त्यर्थः। साध्यनिश्चय इति॥ अत्र वदन्ति। पक्षे धियां जलादित्रयोदशानेदसंशये सति तन्नि
त्वे तत्संशयः। तत्र जलत्वेदानाभावस्यैवग्रहात्। एकदेशाविरहनिश्चयस्यापि समुदायसंशयविरोधित्वात्।
ननु मास्तु तत्र तत्संशयः तद्व्यतिरेकनिश्चयोपि तत्र न स्यात्। प्रतियोगिनिश्चयस्याभावनिश्चयहेतुत्वात्। तथा

वि·अ·म·
१२२
122

वकथं तत्रव्यतिरेकव्याप्तिग्रहः स्यादिति चेत्। न। लाघवेन प्रतियोगिज्ञानत्वेन तस्य तद्धेतुत्वात्। पृथिव्यां
जलादित्रयोदशभेदसंशये सत्यपि जलं न जलादित्रयोदशभेदवदिति निश्चयस्यानुभवसिद्धत्वाज्ज्ञानस्य
तत्र तद्ग्राहकमानासंभवः। संशयरूपायामेव समुदितत्रयोदशभेदाभावप्रसिद्धेः सत्त्वात् जलं जलादि
त्रयोदशभेदसमुदायाभाववत् तदेकदेशाभिन्नत्वात् जलभेदाभाववत्त्वात् यथा घटः समुदायैकदेशभेदाभावव
त्तत्र समुदायाभाववदिति सामान्यव्याप्तिमूलकस्यानुमानस्यैव संभवात्। न हि सामान्यव्याप्तिमूलकेऽप्य
नुमाने प्रकृतसाध्यहेत्वोः सहचारग्रहापेक्षा। यथा तज्जेहं मैत्राभाववदित्यत्र वस्तुतस्तत्रोक्तसंशयानंत
रं त्रयोदशभिन्नत्वस्य तदभावस्य निश्चयविषयत्वमपि न दुर्घटं तदनुव्यवसायरूपेणैव निश्चयेन तत्प्रका १२२

भोऽवश्यमभावं ग्राहयत्येवेति नियमः प्रतियोगिज्ञानादिविरहेऽभावग्रहानुदयात्। किंचाभावग्रहण
कारणप्रतियोगिज्ञानादिसत्त्वे सति योग्यमभावं ग्राहयतीति। मनस्त्वात्यन्ताभावस्तु न योग्यो योग्यप्र
तियोगिकस्यैव संसर्गाभावस्य योग्यत्वात्। अतो घटे मनस्त्वं न गृह्यते। रूपवदन्योन्याभावस्तु योग्यप्रतियोगिकोपि
वा यावदधिकरणयोग्यताविरहान्न गृह्यते। अन्योन्याभावग्रहे तस्याः प्रयोजकत्वात्। अत एव [illegible]भेदार्थोन्यो
न्याभावग्रहे प्रतियोग्यधिकरणयोर्योग्यता तंत्रमिति सिद्धान्त इत्याहुः। अनयोश्च क[illegible]
कोनुमत एवेति ध्येयं। अनुपलब्धिश्च यादृशी अभावोपलम्भं गं तादृशी प्रपंचिता प्रत्य[illegible]तो॥
न त्वैन्द्रियकानुपलब्धिमात्रमित्यर्थः। नन्वधिकरणे प्रतियोगिसत्त्वस्याप्रसिद्ध्या तन्निरूपितविरोधित्व

स्यात्संन्नवाऽनुत्कानुपलब्धिरसिद्धेत्यत आह अधिकरण इति। तथा च नर्द्धितमेव तद्विरोधित्वं निरूपकं जन्यं वा
स्तवमिति भावः। तमेव तर्कमाह यदीति। स्तंभो यदि पिशाचवान्स्यात् पिशाचात्मतया ऽ मादिस्य...
त्योयदात्मास तदात्मतया प्रमाविषय इति मा मान्य व्याप्तिः। अत्र दृष्टान्तः स्तंभ वदिति। विचेत्तां जलं [illegible]
रे केदृष्टान्तो यमन्वयेत्तु पिशाच एव दृष्टान्त इति दृष्टव्यं। एतेनोपलंभपदं यदि प्रत्यक्षपरं तदा परासेषां...
द्धिः। यदि ज्ञानमात्रपरं तदेष्टापादनमिति परास्तं। स्तंभे यदि पिशाचवतादात्म्यं स्यात् तदा स्तंभ नतादात्म्यवत्त्वेनाऽनु
पलभ्येत स्तंभे यत्तादात्म्यं तदुपलभ्यत इति व्याप्तेरित्यर्थः। इत्यन्योन्याकाशादितादात्म्यस्य योग्यत्वाद्यप्रयत्ना
दिरूपतया ज्ञातित्वाभावाद्घटादिवृत्तित्वेन तदुपलंभ आपादयितुं न चाक्यत इति तदन्योन्याभावस्तत्र क १२४

थं प्रत्यक्षं इति चेत् न। आकाशादिघटाद्योरन्ते दे आकाशत्वादेरपि जातित्वापत्तेरावश्यकत्वात्तदुपादान
संभवात्। न ह्येकव्यक्तिकत्वमपहाय आकाशत्वादीनामन्यज्जातित्वे बाधकमस्तीति भावः। यद्यपि सामान्यवि
शेषसमवायान्योन्याभावेऽयमपि कल्पो न संभवति तथापि घटादिव्यक्तिवृत्तितादात्म्यत्वेनैव तत्र तद्रूपल
क्षणापादानं न्याय्यमिति ध्येयं। प्रकृतावच्छेदकनानात्वे इति। अत्र वदन्ति। यदि प्रकृतावच्छेदकस्य नानात्वे एक
त्रैव सर्वप्रकृतव्यक्तिष्वेकैव समूहालंबनरूपा साध्यसिद्धिरुद्देश्या भवति तदा न यत्रापि क्वचित्प्रकृते साध्य
सिद्धौ जातायां नानात्वात् सिद्धसाधनं तदंशे प्रकृतदेश्यप्रतीतायाः समूहालंबनरूपसाध्यप्रसिद्धेरजातत्वात्।
यदा तु समूहालंबनत्वानुदासीनाया कावित्साध्यप्रसिद्धिरुद्देश्या भवति तथा सत्युभयत्रापि तदवच्छे

...कृतावच्छेदकस्य
नानात्वेपि

चि॰अ॰न॰ नीयमेवापक्षतावच्छेदकैक्यपि तदंशे साध्याप्रसिद्धेर्ज्ञातत्वेन तदुद्देश्यतावच्छेदात्। तस्मादेतद्विचिन्त्यमिति॥
१२५ न अत्र ब्रूमः। पक्षतावच्छेदकैक्येनातः सिद्धसाधनं नैवत्येवापक्षतावच्छेदकधर्मसामानाधिकरण्ये
न क्वचिदपि पक्षे साध्यसिद्धौ हि सिद्धसाधनमेवेति नांशतः सिद्धसाधनं तादृशासिद्धेरेवानुमान
साध्यत्वात्। तदासिद्धेव तच्छंकैव नास्ति। न हि पक्षे साध्यसिद्धिमात्रेण तत्साधकमवत्वेन प्रवृत्तिवच्छिनि
श्चये सिद्धसाधनप्रसंगात्। तस्मात्प्रकृते घटत्वेन साध्यसिद्धावपि पक्षतावच्छेदकसामानाधिकरण्ये
न तदसिद्धेर्नोक्तदोषः। नन्वेवं पृथिवीत्वस्य पक्षतावच्छेदकत्वात्तत्सामानाधिकरण्येनैव घटे साध्य
सिद्धेः सिद्धसाधनमेवास्त्विति चेत्। न। सर्वपृथिवीत्वस्य पक्षतावच्छेदकत्वात्। तदिदमुक्तं सर्वपृथि १२५
तत्सामानाधिकरण्येनैव घटे साध्यासिद्धेः॥

कमित्यपरे॥ निश्चितो गृहजीवो गृहेऽभावस्य निश्चय इत्यर्थः। नियमश्चेति। ज्ञातवर्षजीव्येवेत्येको
नियमो गृह एवेत्यपरः। तत्रापि न लिंगव्याप्तिरूप एको नियमः गृह एवेत्यपर इत्यपरे। आम्नायमवि
द्वान् शंकते नन्विति। आम्नायमुच्चारयति नेति। न नु गृहजीवो न करणं नियमग्राहकमान विरोधे
न तस्य संदिग्धत्वादित्यत आह गृहजीवश्चेति॥ देवदत्तेति। जीवनबाधे तासामपि बाधश्चावच्छेद
का इति भावः। तदंतरमाह तथेति॥ तथाप्यापाति। मरणापेक्षया जीवनं लघ्विति तत्कल्पनार्थमेव प्रथम
मर्थापत्तिस्वीकारः स्यात् ततश्च तत्कल्पितजीवित्वलिंगकानुमित्या बहिःसत्त्वं साध्यमित्यावश्यकतया
गुर्वपि बहिःसत्त्वमेवार्थापत्त्या कल्प्यते। न मरणमिति तर्कः शरीरमेव सर्वमिदं दृष्टव्यं। तेनैतावत्कस

चिं॰ अ॰ न॰ हितः संशयो बहिःसत्त्वं कल्पयतीति नोपसंहारविरोधो न वा जीवितस्यार्थापत्तिकल्प्यत्वोपवर्णनेऽप
१४॰ सिद्धांत इति प्रत्यक्षेपीति। अत्र देवदत्तो गृहे नास्तीति नियमग्राहकं प्रमाणं नियमग्राहकपदेन विवक्षि
140 तं। न तु जीवी गृह एवेति नियमग्राहकं। तथा सति बहिःसत्त्वप्रमाङ्त्यापि न स्यात्। गृह एवेति नियमग्रा
हकस्य तत्राप्यभावसत्त्वादिति भावः। यद्वेति। पूर्वं दोषाभावो न हेतुः किंत्वप्रतिरोहितप्रमाशक्तिकस्य
[illegible] प्रमा[illegible]णस्य प्रमाहेतुत्वं तद्विरहाच्चोदाहृतस्थले प्रमाविरह इत्यपि मतं। अत्र च दोषाभावो
पि प्रमाहेतुस्तद्विरहाच्च तद्विरह इत्युच्यत इति न पूर्वाद्भेदः। प्रमाणत्वाभिमतयोरिति। अत्र ज्ञातवर्ष
जीवी देवदत्तः गृह एवेति नियमग्राहकस्य ज्ञातवर्षजीवित्वरूपविशेषणबाधाद्बाधाभिमतेति ध्येयं॥ १४॰

तदनुसंधानमिति। विरुद्धार्थग्राहकत्वरूपलिंगप्रतिसंधानमित्यर्थः। अबाधप्रसंगादिति। अ
विलंबप्रसंगादित्यर्थः। इत्यपते च तदनुसंधानं विना तत्र विलंब इति त्वयापि तदवश्यं स्वीकरणीयमि
ति भावः। वस्तुतस्तु तर्कावतारकाले पूर्वोत्पन्नसंशयोपि दुर्लभः तावत्पर्यंतमनवस्थानात् तथा च पुनः
संशयोत्सर्जनमेव। एवं च तस्य कल्प्यप्रमाणाभावृतयाल्पत्वप्रमाणाभावस्य सामान्यतो दृष्टस्यैव पुनरव
तारो लाघवात्कल्प्यत इति भावः। लिंगनिश्चयार्थं सामान्यतो दृष्टांतरमाह अपि चेति। न च प्राणित्वलिंग
प्रतिसंधानं तदासिद्धमिति वाच्यं। अन्यतरव्याप्तिं विना विनिगमकलाघवादितर्कानवतारात्पूर्वोक्तयु
क्तेश्चेति भावः। विशेषविषयत्वादिति। जीवनविषयत्वादित्यर्थः। तथा च विरोधिविषयतया मरणानुमा

चिं॰ अ॰ म॰
१४१
141

नेनसत्प्रतिपक्षः सिध्यति। अन्यथान्यतरग्राहकसामान्यतोदृष्टेनविरोधाभावात्सत्प्रतिपक्षए
वनस्यादितिभावः। जीवनग्राहकस्यज्योतिःशास्त्रकथिततरेखादिलिंगस्य। सर्वत्रेतिपर्वतोनपर्वतीय
वह्निमान्धूमवत्त्वादित्यादिनाप्रतिबंधःस्यादित्यर्थः। जीवनग्राहकस्येति। अत्रेदंचिंत्यं। विपक्षबाध
कतर्कानवतारेसामान्यतोदृष्टस्यापिनजीवित्वनिश्चायकत्वंसत्प्रतिपक्षितत्वात्तद्वतारेचज्यो
तिःशास्त्रकथिततल्लिंगादेरावश्यकाज्जीवित्वनिश्चयसंभवेकिमनेनसामान्यतोदृष्टेनेति। तस्मादि
ति। अपेक्षत्वबलेननसत्प्रतिपक्षत्वमितिभावः। सर्वत्रेति। प्रमाणत्वाभिमतयोर्द्वयोरपिबाधःस्यादितिवि
परीतापाप्रागुक्तंमरणापेक्षयाजीवनंलघ्विति। लाघवंज्योतिःशास्त्राययथार्थत्वंचविनिगमकंस्वप १४१

द्रष्टव्यं। अन्ये मीमांसका इत्यर्थः। अप्रमाणस्यापीति तथा च यत्र जीवी गृह एव चेति वस्तुतोऽप्र
माणमपि प्रमाणत्वेन ज्ञायते तत्रापि तद्विरोधि बहिःसत्वमेव कल्प्यते न मरणमित्यर्थः। किं चेति।
मृते मरणं गृहस्थिते गृहसत्वं बहिःस्थे च बहिःसत्वमिति यथायोग्यं ज्ञेयं। अत्रेष्टापत्तिमात्रं क्याह
अर्थापत्त्येति। अन्ये तु किंचेत्यादिरर्थापत्याभासश्चैवं न स्यादित्यंत एको ग्रंथोऽप्रमाणत्वादित्यस्या
नंतरमिति। पूरणायः तेन हेतुत्वं लभ्यत इत्याहुः। विशेषव्याप्तिमूलकमनुमानमुक्त्वा सामान्यव्या
प्तिमूलकमनुमानमाह विद्यमानत्वे सतीति। द्वितीयानुमानं दूषयति सामान्यत इति। पत्यतत्वयो
रननुगमान्न व्याप्तिग्रह इति भावः। स्वोक्ते दूषणे खंडनसंमतिमाह। तदुक्तं यतोऽन्यत्वमिति। यतः कल्प

नीयादन्यत्वं तस्यान्यत्वप्रतियोगिनोऽग्रे प्रथमतः सिद्धेस्तस्याश्चार्थापत्तेरसिद्धेः प्रमाणत्वासिद्धेस्तत्क
ल्पत्वेनाभिमतस्यान्यत्वप्रतियोगिज्ञानस्य प्रमाणांतरादेवज्ञातत्वाच्च तदज्ञातत्वे वान्यथानुपपत्तेरेवाज्ञा
नादित्यर्थः। यद्वा यतः कल्पनीयादन्यत्वं तत्सिद्धेरग्रे तत्सिद्धेः पूर्वं तदसिद्धेरुक्तानुपपत्तिज्ञानासिद्धेरि
त्यर्थः। देवदत्तस्याभाव इति। अत्र देवदत्तस्येति प्रतियोगित्वं षष्ठ्यर्थः प्रकारो नञ्‌नेह देवदत्त इतिवत्संस
र्गमर्यादया प्रतियोगित्वभानं तेन प्रतियोगित्वत्वरूपव्याप्यतावच्छेदकावच्छिन्नप्रतियोगित्वरूपलिंग
भानादनुमानावतारोऽन्यथा वैशिष्ट्यविधया प्रतियोगित्वमात्रोपस्थितावपि व्याप्यतावच्छेदकावच्छि
न्नलिंगानुपस्थितौ नानुमानं स्यातान चैवं यत्र संसर्गमर्यादयैव भानं तत्रानुमानानवतारेणार्थापत्तिः १४२

तन्निरासं हृदि निधायाह प्रतिज्ञेति पंचानामपि यथोपयोगस्तथानन्तरं च वच्यते। समस्तेति॥
रूपं पक्षसत्त्वादि। विषयित्वेति। अनुमितिचरमकारणत्वमनुमितिजननेऽन्त्यकारणता विज्ञानानपेक्ष
त्वं। प्रयोजकत्वं जनकज्ञानजनकत्वं। वा बुद्धज्ञानपदं चरमकारणपरामर्शान्यूनविषयज्ञानप
रं। अत्राग्निव्याप्यधूमवानयमित्याप्तवाक्येति व्याप्तिवारणाय प्रयोजकेत्तं। परामर्शजनकेति त्वं
ते असंभवः। न हि तज्जनकविशिष्टवैशिष्ट्यावगाहि ज्ञानजनकं वाक्यं संभवति तत्स्य ज्ञानस्यप्रमान
सत्त्वादित्यत उक्तं जनकजनकेति। संस्कारद्वारा परामर्शजनकज्ञानाद्वज्ञानजनके पूर्वोक्ताप्तवाक्ये
ति व्याप्तिवारणाय ज्ञानेति। तज्जन्यज्ञानस्यापि यत्किंचिज्जनकज्ञानजनकत्वसंभवादुक्तदोषतादे

वि॰अ॰न॰
१४४
लिंग

वस्यमित्यत आह अनुमितिचरमकारणेति॰ लिंगपरामर्षपदं स्वरूपकथनपरं। वह्निव्याप्य
धूमवानयमितिवाक्यावयवावयवेतिव्याप्तिवारणाय शाब्दज्ञानेपदं। तदर्थस्तु न एव। आत्मा
दावतिव्याप्तेराह वाक्यपदं॥ अन्येत्तु। शाब्दज्ञानपदं कंटकोद्धाररूपेन्यायलिंगेवाक्येतिव्याप्ति
वारणाय। तच्चानुमितिचरमकारणपरामर्षजनकव्याप्तिज्ञानादिजनकयोग्यताज्ञानजनकत
याताहशपरामर्षजनकज्ञानजनकज्ञानजनकं। नायमासास इत्यनेनव्याप्त्यादिविशिष्टधीज
नकयोग्यताज्ञानजननात् तानवच्छाब्दपद्दानेप्येषदोषः। शाब्दज्ञानत्वेनताहशपरामर्शप्रयो
जकत्वस्याविवक्षितत्वात् तानयोग्यताज्ञानं तथाजनकं। योग्यताज्ञानत्वेनजनकत्वात् न्यायजन्यज्ञा १४४

नैतच्चारुज्ञानत्वेनैवजनकत्वंवायुक्तंप्रयोगउज्ञानएवोक्तपरामर्शोसामग्रीसत्वात्‌अन्यत्रापोक
वाक्याद्वह्निव्याप्यवान्नयमितिपरामर्षस्यैवाहत्वात्तन्नेरित्याकारएवानुपदंस्फुटत्वात्‌।एवंसत्यातो
क्तवह्निव्याप्यधूमवान्नयमितिवाक्यावयवावयवेतिव्याप्तिवारणायवाक्यपदंसह्नावाक्यपरमित्याद्युः
नचपर्वतेग्निर्धूमोयतःधूमश्चवह्निमन्मात्रवृत्तिः।अस्तिचतादृशोधूमेपर्वतवृत्तित्वंतस्मादग्निःपर्वत
वृत्तिरित्यादौन्यायसमानार्थेन्यायानात्मनिवाक्येतिव्याप्तिरितिवाच्यं।तादृशवाक्यस्यसर्वतांत्रिकसंप्रदा
यविरुद्धतयान्यायत्वेनव्याकृतत्वाभावात्कथंकथायामित्थंप्रयोगः।अतःसर्वसंप्रदायमेवमत्वाने
नेतितत्रौजगवेषणाव्यग्रतयावतका क्येनतद्विशिष्टवैशिष्ट्यावगाहिज्ञानानुत्पादनेनतस्यानुमि

तिवमेरेकारणापरामर्षप्रयोजकज्ञानाजनकत्वादित्याहुः। तेन वेति। नयाचमानान्तावः शाब्दज्ञा
नसहकृतमेवमनःपरामर्षजनकमिति वाच्यं। तस्याँनान्तोक्तवाक्यैर्नाज्ञामाण्यत्वांकाक्रांततयापराम ऊत्वे
र्षाजनकत्वात्। अन्यथा शब्दवाक्यजज्ञानादिवन्यायजज्ञानादप्यनुमित्यापत्तेः। तस्मान्न्यायजज्ञानेऽज्ञामा
ण्यत्वांकयातस्य काप्यतंत्रतया तदुपस्थित्यनुसारेण स्वयं मनसा धूमविशिष्टवह्निवैशिष्ट्यमित्याका
रज्ञानजननेन परामर्शौत्पाद इति स्वीकार्यं। तद्वाक्यस्य पदार्थमात्रोपस्थापकत्वेन प्रयोजकत्वादि
ति वदंति॥ अन्येऽनुमानांतरं मनोलक्षणमुत्पाद्यते। स्वात्मरूपसहकारिसंपत्ती क्रियत इत्यर्थ इत्याहुः॥
अनुमितीति। अत्र प्रथमशाब्दज्ञानांतं न्यायजन्यज्ञानपरं। तथा च न्यायजज्ञानजनकशाब्दज्ञानजन १४५

कवाक्यत्वमित्यर्थः। अत्र च न्यायबहिर्भूतवाक्ये तिव्याप्तिवारणाय न्यायजज्ञानजनकेति। न चावयव
वयवेतिव्याप्तिः। तस्य न्यायजज्ञानजनकशाब्दज्ञानजनकज्ञानजनकत्वेन तदजनकत्वात्। अत एव
कंटकोद्धाररूपे वाक्येपि नातिव्याप्तिः। तस्यापि न्यायजज्ञानजनकव्याप्तिज्ञानजनकयोग्यताज्ञानज
नकत्वेन तज्जनकत्वाभावात्। शाब्दपदं संपातायातं। आत्मादावतिव्याप्तिवारणाय वाक्यपदं। एत
च्चलक्षणं यन्मते वांतरवाक्यार्थज्ञानस्य महावाक्यार्थज्ञानजनकत्वमुपगमस्तन्मतेन बोध्यं। यदि
च तावत्संस्कारमेलकाज्ञावत्पदस्मृतौ तावत्पदार्थस्मृतिरतो महावाक्यार्थज्ञानमित्युपगमस्त
दास्यासंगतत्वापातादिति। परामर्षप्रयोजकवाक्यत्वेनेति। प्रयोजकत्वस्य जनके जनकजनके चाविशे

चि॰ अ॰ प्र॰
२४६
146

षादितिभावः।न्यायत्वापत्तिरिति।वाक्यत्वस्यापिगौरवेणत्याज्यत्वादितिभावः।यदिचवस्तुरादेःस्वरू
पसतएवहेतुत्वान्नतचाकांक्षेतिनतस्यन्यायत्वंतदाविशिष्टवैशिष्ट्येपिप्रथममाकांक्षानास्तीतितस्यापि
नतत्वमित्याहआकांक्षेति।दुर्निरूपमिति।असंतवीत्यर्थः।तत्स्वीकारइति।अनतिप्रसक्तानुगतधर्मस्वी
कारइत्यर्थः।अन्यथाजातिसंकरप्रसंगादिति।जातिनियामकानुगतकारणतावच्छेदकधर्मंविना
पिजातिस्वीकारेपरस्परविरहसमानाधिकरणजातिद्वयसमावेशःस्यादित्यर्थः।किंतद्द्रूपेति।अ
त्रन्यायाप्रविष्टप्रतिज्ञासमानाकारवाक्येतिव्याप्तिवारणायसत्यंतं।वाक्यार्थपदंसंपातायातं।न्यायां
तरप्रतिज्ञायाःन्यायांतरस्यप्रतिज्ञासमानार्थायाःन्यायांतरप्रतिज्ञात्वंमाप्रसांक्षीदितिप्रमेयोद्देश्य २४६

पदं। पर्वतो वह्निमान् धूमवत्त्वादित्यस्योदाहरणे यो यो धूमवान् सोऽग्निमानित्यनुमित्यंतरान्यूनानति
रिक्तविषयकत्वाद् ज्ञानजनके पर्वतो वह्निमानित्यनुमितौ प्रतिज्ञात्वस्यातिव्याप्तिवारणायाग्रेष्वुद्देश्य
पदं। अनुमितौ लिंगाज्ञानपदेश्यैतत्। तच्च तज्ज्ञानपदेत्वसंगवचारणार्थं तदिति ध्येयं। तथा चास्मिन्युद्दे
यद्विषयत्वेनानुमितिरुद्देश्यानस्यैवानुमितिविषयत्वेन विवक्षितत्वादिति नोक्तदोष इत्याहुः। प्रतिज्ञैक
देशोतिव्याप्तेरात्न्यूनेति। नयपदतावच्छेदकस्यावयवांतराप्रतिपाद्यत्वादन्यूनपदेनैव तद्यवच्छे
न देनांतिरिक्तपदवैयर्थ्यमिति वाच्यं। यत्र घटपिवीतरत्विन्नत्वाभावस्तत्र घटपिवीत्वाभाव इति साध्याना
वांशेनुदाहरणैकदेशोतिव्याप्तिवारकत्वादित्याहुः। एतद्वित्वं। तत्र घटपिवीत्वस्य इतरभेदसामानाधि

वि॰ व्य॰ प्र॰
१४७
147

करणाप्रज्ञानेनातिव्याप्त्यसंभवात् । यदि न तस्माद्वह्निमानयमित्याकारं निगमनं तर्ह्ययमिति पदस्य सर्वना द
मत्वेन बुद्धिस्थवाचकतया पर्वतत्वप्रकारकज्ञानजनकत्वान्निगमनेप्यतिव्याप्तिवारकत्वं तस्येति ध्येयम् ।
एवं चैतन्मते निगमनानवयवत्वे सतीत्यपि विशेषणीयम् । अन्यतो वह्निमानयमिति निगमनैकदेशे नाति
व्याप्तिरिति द्रष्टव्यम् । न च शाब्दपदवैयर्थ्यं । घटशब्दो गुणोऽव्यकर्मान्यत्वे सति सत्त्वादित्यत्रोदाहरणे प्र
द्विप्रतिज्ञारूपशाब्द एव दृष्टांतत्वेनोपादीयते तदा तत्रातिव्याप्तिवारकत्वात् । न हि तस्य परामर्शप्रयोजक
शाब्दज्ञानजनकत्वमनुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकत्वेनापि तु स्वज्ञानेनेति विवक्षितं
उत्लक्षणे तथाजनकत्वमिति वदंति । तच्चिंत्यम् । तस्य प्रतिज्ञात्वेन संग्राह्यत्वात् तद्विषयकस्योदाहरणस्या १४७

स्यानतिरिक्तविषयत्वाभावेनातिव्याप्त्यसंभवात्। तस्मात्संपातायातं त्राद्यपदं। पक्षसाध्यवाचकपदस्या
प्युक्तलक्षणसत्वादतिव्याप्तिरित्यत आह वाक्यमिति। तथाच तादृशज्ञानजनकपदसमुदायत्वमित्यर्थः। वा
वाचिक क्यपदसमुदायेदेतिं नवप्रतिज्ञायां ज्ञानलक्षणयोद्देश्यानुमित्यतिरिक्तविषयकज्ञानजनकत्वादसंभ
वइतिवाच्यम्ः वह्निमानित्यस्य हेत्वन्वयानुपपत्त्या ज्ञानत्वलक्षणायां हेत्वन्वयप्राक्कालिकमुख्यान्वय
बोधमादाय लक्षणासंभवात्।। केचित्तु तत्र ज्ञानलक्षणैवनेत्याहुः। ननु सर्वं प्रमेयमित्यादिप्रतिज्ञायाम
व्याप्तिः अनुमितिविषयातिरिक्ताप्रसिद्ध्या तत्रानतिरिक्ताप्रसिद्धेः। नच तत्र विवादाभावेन संज्ञायामभा
वेन चप्रतिज्ञात्वसंभवान्नोक्तदोष इति वाच्यम्ः अनुमित्समयातादृशाप्रयोगसंभवात्। भिन्नप्रकारकसंश

चि॰ अ॰ म॰
१४८
148

यसत्त्वाद्यात् । अन्यथा केवलान्वयित्वरूपगर्भे तनं विरुध्येत । सत्त्वं सर्वपदार्थवृत्तिधर्मत्वाद् वस्तुत्ववदित्या
दिप्रतिज्ञायां तथाप्यप्रतीकाराच्च । न ह्यत्रापि केवलान्वयिसाध्यं येन विवादादिर्न स्यात् । सर्वपदार्थानु
मितिविषयातिरिक्ताप्रसिद्धिस्तत्रापीति चेत् । अत्र ब्रूमः । अनुमित्यन्यूनानतिरिक्तविषयकपदेनानुमिति
विषयतासमव्याप्तविषयताकत्वं विवक्षितमिति नोक्तदोषः । यद्वैतदस्वरसादाह लिंगेति । प्रतिज्ञायां वह्निमा
नित्यादौ मत्वर्थनिरूपितसंबंधस्यापि भानादनुमितौ च तद्विषयत्वे मानाभावादनतिरिक्तविषयत्वम
सिद्धमित्यप्यस्वरसः पूर्ववद्बोध्यः । अत्रापि सत्यंतं न्यायप्रविष्टवाक्यपरमुदासीनवाक्यातिवारणाय ॥
अवयवांतरेतद्वारणाय लिंगाविषयकेति । आद्यपदं स्पष्टार्थं । प्रतिज्ञैकदेशादावतिव्याप्तिवारणाय १४८

वाक्यपदमवयवावयवान्यवाक्यपरम्·लिंगाविषयकज्ञानजनकत्वंचनञ्व्यत्यासेनलिंगविषयकज्ञा
नजनकत्वनियतावयवान्यत्वंतेनोदाहरणादिवद्घट्यावयवान्यत्वंपर्यवस्यति।अन्यथायत्रप्रतिज्ञायांहेतोः
पक्षतावच्छेदकत्वेनान्यथावाऽप्रवेशस्तत्राव्याप्तिःस्यात्।नचलिंगतावच्छेदकप्रकारेणलिंगाविषयकत्वविव
क्षयैवनोक्तदोषइतिवाच्यं·धूमकालादेःपक्षतावच्छेदकत्वे
तथाप्यप्रतीकारात्धूमत्वेनैवतत्रधूमस्यज्ञानात्तानवविवक्षितोपितादृशाज्ञानजन
कत्वनियमोयदिव्यक्त्यवच्छेदेनविवक्षितस्तदातादृशप्रतिज्ञायांतथैवाव्याप्तिः।अथानुगतहेत्ववयवत्वाद्य
वच्छेदेनतदाप्रतिज्ञात्वमवच्छेदकमादाययथाश्रुतेनन्नैवसमर्पनमस्त्वितिवाच्यम्·प्रतिज्ञात्वस्यैवलक्ष्य

वि॰ अ॰ र॰ त्वेन तदपरिचये तदादाय समर्थनस्याज्ञाकत्वात् । हेत्ववयवत्वादेस्तु लक्षणान्तरप्रमितत्वेन तदव

१४९ च्छेदेन लिङ्गविषयकज्ञानजनकत्वनियमग्रहादुक्तलक्षणार्थः सुग्रह इति भावः । निगमनेऽन्ततोऽपि नाति पूर्वविशेषणादपि

149 व्याप्तिरित्याह निगमनं चेति । चकारोऽप्यर्थे भिन्नक्रमः । निगमनं परामर्शहेतुरपि नेत्यर्थः । तथा च सत्यन्ते

नापि तद्वारणमिति भावः । न चैतदेवासिद्धमिति वाच्यम् । परामर्षपदेनोपनयजन्यपरामर्शस्य विवक्षि

तत्वात्तत्र च निगमनस्योदीच्यत्वेनाप्रयोजकत्वात् प्रतिज्ञायाश्चाकांक्षोत्थापनद्वारा प्रयोजकत्वमस्तीति तत्र

ताव नैतावसंभव इति ध्येयम् । अवयवलक्षणे च परामर्षपदं नोपनयजन्यपरामर्षपरम् । तेन तल्लक्षणस्य

त्तु निगमनेनाव्याप्तिरिति द्रष्टव्यम् । अत एव परामर्शेतरत्वचरमत्वं विशेषणमिहं नेति सर्वं सुस्थम् । इति दिक् ॥ १४९

हेत्ववयवेत्यर्थः। यद्वा वाक्यपदमवयवपरमिति नातिप्रसंग इति भावः। लिंगेति। अत्रापि नव्या त्यासे
न पूर्ववल्लिंगविषयकज्ञानजनकत्वनियतावयवान्यन्यायावयवत्वमित्यर्थः। यदि च न्यायावयवपदं
नास्ति किन्तु वाक्यपदं तद्घातदेवावयवपरं द्रष्टव्यम्। लिंगपदं काचित्कमफलं। पूर्वं विजातीयं ज्ञानं नि
र्बीजमुक्तमिति बीजपूर्वकं परमतमाह व्यवहारादिति। भास्करमतं दूषयति। एनेनेति। यद्यप्यत्रापि विज
तीयज्ञानजनकत्वमेव पर्यवस्यति तथाप्युपाधिभेदाद्भेद इति मंतव्यम्। आवृत्तौ त्विति। इदं त्वापाततः।
वस्तुतस्तु हेत्वन्वयानुपपत्त्या प्रतिज्ञायां ज्ञानलक्षणा वक्ष्यं वाच्या। विप्रतिपन्नो च न तथेति न तया तदन्यथा
सिद्धिः। न च प्रमाणकांक्षायां हेत्वत्रिधानाद्धूमादित्यादेर्ज्ञापकत्वं एवं पंचमीति नान्वयानुपपत्तिरिति वाच्यम्॥

वि॰ अ॰ म॰
१५०
158

ज्ञानलक्षणायाप्युपपन्नो हेतुत्वशङ्कायाः पंचम्या नानार्थत्वकल्पनायां मानाभावादिति वक्ष्यते। तद
भिधानमिति। अवयवांतराभिधानमित्यर्थः॥ अन्ये त्विति त्वस्य रसोऽभावनां तद्बीजं शब्दानित्यत्वे प्रमा
णं वदेत्यस्य साध्योपलक्षितं साधनाभिधाननियोगपरतयाप्युपपन्नो साध्यस्य विशेषणत्वमुक्तयु
क्त्युपपन्नं तेन गम्यम्। तथा च सैवास्तु किमनेनेति। अत एवोपसंहारे तामेव दर्शयति तस्मादिति। हेतुत्वं
धीविशेषण चेति। हेतुसमभिव्याहाराप्रविष्टवाक्येति व्याप्तिवारणाय कारणेत्यंतम्। तस्मादिति निगमनांशेन तद्वार
णाय साध्याविषयकेति धीविशेषणं। अत्र साध्यतावच्छेदकप्रकारेण साध्याविषयत्वं विवक्षितं तेन पृ
मेयादौ साध्येन साध्याविषयकज्ञानस्याप्रसिद्धिरिति ध्येयम्। न चैवमपि वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्र १५०

यत्वादित्यादिहेतावव्याप्तिरिति वाच्यम् । साध्यविषयकशाब्दधीजनकत्वनियततावच्छिन्नत्वस्य वि
वक्षितत्वात् । यो यो धूमवानित्यत्रोदाहरणांशेऽतिव्याप्तिवारणाय हेतुविभक्तिमदिति । सामान्यवत्वे सत
स्मदादिबाह्यकरणप्रत्यक्ष त्वादित्यत्राग्निमभागेऽतिव्याप्तिरित्यत उक्तं शाब्दपदम् । तथा च शाब्दाधिक
दर्थाधिकमिति न्यायेन यावदवच्छेदेन हेतुविभक्तिसमभिव्याहृतत्वं तावदवच्छिन्नशाब्दत्वं विवक्षितं प्रत्य
त च सति सप्तमीबलाद्विशिष्ट एव हेतुत्वान्वयात् विशिष्ट एव हेतुविभक्तिसमभिव्याहार इति भावः । हेतु
त्वेति । न्यायावयवत्वावच्छेदकावच्छेदेन हेतुत्वप्रतिपादकविभक्तिमत्त्वं विवक्षितमिति । तस्मादित्यंशमाद
य हेतुविभक्तिसत्वान्निगमनेऽतिव्याप्तिः । उदाहरणेति । व्याप्त्युपतिधाने तात्पर्यः । उदाहरणावयवपरत्वेचा

वि॰अ॰म॰
१५१
151

ग्गिमावयवपदव्यर्थतापत्तेरितिभावः।साध्याविषयेति।अजनकेत्यंतं शब्दविशेषणं।तस्मादितिनिग
मनांशेतिव्याप्तिवारणाय।तदर्थस्य पूर्ववत्।उदाहरणांशेतिव्याप्तिवारणाय हेतुपंचम्यंतेति।उदासी
नवाक्येतिव्याप्तिवारणायानुमितिपरेति।न्यायप्रविष्टवाक्यत्वमित्यर्थः।यद्वाऽनुमितिपरशब्देनन्या
यावयवत्वं विवक्षितं।तथाचसाध्याविषयकज्ञानजनकन्यायावयवत्वे हेतुपंचम्यंतन्यायावयवत्वे
वा लक्षणद्वयं बोध्यम्।पूर्वं हेतुत्वप्रतिपादकविभक्तिमत्त्वमुक्तमिदानीं तु हेतुपंचम्यंतत्वमुच्यत इति न
पूर्वाभेदः।प्रतिज्ञेति।उदासीनस्याप्रतिज्ञात्वेन प्रतिज्ञावाक्यजधीजन्याकांक्षानिवर्तकत्वमवयवस्यै
वेति पंचम्यंतोदासीनवाक्ये निगमनैकदेशे च नातिप्रसंगः।सामान्यवत्त्वेसतीत्यादौ हेत्ववयवावयवेप १५२

रंपरयोक्तज्ञानजनकेतिव्याप्तिवारणाय हेतुविभक्तिमत्त्वं विशेषणम्· हेतुत्वान्वितेकार्यावच्छिन्नवा
क्यत्वमित्यर्थः। हेत्ववयवांतर्गतस्यावरखंडवाक्यस्य तथात्वाभावात्तस्यामन्यावत्वेसतीत्यादिहेतौसति
सप्तमीबलाद्विशिष्टएव हेतुत्वान्वयेन विशेष्यमात्रे तदनन्वयादितिभावः॥ यत्तुधूमवान्यतइत्या
दावतिव्याप्तिवारणाय हेतुविभक्तिमदिति। नहितत्र पंचम्यंतमात्रेण तदाकांक्षानिवृत्तिरपितु पंच
मीति पंचम्यंताः स्यां हेत्ववयवे हेतुपंचम्यंतेनैवेति। तन्न। तस्यानवयवत्वे तत्र प्रतिज्ञाविरहेणोदासीन
वाक्यवत्स्वप्रतीकेनैव वारणात् अवयवत्वेच तद्वारणस्यानर्हत्वादिति। पंचम्यंतेति। न्यायाप्रविष्टहे
तुसहचारवाक्येतिव्याप्तिवारणायानुमितिपरेति न्यायप्रविष्टेत्यर्थः। निगमनेतिव्याप्तिवारणायत्

क्षणिकेति। तस्मादिति सर्वनाम्नश्च बुद्धिस्थवाचकतया तस्यार्थस्य बुद्धिविषयत्वेनाज्ञैर्वा तदविष
यत्वे लक्षणाया अप्यसंभवेन सर्वथा तच्चलक्षणाया अव्युत्पत्तेः। प्रतिज्ञायामपि साध्यपदे लक्षणेति
तच्चातिव्याप्तिरत आह पंचम्यंतेति। न च तत्र लक्षणायां मानाभावः। साध्यस्य हेतुवाक्यार्थेन हेतुनान्व
यासंभवात्। तस्य तदकार्यत्वात्॥ अप्येवं वदंति। न हि हेतुवाक्येन कारको हेतुरभिधीयते किंतु ज्ञाप
कः। साध्यनिर्देशानंतरं कृत इति प्रमाणाकांक्षायामेव तत्प्रयोगात्। पंचम्या अपि तच्च ज्ञापकत्वरूप
हेतुत्वपरत्वात्। तथा च हेतुवाक्यार्थे ज्ञापके ज्ञाप्यस्य साध्यस्य विषयत्वेनैवान्वय इति न साध्यपदे ज्ञा
न लक्षणा। अत एव भास्करादौ तथैव कंठतः प्रतिपादितमस्तीत्युद्देश्यानुमित्यन्यूनानतिरिक्तमित्य

दिगर्भप्रतिज्ञालक्षणं कृतवतो गंगेश्वरस्याप्येतदेवाभिमतम्। अन्यथा प्रतिज्ञायाः साध्यज्ञानविष
यत्वेऽनुमितेश्च तद्विषयत्वेन तद्व्यक्षणासंभवादिति॥ अपरे त्वाहुः पंचम्या ज्ञापकत्वपरत्वेन लक्षणयाश्रा
रूपावानावधेः सुब्विभक्तौ लक्षणाया अव्युत्पन्नेःऽनांत्यः। एकार्थत्वे संभवत्यनेकार्थत्वायोगात्। प्रतिज्ञा
लक्षणं च यथाश्रुतमेव तथोक्तं॥ यत्तु यदि प्रतिज्ञायां न लक्षणा तदा पंचम्यंतपदमत्र लक्षणे व्यर्थं स्यात्तान्
त्वपर्युदासनञादिलाक्षणिकपदवत्त्वं वयवांतरे तिव्याप्तिवारणाय तदिति वाच्यं। लाक्षणिकपदवत्वे
नताद्दृशानियतानुमितिपरवाक्यत्वस्यावयवं वा ख्यत्वेन तत एव ताद्दृशावयवांतरवारणात्। अन्यथ
यत्रोदाहरणविशेषधर्मवत्त्वादित्यादिहेत्ववयव एव दृष्टांतत्वेनोपादीयते तदा तदंशातिव्याप्तेर्वे

चि॰अ॰म॰ १५३ 152

ङ्क्तत्वेपत्त्यापातात् । न च प्रकृतसाध्यप्रतियोगिकहेतुपंचम्यंतगर्भितयोक्तातिव्याप्त्यसंभवः । तत्प्रयोग
हेतोरपि तत्प्रयोगोदाहरणादृष्टांतत्वसंभवादिति । तन्न ॥ उदाहरणांशाविषयीभूतस्य हेतुत्वावयवत्वे
न संग्राह्यत्वात् । तत्प्रतिपादकस्योदाहरणांशस्य धर्मवत्त्वादिति चेत् । इत्यादेर्महानसवदित्यादिव
त्पंचम्यंतत्वाभावेन नियमविवक्षाया अयुक्तत्वात् । लाक्षणिकपदवत्त्वमुपपादयतिहेत्विति ॥ अहे
तुत्वेनेति । अतीता[illegible]दो व्यभिचारादिति भावः । न चैवं स्वायत्तः शाब्दप्रयोग इति न्यायाद्भ्रमज्ञानादि
तिप्रयोगापत्तिः । कटं करोतीत्यादिवन्निरूढलक्षणया ज्ञानज्ञानत्वाभावापत्तेः । ननु हेतुपदे यदि
ज्ञानलक्षणा तदा वन्निरूढयविरोधेन ज्ञानमात्रमनुपतिष्ठते तेन उविषयोपि धूमादिः । तथा चानुप १५३

स्थितेतत्रगमकत्वाकांक्षानस्यात।प्रत्युतलिंगज्ञानेगमकत्वाकांक्षास्यादितितस्यैवगमकताप्र
योजकव्याप्त्यादिविषयकत्वरूपमुदाहरणात्तिधेयंजसज्येत।किंवाऽवयवेनानुमित्यंगज्ञान
मुत्पादयितुमर्हंलिंगज्ञानंचतथानतुलिंगज्ञानज्ञानं।तस्माल्लिंगस्यानुमित्यजनकतापदेपिध
मादिपदंन्याकमेव॰पंचमीवचनहेतुतायांकिंत्वनुमितिजनकज्ञानविषयत्वलक्षणेऽनुमितिप्र
योजकत्वमात्रइतिचेत।।अत्रवदंतियद्येवंत्रिद्वयविरोधस्तदापाकाऽकमित्यनन्विते
स्यात।अतोदोषपचारेपित्रिद्वयविरोधेनार्थकस्यानुपस्थित्याहेतोस्तत्राकांक्षाविरहात
यदिचतट्टस्यतयापितत्राकांक्षायदिवायद्धियेनविनानन्यासनइतिन्यायातद्वयैर्लक्षणयेवतद्व लक्षणांविनाप्य
स्यल।

चिं॰ अ॰ म॰ १५४

154

पस्थितेस्तत्राकांक्षातदाप्रज्ञतेपिज्ञत्वं। तद्विषयकज्ञानस्यापितन्निरूपणाधीननिरूपणा
त्वेनज्ञानलक्षणायैवतदुपस्थितिसंभवात्। अतएवसमासेन्यपदार्थलक्षणादौलंबकर्णादि
विशिष्टव्यक्तिभानमाननचैवमुपतस्थितस्यापिविषयस्यविशेषणत्वाद्विशेष्यएवज्ञानेगमक
ना। त्वाकांक्षास्यादितिचेत्तदिष्टापत्तिः। गमकत्वंहिज्ञानजनकत्वंतच्चलिंगज्ञानस्यैवनतुलिंगस्य। तथाच
कथमस्यगमकत्वमित्याकांक्षापितत्रैवव्याप्यविषयतयावतस्यगमकत्वमितितद्विषयीनत्वेलिंगेव्या
प्युपदर्शनोयोदाहरणमपिताद्दृशोसंगच्छते। अस्तुवालिंगएवाकांक्षातथापिनानुपपत्तिः। लाघवेनो
पस्थितिमात्रस्यतत्रतंत्रत्वेनविशेषणतयापितदुपस्थितेस्तत्प्रयोजकत्वात्। पक्षोक्तंपंचमीनहेतुता १५४

यामित्यादि। तत्र। हेतुत्वशङ्कायाः पंचम्या विवक्षितार्थे लक्षणापत्तेः। स्तुष्टिजनकौ वतदनुपपत्तेः। न च तत्
त्वज्ञानान्निःश्रेयसाधिगम इत्यत्र कथं प्रयोजकत्वे पंचमीति वाच्यम्। अनन्यथासिद्धत्वांशमपहाय वि
शिष्टशङ्काया अपि पंचम्या विशेषणभागे नियतपूर्ववर्तित्वे तात्पर्यात्। न च पदार्थैकदेशतया तत्रा
पि लक्षणैवेति वाच्यं। विशेषणांशे पदार्थैकदेशे अन्यान्वितत्वेनोपस्थिते निराकांक्षतया आकांक्षो
त्थापनाय स्वतंत्रोपस्थितये तत्र लक्षणास्वीकारात्। न तु साकांक्षविषये शेषभागेपीति। अस्तु वा तदनु
रोधान्नियतपूर्ववर्तित्व एव शक्तिः पंचम्याः। तथापि प्रकृते न संगतिः। उक्तप्रयोजकत्वस्यापि पंचम्य
र्थत्वे प्रमाणाभावादिति। यत्तु धूमविशिष्टज्ञान एव लक्षणेति धूमोपस्थितिः। विशिष्टलक्षणयाव

गंगाविशिष्टतीरोपस्थितिरिष्टैवेतितत्रलक्षणावसरेवक्ष्यामः। अनंतरोक्ते अन्येषांमतेपरैर्यायुक्ति
रुक्तातांदर्शयतिजातिविनेति। अत्रतादृशाज्ञानजनकत्वावच्छेदकमत्वेतदेवलक्षणमसत्वेतदपिदुर्ग्रह
मित्यस्वरसबीजंपूर्वमुक्तमत्रतत्कप्रायमितिनहृदनिर्तिं। अन्वयेति। अत्रजनकांतंकेवलव्यतिरेकिण्य
तिव्याप्तिवारणाय। प्रतिज्ञायाअपिपरंपरयातत्वयोजकत्वात्तद्वारणायहेतुवित्तक्तिमदिति। अत्रोद
सीनवाक्यातिव्याप्तिवारकत्वेनोपात्तयोःप्रथमचरमावयवपदयोरन्यतरगर्भंलक्षणद्वयंबोध्यम्। अ
न्यथान्यतरपदवैयर्थ्यापत्तेः। नन्विदमन्वयिव्यतिरेकिहेतावतिव्याप्तं। नयान्वयव्याप्तिमात्राभिधायक
त्वंविवक्षितमितिवाच्यम्। केवलान्वयिहेतौमात्रपदव्यवच्छेद्यव्यतिरेकव्याप्तेरसिद्धेरितिचेत्तन्न। अन्वय १५५

व्याप्यसन्निधायकावयवमात्राभिधानप्रयोजकेति विवरणात् । न चैवं मात्रपदव्यवच्छेद्याभावः । व्यति
रेकव्याप्तेरभावेपि विशेषादर्शनदशायां तदभिधायकावयवप्रसिद्धेः । तत्प्रतीतिजनकस्यैव तदभि
धायकत्वात् । दशाविशेषे च व्यतिरेकिहेतुः संग्राह्य एवेति आहुः । न च केवलान्वयिनि संशयाभावे
नन्यायानवतारात्तदीयो हेतुः संग्राह्यो नास्त्येवेति वाच्यम् । अनुमितस्यापि प्रयोगसंभवादिति भावः । पक्षेति ॥
पक्षसत्त्वादिमतोर्थस्य प्रतिपादको हेत्ववयव इत्यर्थः । अत्र च सद्धेतुविषयक एव हेत्ववयवः संग्राह्य इति
स्वरूपासिद्धविषयकावयवातिव्याप्तिवारणाय पक्षपदम् । एतच्चोपलक्षणं बाधितत्वाद्यपि बोध्यम् । त
असाधारणविषयकवारणाय व्यतिरेकिहेत्वतिव्याप्तिवारणाय च सपक्षपदम् । व्यभिचारिविरुद्धवि

षयकवारणाय केवलान्वयिहेतुवारणाय च विपक्षासत्व इति। एवमग्रिमलक्षणमपि बोध्यम्। एवं वै
न्न व्याख्यायते तदा वारणाय हेत्ववयवस्य पदान्तरेणैव वारणात् प्रथमलक्षणे पक्षपदं द्वितीयलक्षणे
पक्षसपक्षपदं वानर्थकमापद्येतेति भावः। दृश्याविशेषान्वयिसाधारणमात्रानुमितीति। अत्र कारणं
तमुदासीनवारणाय। तस्मादिति निगमनांशेति व्याप्तिवारणाय साध्याविषयकेति। शाब्दपदं स्पष्टार्थं। केव
लव्यतिरेकिण्यपि व्याप्तिवारणाय प्रतीतान्वयेति। प्रतीतान्वयमात्रेत्यर्थः। प्रतीतान्वयं यत्साध्यं तस्य सा
धनं तद्व्यावर्त्तकमित्यर्थः। यो यो धूमवानित्यत्रोदाहरणांशेति व्याप्तेराहहेतुविभक्तिमदिति। दृश्याविशे
षव्यतिरेकिसाधारणं लक्षणमाहैतदेवेति। व्यर्थत्वादिति पक्षधर्मतायास्तदानीमनाकांक्षितत्वेनमी। १५६

मांसकवत्त्वशोधनायापिमन्तुवादिर्निषयोक्तव्यः।तथाचसत्यनाकांक्षिताभिधानेऽर्थांतरापातादिति
न्नावः।केचित्तुव्यर्थत्वाद्व्यर्थविशेष्यत्वादित्यर्थः।धूममात्रस्यैवव्याप्यत्वेनतत्संबंधस्यगुरुत्वादितिव्या
वर्त्तते।तन्न।धूमवद्धूमवत्त्वस्यापिव्याप्यत्वेनव्यर्थत्वाभावात्।समानाधिकरणावच्छेदकद्वयसमावेशेऽ
न्यतरलाघवस्यैवतद्बीजत्वात्।नचैवंधूमवत्त्वादित्युक्तेत्वदुक्तार्थांतरमपिनस्यात्कोऽत्रावनम् पदार्थ यावता
र्थतात्पर्यदर्शनार्थमयामतुप्प्रयोगोनकृतः।किंतुविशिष्टएवहेतुरित्युक्तार्थपरतापरिहारकरणसंभवा
दितिवाच्यम्।उदाहरणोपनयाभ्यामेवहेतुपरिच्छेदात्।नहिधूमवत्त्वेहेतौयत्रधूमइत्युदाहरणं
धूमवांश्चायमित्युपनयोवायुज्यते।किंतुयत्रधूमवत्त्वमित्युदाहरणम्।धूमवत्त्ववांश्चायमित्युपनयश्चेत्याहुः॥

चि॰ अ॰ ग॰ एवं धूमत्ववह्नित्वव्याप्यो धूम इत्येवोपनयः स्यान्मतुपो व्यर्थत्वात् यदि च कथकसंप्रदायानुरोधान्न तथा तदा

१५७ प्रकृतेपि तुल्यम्॥ एवं प्रतिज्ञादावपीति चित्यम्॥ मम मा बलादिति। विरुद्धार्थिकाया एव विरहेर्विरहत्वं तदर्थो

157 न्वयविरोधित्वात्॥ अत एव प्रतिबंधकान्यसमस्त इत्यादिरपि हेतुर विकल इति भावः॥ व्याप्तेरिति। वि

शेषणत्वेनास्याः प्रथमोपस्थिततया प्रथममाकांक्षाविषयत्वादित्यर्थः। पक्षधर्मतायाश्च वैशिष्ट्यसं

पत्त्येनातथात्वादिति भावः॥ केचित्तु सकलवादिसिद्धत्वमेव व्याप्तेः आद्यमध्यम्। पक्षधर्मतायामुपरि सवि

तत्वादेः कश्चिद्विप्रतिपद्यतेपीत्याहुः॥ तत्र दर्शनायेति। याव्याप्तिर्यथोदाहरणेन प्रदर्श्यते तथोक्तं भाव।

गंधवत्त्वादिमतव्याप्तिप्रदर्शकत्वं च परंपरयोदाहरणस्य दृष्टव्यम्। पदार्थविधया वाक्यार्थविधया वा १५७

ततस्तदलाभात्। किंतु तेन सहचारे बोधिते मानसो व्याप्तिग्रहो भवतीति। तत्रेति। अत्र जनकांतमुद
सानवारणाय न्यायजज्ञानजनकपरम्। प्रतिज्ञादिवारणाय बोधजनकेत्यंतम्। निरूढसंबंधबोध
जनकत्वं तद्बोधतात्पर्यकत्वं उपनये च पक्षधर्मताबोधे तात्पर्यमिति न तत्रातिव्याप्तिः। यद्वा तत्संबं
धविधायकत्वमित्यर्थः। उपनयस्य च तत्संबंधानुवादकत्वमिति। शब्दपदं च यावदच्छेदेन तत्संबंधबो
धकत्वं तावत्पदसमुदायपरम्। तेनोदाहरणैकदेशेनातिव्याप्तिः। सामान्यलक्षण इति। व्याप्यत्वाति
मतेत्यादिस्थल इति शेषः। कस्यचिन्मतमपाकरोति। न्यायेति। न्यायावयवत्वे सति दृष्टांतप्रतिपादक
मित्यर्थः। उपनयेप्युपलक्षणं। निगमनातिव्याप्तिरपि द्रष्टव्या। अन्य इत्यस्य स्वरसप्रदर्शनं। तद्बीजं च

वि॰अ॰म॰
१५८
158

तादृशजिज्ञासाजनकत्वमनुगतावच्छेदकासत्वे दुर्ग्रहं तत्सत्वे च तदेव लक्षणमस्त्विति द्रष्टव्यम्। अत्र
व्यभिचारेति। व्यभिचारिसाधारणसाध्यसामानाधिकरण्यमात्रजनीतिप्रसंगवारणाय वीप्साम
नुरित्यर्थः। तेन वीप्सितशब्देन यावत्साधनाधिकरणोपस्थितौ न तत्साध्यवत्त्वविधानाद्यावत्साध
नाश्रयाश्रितसाध्यसंबंधरूपा व्याप्तिर्गृह्यत इति भावः। ग्रंथकृदभिमतव्याप्तिपदे विशिष्टसामाना
धिकरण्यरूपायास्तस्या वीप्सयाप्यनुपदर्शनात् तर्कितयेति चिंत्यम्। ननु तथापि व्यभिचारधीवारणाय
सा तथावत्तया सकलसाधनाधिकरणे साध्यवत्त्वबोधनाद्व्यभिचारशंकाशून्यसहचारज्ञानात्तव
तिमानसो व्याप्तिग्रह इति चेत्। न। यद्युदाहरणस्य व्यभिचारज्ञानविरोधिज्ञानोत्पादकत्वमनुमते १५८

तदा व्याप्त्युपदर्शकत्वस्यापि संभवेन व्याप्तिज्ञानस्य मानसत्वोपवर्णनविरोधात् । व्यभिचारज्ञानविरो
धिज्ञानविषयस्यैव व्याप्तित्वोचित्यात् । यत्रेति । ननु सामानाधिकरण्यमात्रस्य व्यभिचारिसाधारणतया
केवलान्वयिन्यपि विशिष्टसामानाधिकरण्यमेवावश्यं व्याप्तित्वेनानुपेयम् । तच्चात्र सच्च यदि वीक्षां वि
नापि स्यात्तदा धूमादावपि स्यात्तथैव तदा केवलान्वयिन्यपि तां विना न तच्चात्र इति तत्राप्युपादेयैव सा ॥
न च धूमादौ व्यभिचारसंशयस्संभवति नात्रेति विशेषोऽस्तीति वाच्यम् । हेत्वसमानाधिकरणात्यन्ताभावप्र
तियोगिसाध्यं न वेति संशयस्य तत्रापि संभवात् । न च केवलान्वयित्वेन ज्ञाते तदसंभव इति तत्रैव तदनुपा
दानं नान्यत्रेति वाच्यम् । अस्य कर्तव्यत्वेन तत्रापि तदुपन्यासस्य कर्तुमुचितत्वात् । अन्यथा केवलान्वयित्वे

वि॰अ॰न॰ नज्ञातस्यप्रमेयत्वादिलिंगस्यपक्षधर्मतापिनोपदर्शितेति तथात्वेकथकसंप्रदायविरोधात्। असा
१५९ धकताप्रयोगेचनियमतज्ञनयवादिसम्मतिविषयतयाकथकसंप्रदायसिद्धतयाचव्याप्त्यनुपन्या
साध्ये सः। किंच यदिकेवलान्वयित्वेनज्ञातेव्यभिचारशंकाविरहाद्व्याप्त्यनुपादानंतदा असहचारशं
159 कायाअपितत्वाज्ञानाद्वासहचारबोधनप्रयोजनमपिनास्तीत्युदाहरणमेवनक्रियेत। यदिचसहचा
रज्ञानंविनामनसापिनव्याप्तिग्रहइतितद्बोधनायतदुपादानंतदा अव्यभिचारज्ञानंविनापितते
नव्याप्तिग्रहइतितद्विशिष्टसामानाधिकरण्यज्ञानायवीप्साघटितमुदाहरणमावश्यकं। एवंचान्ये
ऽनुमानेपिवीप्सोपादेयैव। तथाचावश्यान्तेदेननानात्वपुरस्कारादेकस्यपक्षत्वंदृष्टांतत्वंचन १५९

विरुद्धमितिवीप्सानानुपपन्नेतितस्मादत्रसमाधानंचिन्त्यं।वीप्सायामपिव्याप्तिचारतादवस्थ्य
मितिवयमिति।अनेकव्याप्त्युपस्थापनसमर्थायाअपिवीप्सायाःसाधनाधिकरणद्वित्रिव्याप्त्यु
पस्थापनेपिचरितार्थत्वसंभवादधिकरणांतरेसाध्यवत्त्वाग्रहात्ततोपिनव्याप्तिग्रह इत्यर्थः॥
ननुवीप्सयाव्युत्पत्तिबलाद्व्याप्तिग्रहःस्यात्।तथाहि·वीप्सितत्रशब्दश्रवणानंतरंद्वितीयपदस्यानुवा
दकतयाप्रयोजनजिज्ञासायांव्युत्पत्तिबलाद्व्याप्तितात्पर्यकत्वेगृहीतेव्याप्तिबोधस्यैवप्रयोजनत
याप्रथमयत्पदोपस्थाप्यभिन्नंसर्वसाधनाधिकरणंतदन्यत्वेनानुगतेनरूपेणोपस्थाप्यते।एवंच
सर्वंचसाधनाधिकरणेसाध्यवत्त्वबोधनाद्भवतिव्याप्तिग्रह इतिचेत्।हंतैवंव्युत्पत्त्यादरेवीप्सांविनैव

यद्योगप्राधान्याभ्यां व्याप्तितात्पर्यकश्च नियम इति व्युत्पत्त्यन्तरादेव सर्वसिद्धावन्यवच्छेदमात्स
त्त्वदुद्धरितयत्पदादेव यावत्साधनाधिकरणोपस्थितौ वीप्सावद्व्याप्तिग्रहसंभवे किं गुरुणा वी
प्सादरेण। यद्योगप्राधान्यव्युत्पत्तिपुरस्कारेण अल्पादरेणो[illegible]दाहरणे संभवति न वीप्सानु
त्पत्त्यादर इत्यत्र तात्पर्यम्। न च वीप्साव्युत्पत्त्यादरेपि व्याप्तिवारतादवस्थ्यमित्यत्राह तदिदमुक्तमे
वं यद्योगप्राधान्यमात्रस्यामेव व्याप्तौ लक्ष्यायां वीप्सावधारणोस्तु यार्थ इति। वीप्सया व्याप्तिलाभमभिप्रेत्याह
वीप्सेति। यद्यपि तत्पदवीप्सायामपि नानन्वयः तथापि यत्पदोपस्थापितयोः प्रत्येकं तत्पदद्वयेन प
रामर्शसंभवात्। यथासासाक्रियानमस्मुखीवन्नवेत्यत्रातथापेक्षपदोपादानेनाप्यत्तिमतत्सिद्धि १६

संसवेद्वितीयतत्पदोपादानेप्रयत्नगौरवमित्यभिप्रायेणोतदुक्तमितिद्रष्टव्यम्। विरूपेति॥
यस्यपदद्वयात्मिन्नभिन्नरूपेणोपस्थितयोरपिकेनचिदेकेनधर्मवत्त्वादिरूपेणैकतत्पदेन
परामर्शोसंसवादित्यर्थः। अत्रवदंति। नित्यवीप्सयोरितिसूत्रेणवीप्सायांसुबंतस्यैकपदस्याभ्या
नेपदद्वयात्मकःसमुदायआदिश्यते। वीप्सावततत्पदद्वयप्रयोक्तुर्व्याप्तुमिच्छांव्याप्तिंचतदभि
धेयस्यसाकल्येनापरपदार्थेनसंबंधः। तथावततत्पदद्वयसमुदायएकपदतामापन्नोऽवय
वद्वयवान्विपुरस्कारेणैवयुगपत्साकल्येनैवस्वप्रतिपाद्यमुपस्थापयतीतिव्युत्पत्तिरवसीयते।
च्यनएवसमुदायस्यसकलस्वावयवार्थोपस्थापकत्वमेकपदत्वंचपुरस्कृत्यतनचबहुवचनाप

त्रिंन्त्रिर्न्त्रिरित्यत्रनकारस्यणात्वंवारांक्यपरिहृतवान्न्यासकारः।तस्माद्वीप्सायामपिव्याप्तिवा
रतादवस्थ्यमित्यसंगतमेवायत्पदद्वयसमुदायेनहेतुमत्त्वयाबुद्धिस्थानांसाकल्येनैवोपस्थापनात्।
एवंचविरूपोपस्थितयोरपीत्याद्यसंगतमेवानहितत्रयत्पदद्वयंपरस्परनिरपेक्षंमिथोविलक्षण
रूपद्वयेनसकलस्वात्मिधेयमभिधत्तेकिंत्वेकेनैवरूपेणतत्समुदायएव।अन्यथायघट्टमवदित्यत्र
यत्पदद्वयान्वयार्थधर्मवत्पदस्पार्हत्रिप्रसंगादिति।।अत्रक्रमः।वीप्सायामपिव्याप्तिवारतादवस्थ्यमित्य
स्यानुमितिहेतुव्याप्त्यग्रहतादवस्थ्यमित्यर्थः।ग्रंथत्तुन्मतेहृष्ट्यन्योन्याश्रावगर्भोव्याप्तिरनुमितिहेतुःसा
चवीप्सयोक्तरीत्यासकलसाधनाधिकरणेसाध्यवत्वोपस्थापनेपिनोपस्थापयितुंशक्यते।अन्योन्या १६।

ज्ञावादिवाचकपदाज्ञावात्। एवं च वीप्सायाः सत्वेऽसत्वे वा यद्ग्रहानुकूलसहचारमात्रोपस्थापक व्याप्ति
त्वमुदाहरणस्य तदा किं वीप्सया। न च वीप्सायाः सर्वस्मिन् साधनाधिकरणे साध्यसहचारोपस्थापक
त्वं विशेष इति वाच्यम्। सहचारज्ञानत्वेनैव तस्य व्याप्तिग्राहकत्वे तस्य विशेषस्यानादरणीयत्वात्। एवं
च यावत्साधनाश्रयाश्रितसाध्यसामानाधिकरण्यरूपाया अपि व्याप्तेर्व्यभिचारिव्यावृत्ततया वीप्सा
बलेनोदाहरणप्रतिपाद्यतया चानुमित्यनुकूलतामुपगंतारं प्रत्याह वीप्सा चेति। योऽपीमां व्याप्तिमनु
मित्यनुकूलामिच्छति तस्यापि तत्पदे वीप्सा विफला। तां विनापि तज्ज्ञानसंभवादित्यर्थः। न च तथापि
विरूपोपस्थितयोरित्ययुक्तमेव समुदायस्यैकेन रूपेणोपस्थापकत्वादिति वाच्यं। गौरवेण समुदाय

वि॰अ॰न॰
१६२
162

स्याच्छाक्ततयानुपस्थापकत्वेन यत्पदद्वयस्यैव प्रत्येकं भिन्नरूपेणोपस्थापकत्वात्। अत एवावयव
शक्तिपुरस्कारेणेति तयापि स्वीकारः। नचैवमावृत्त्यापत्तिः। धूमवत्पदेन नानाकारकान्वितैकक्रिया
पदेनैवोन्नयान्वयबोधनात्। यथा चनावृत्तिस्तथापि तन्मतेतथा गंगेशं प्रत्येतेव वक्ष्यते। अत्र वयों धू या
मवानित्युदाहरणं धूमहेतौ न युज्यते। तेन हि मतुबर्थसामानाधिकरण्यं प्रतिपाद्यते न तु धूमसामाना
धिकरण्यं। धूमस्याधेयतायाः पर्वतस्याधारतायाश्चाप्रतीतेः किंतु धूमसंबंधस्याधेयता भासते। त
स्माद्यत्र धूमस्तत्र वह्निरित्येवोदाहरणं तत्रोचितमिति वदंति। अत्र धूमः। एवं पर्वतो वह्निमानिति प्रति
ज्ञा वह्निव्याप्यधूमवानयमित्युपनयः तस्माद्व[illegible]ह्निमानिति निगमनं च न स्यात्। वन्ह्यादेराधेयता १६२

याः पर्वतादेरग्न्याधारतायाश्च ततोऽप्रतीतेः। न च तत्रापि पर्वते वह्निरित्याद्येव प्रतिज्ञादिकमिति वा
च्यम्। कथकसंप्रदायविरोधात्। यदि च वह्न्यादिविशिष्टसंबंधस्याधेयतायाः प्रतीतो विशेषणां
शस्य वह्न्यादेरप्याधेयता प्रतीयत एवेति मन्यसे तदेतद्यापि तुल्यमिति। इदं चेति। संप्रदायमते न
सामर्थ्यिकदृष्टांतसहितोदाहरणाभिप्रायेण वा दृष्टांतस्य साध्यादिवैकल्येनोदाहरणाभासत्वं बो
ध्यम्। यच्च पुनरयवैकल्येपि साध्यादिवैकल्यमस्त्येव तथाप्यत्यंताकौशलख्यापनाय तेनापि रूपे
णाऽभावनमिति दृष्टगुपन्यास इति बोध्यम्। अनुपदर्शितेति। यथा महानसमित्येव यत्रोदाहरण
मित्यर्थः। विपरीतेति। यो यो वह्निमान्स धूमवानित्येवोदाहरणमित्यर्थः। एवमग्रेपि। अत्रावयवांतरा

वि॰अ॰प्र॰
१६३
163

नासत्वं कथं नोक्तमिति चिंत्यम्। अनुमितीति। अनुमितिकरणव्यापारसमानाकारज्ञानजनकाव
यवत्वमित्यर्थः। यद्यपि तस्मादिति निगमनेन तच्छब्देन व्याप्तिपक्षधर्मतापरामर्षोक्तज्ञानजनकत्वं
संभवति तथापि साध्यव्याप्यविशेषणकपक्षविशेष्यकपरामर्शसमानाकारज्ञानजनकत्वं नास्ती
ति न तत्रातिप्रसंग इति भावः। ननु परेषां तृतीयलिंगपरामर्शहेतुतांगीकार एव नास्तिकुतस्त
स्यान्यायोपनयइत्यत आह तदनभ्युपगमेवेति। तथा चोदाहरणानंतरं पक्षधर्मतामात्रस्याप्यु
पदर्शनार्थमवयवांतरं परैरपि स्वीकर्त्तव्यमेव। व्याप्तिविशिष्टधर्मताप्रदर्शकं तत्किमर्थं स्वीकर्त्त
व्यमित्येवावशिष्यते तच्च तृतीयलिंगपरामर्शहेतुत्वव्यवस्थापनादेव निरस्तमिति भावः। तद्या १६३

नुमितीति। अत्रोदासीनवारणाय कारणत्वं तं साध्यधीविशेषणं। प्रतिज्ञातिव्याप्तेराह व्याप्तेत्यादि।
साध्यधीजनकत्वं साध्यधीज्ञानजनकत्वं प्रतिज्ञायामिव निगमनेपि साध्यपदस्य लक्षणया तद्वत्तया
ज्ञेयत्वपरत्वादित्यर्थः। पर्याप्तेरिति। प्रतीतेरित्यर्थः। अपर्यवसानादिति। साकांक्षत्वादित्यर्थः। अर्थेति।
अभिधानं व्याप्त्यादिविशिष्टलिंगानुभवः। अभिधेयं तथाभूतं लिंगं। आकांक्षा हि चतुर्ष्ववयवेषु
द्वारमित्यत्रैवाभिधानापर्यवसानाद्विश्वजिता यजेतेत्यत्रैवाभिधेयापर्यवसानात्तदुभयाभावे
व कथं स्यादित्यर्थः। ननु यावत्पक्षे साध्यविपरीतशंका तावन्नाभिधेयं पर्यवस्यति। न हि संभवति प
क्षे साध्याभावो व्याप्त्यादिविशिष्टं लिंगं चेति। तथा चाभिधेयापर्यवसानादाकांक्षा स्यादित्यत आह विपरीतेति॥

चिं·अ·न·
१६४
१८४

साध्यविपरीतशंकानिवृत्तेरपिपक्षे साध्यसत्त्वोपदर्शकात्प्रतिज्ञात्वरूपणादवयवांतरादेवसावादि
त्यर्थः। अन्यथेति। प्रतिज्ञायास्तदनिवर्तकत्व इत्यर्थः। नहीति। नहि निगमनमपि विशेषदर्शनतांप
क्षनिष्ठसाध्यसत्त्वोपदर्शकत्वरूपामनाहत्य तन्निवर्तकमित्यर्थः। सिद्ध इति। प्रतिज्ञा च साध्यनिर्देशा
इति पक्षनिष्ठसाध्यसत्त्वोपदर्शकत्वाविशेषेपि निगमनमेव तन्निवर्तकं न तु प्रतिज्ञेति भावः। स्वरूपेति।
सिद्धत्वप्रतिपादकपदादेरभावान्निगमनस्यापि साध्यविशिष्टपक्षमात्राभिधायकत्वमित्यर्थः। प्र
स्तुतसाध्यनिर्देशत्वमेवास्येत्याह साध्यत्वेति। अन्यथा प्रतिज्ञाया अपि सिद्धत्वनिर्देशत्वापत्तौ पुनरस्त
त एव तन्निवृत्तिसंभवेऽस्या वैयर्थ्यमेव स्यादित्यर्थः। समीहितेति। निर्वाहादिति। उद्देश्यपरानुमित्युत्पा १६४

दानिर्वाहात्। तथा च निगमनं विना तात्पर्यविषयीभूताबाधितत्वासत्प्रतिपक्षितत्वचिताभिधाना

मिति। पर्यवसानमेवावयवांतराणां तेन सहाकांक्षेति भावः। प्रयोजकत्वं अनुमितिजनकत्वं। असिद्धेरि मित्यर्थः

८ ति। तेन विनापि स्वार्थानुमित्युत्पादर्शनादित्यर्थः। यद्वा गम इति। अयं च नियमः परोक्षज्ञानेबोध्यः।

अन्यथा घटाभावज्ञाने सति घटप्रत्यक्षं न भवति न च तत्र तदभावज्ञानसाध्यमिति व्यभिचारादिति। अ

दि त्र केचित्। अबाधितत्वाज्ञानस्यानुमितिहेतुत्वे लाघवेन परामर्षस्यैव तद्विषयतयानुमितिहेतुत्वं वा

च्यं। ननु तद्विषयकं ज्ञानांतरं गौरवात्। तथा च परामर्षविषयाभावत्वेन बाधितत्वसत्प्रतिपक्षितत्व

योरप्यसिद्धिरेव स्यात् तत्सिद्धिभिन्नत्वमूलेन वा तयोर्ज्ञानस्य साक्षादनुमितिप्रतिबंधकत्वसंभवात्।

त्वं स्यात्। परामर्शविघटनद्वारैव प्रतिबंधक।

चिं॰अ॰न॰
१६५
साधारण
165

तथाचापसिद्धांतः। किंच बाधस्य पक्षीयसाध्याभावत्वेन तदभावस्य पक्षीयसाध्यरूपतया साध्यज्ञा
नं साध्यज्ञाने हेतुरिति पर्यवसितं तच्चासंगतं सिद्धसाधनताप्रसंगात् यदि च साध्याभावप्रमा बाधः
तदा स्वपरसाध्याभावप्रमाविरहरूपो बाधाभावस्तत्र साध्यसत्वनिश्चयं विना निश्चेतुमशक्य एवं त
थाच तत्राप्यबाधितत्वनिश्चयसाध्यकसाध्यनिश्चयापेक्षायां इत्यबाधितत्वनिश्चयस्यानुमितिहेतुत्वे
[illegible] त्वमापद्येतेति महदसमंजसं तस्माद्यद्वग
मे सति यन्न भवति तत्तदभावज्ञाने सति भवत्येवेति परस्परबाधादिज्ञानप्रतिबंधाभिप्रायेणाबाधितत्वा
दिकं बोध्यते। न तु तद्ज्ञानमप्यनुमितिहेतुरित्यभिप्रायेणत्याहुः॥ वस्तुतस्त्वनुमितौ गुणानुरोधेनयो १६५

ग्यताज्ञानवत्संशयनिश्चयसाधारणमबाधितत्वज्ञानं हेतुरित्यग्रेवक्ष्यते। तथा च हेतुत्वात्तत्प्रा
यणेव तद्बोधनमिति मंतव्यम्। असिद्धिलक्षणं यान्यथैव वक्ष्यामः। ननु निगमनेनाप्यबाधितत्वा
वक्त: दिबोधनं प्रतिज्ञातार्थस्य सिद्धत्वप्रतिपादनमुखेन विरोधिव्यवच्छेदकतया कार्यम्। अन्यथा प्र
तिज्ञावयवादपि तद्बोधापत्तेः। तत्र च प्रागुक्तो नन्वय इत्यत आह नवेति। यद्यपि हेतुना कांक्षितत्व
लक्षणसिद्धत्वमपि न साक्षाद्विरहबोधकं बाधादेः। तथात्वेपि निगमनस्य सर्वथैव साक्षात्तद्बो
धकत्वं· तथापि साध्यपुनर्वचनस्यानुवाद . तया प्रयोजनजिज्ञासायां परिशेषाद्बाधादिविधन
नमेव तदित्यवसीयते तथैव मुत्पत्तेः। तदाहुः। उपसंहारस्यायं महिमा यद्विपरीतशंकाविलापनं

नामेति। सिद्धेति। सिद्धं पक्षादि तथा च वह्निव्याप्यधूमवानयमित्यत्रयपाऽदंशब्देन सिद्धस्य प
क्षस्य परामर्शस्तथा साध्यांशस्यापि सर्वनाम्ना परामर्शो युक्त इत्यर्थः। विरोधिवारणायेति। पक्षे
बाधस्य=सत्प्रतिपक्षस्य साध्याभावस्य साध्याभावव्याप्यस्य च विरोधिनो निरासायेत्यर्थः। तथेति। थाल्प्रत्ययस्य म
166 तत्रेदं नार्थत्रयसंभवादिति भावः। प्रकारे विशेषकधर्मे। उपनयस्य तथा चायमित्याकारत्वमाश्रि
त्याह। यइति।। हेतुमानित्यर्थ इति। उपनयस्य सन्निहित तथाशब्दांतरोपस्थापितस्य हेतुमत एवत
नियमने थात्वेन तच्छब्देन परामर्शसंभवादिति भावः। सामान्येनेति। यो यो धूमवान्सोऽग्निमानित्युदाहरणोप
क्षसाधारणसाध्यवत्वरवह्निमत्तादिपदोपस्थापितस्य पक्षस्य तत्पदेन परामर्शसंभवात्पक्षवृत्तित्वप्र १६६

काराऽन्वयः पक्ष एवेत्यनन्वय इत्यर्थः। यद्यपि पक्षवृत्तिवह्निमत्त्वादिप्रकारकत्वं पक्षेनान्वितं तथा
व पि तद्घटेत्यनेन तत्पदार्थत्वेनान्वयेनैवाँगते तत्पदार्थवृत्तिधर्मातिदेश्याः तथैवव्युत्पत्तेरिति भावः। अत ए
वेति। तत्पदस्य पक्षपरत्वेन साध्यस्य तदगर्भतया तत्साध्यान्वयस्तत्रैवेत्यनन्वयादेवेत्यर्थः। ननु तत्प
देन दृष्टांतपरामर्ष एवास्तु तथा च तृतीयपक्षेनान्वय इत्यत आह। तदनुमान इति। तत्र पक्षस्यैव दृष्टां
तत्वेनोक्तदोषतादवस्थ्यमित्यर्थः। ननु धर्म्यंशेऽप्यवस्थाभेदमादाय साध्यस्वीकारान्नोक्तदोष इत्य
त आह बहूनामिति॥ अतिप्रसंगादिति। अवयवविपर्यासादावपि योग्यतादिनाप्रकृतान्वयसंभवे
नोक्तदोषत्वापातादित्यर्थः। तस्मादिति। नवन्नतकत्वादित्येव कथं न क्रियत इति वाच्यम्। ततः पूर्वोक्तरूप

वि॰अ॰न॰
१६७
167

विशिष्टत्वलक्षणेन समर्थत्वेन हेतोरलाभे साध्योपसंहारालाभात् तस्मादिति सर्वनाममहिम्ना
पूर्वोक्ताशेषरूपलाभेनोपसंहारसिद्धेः। तदुक्तं। सर्वनाम्नो ह्ययं महिमा यत्पूर्वोक्तानुसंधानं नामे
ति। ननु माभूद्विशिष्य निगमनेनानित्यत्वस्य सिद्धतावगम इत्यत आह। नान्यथेति। तद्वैयर्थ्यान्निगमनवैय
र्थ्यात्। निगमनेन पक्षे विशिष्यानित्यत्वस्योपसंहारे तद्बलाद्विरोधीकृतबाधादेर्निराकरणं न त्वन्यथे
ति भावः। हेतुवदाभासमान इति योगात् दुष्टो धर्म्येव हेत्वाभासपदवाच्य इति तल्लक्षणमाह। अनुमिती
ति। अनुमितिकारणीभूताभावप्रतियोगिपदेन यस्मिन्सत्यनुमित्यभावनियमस्तादृशं ज्ञानं विवक्षितं।
तेन व्यभिचारित्वादिज्ञानस्य कारणविघटकस्य संग्रहो भवति। अन्यथा यथाश्रुते तदभावस्य व्याप्ति १६७

ज्ञानेनान्यथासिद्धतया ऽनुमित्यकारणतया तदसंग्रहापत्तेः। कारणपदस्य प्रयोजकत्वपरत्वे उपा
धिज्ञानस्यापि तादृशतया तत्रातिव्याप्तेः। यथोक्ते तु तत्र न प्रसंगः। उपाधिज्ञानेपि व्यभिचारानुमित
वनुमित्यप्रतिबंधातानुव्यभिचारादोधर्मेति व्याप्तिः। न च हेतुत्वाभिमतत्वे सतीति पूरणीयमिति वाच्यम्
हेतुत्वाभिमानोहि कादाचित्कस्तत्कालीनो वा। आद्ये व्यभिचारादावपि कदाचिन्नसत्त्वे ऽतिव्याप्त्यप
रिहारः। अंत्ये साधारणानैकांतिकादावप्यनभिमानदशायामव्याप्तिः। किंच यत्पार्थपदेन वह्निव्यभि
चरितत्वादिन्नमविषयधर्मादावतिव्याप्तिवारणेपि समूहालंबनीभूतैकहेत्वाभासविषयकतादृश
ज्ञानविषये ऽन्यत्र सद्धेतावतिव्याप्तिस्तदवस्थैवान च तादृशज्ञाने यद्विषयतयानुमितिप्रतिबंधक

न्वि॰ अ॰ न॰ त्वं तद्देवविषयपदेन विवक्षितमिति वाच्यम्। बाधितस्य लिंगस्यासंग्रहापत्तेः। बाधज्ञानस्य पक्षनिष्ठसाध्या

१६८ भावविषयतया तज्ज्ञानप्रमात्वविषयतया वा प्रतिबंधकत्वेन लिंगविषयतयाऽप्रतिबंधकत्वात्। ननु बा

168 धायामपक्षधर्मो हेत्वंतरं नैकांतिको वेति नियमात्तत्र व्यभिचारित्वादिनैवोक्तलक्षणगमनं स्यादिति चेन्न। बाधि

तत्वेन रूपेण विभागानुपपत्तेः। न ह्यन्येन रूपेण सामान्यलक्षणमन्येन च रूपेण विभागः संभवति। तथापि

वक्ष्यमाणासंकीर्णबाधस्थलेऽव्याप्तेर्वज्रलेपत्वात्। न ह्यत्रैव तत्रापि व्यभिचारित्वादिसंभवः। अपि वा असि

द्ध्यादिसंकीर्णसत्प्रतिपक्षिते तेन रूपेण लक्षणगमनेऽपि सद्धेतौ तत्राव्याप्तिः। तत्र विरुद्धोऽन्यव्याप्यगोचर

त्वा समूहालंबनस्य प्रतिबंधकत्वात्। तस्य च भ्रमत्वनियमात्। न च सद्धेतौ स्वगोचरपरामर्शस्य प्रमात्वनिय १६८

मात्रपुरस्कारेणैवोक्तलक्षणगमनं स्यादिति वाच्यम्। ज्ञाने हि यावद्विषयतया प्रतिबंधकत्वं तावति या
थार्थ्यं विवक्षितं न वा। आद्ये अपरहेतुविषयतयापि सद्धेतुगोचरपरामर्शस्यानुमितिप्रतिबंधकतयात
दंशो चायथार्थत्वनियमेनोक्तदोषापरीहारः। अंत्ये वह्निमत्त्वव्यभिचारित्वादित्वमविषयीकृतधूमादावतिव्याप्ति
स्तद्वस्थैवाधूमांशो तस्यापि यथार्थत्वात्। न च तस्य धूमविषयतया प्रतिबंधकत्वमेव नेति वाच्यम्। किंचि
द्वह्निव्यभिचाराशंतिज्ञानेप्यनुमितिप्रतिबंधकत्वे मानाभावः। तद्विषयकस्य तस्यानुमित्यनुकूलत्वेन त
द्विषयत्वेनैव प्रतिबंधकत्वात्। अनुमत्प्रतिपक्षयोर्विरुद्धयोरनयोरन्यतरस्मिन् व्याप्तिपक्षधर्मतान्यत
रत्नंग इति ज्ञानस्य यथार्थस्य तत्र प्रतिबंधकतयाऽव्याप्तिरिति चेत्। न। तादृशां हि ज्ञानं न प्रत्यक्षेण किंतु
प्रतिबंधाभावात् धूमविषयत्वेनैव तस्य प्रतिबंधकत्वात्। न च सद्धेतुपरामर्शस्यैवापरहेतुविषयतया ३

वि॰ अ॰ र॰ विरुद्धोऽनयव्याप्तमुनयमेकत्र न वर्त्तेत इति व्याप्त्यवधारणादनुमितिरूपं तद्व्याख्यम्। तथा च यत्र विरो
१६९ धिद्वयपरामर्शानंतरं विषयांतरसंचारादिना व्याप्तिपक्षधर्मतान्यतरसंगानुमित्यनुकूलो व्याप्त्यादिप
रामर्शो न जनितः तत्र सत्प्रतिपक्षितेऽव्याप्तिस्तदवस्थैवानतो चेद्व्याज्ञानाभावेन तत्रानुमित्यप्रतिबंधा
169 त्र त्संग्राह्यमेवनेति वाच्यम्। विरुद्धोऽनयव्याप्यवत्त्वपरामर्शस्यैव विरोधिसामग्रीत्वेन प्रतिबंधकत्वात्। न हि
व्याप्त्याद्यन्यतरज्ञानभंगपुरस्कारेणाऽत्वात्तासत्त्वं किंतु कदाचित्सामग्रीवत्त्रो न तदपि ज्ञानं तत्र भवतीति।
अन्यथा तस्यापि करणविघटकत्वापत्तेः बाधप्रतिरोधयोः साक्षादनुमितिप्रतिबंधकत्वमिति सिद्धांतो व्या
समीचिनं ऊप्येत। किं च यत्राविरुद्धं लिंगद्वयं विरोधित्वभ्रमेण सत्प्रतिपक्षितं तत्र तद्ज्ञानस्याप्ययथार्थत्वेनाव्या १६९

न्निर्वह्नलपायितैवायन्नुव्याप्तिपरदृधर्मतान्यतरत्वंगादनुमानेननप्रतिबंधः किंत्वसाध्यासाधका
विभावितिज्ञानंसत्प्रतिपक्षेनुमितिप्रतिबंधकंतच्चयथार्थमेवेतिनाव्याप्तिः। अन्यथाऽसाधकतानु
मानवैयर्थ्यापत्तेरिति। तन्नुच्छमसाध्यासाधकत्वंहिसाध्यसिद्ध्यजनकत्वंअनुमितिप्रतिबंधकताव
च्छेदकरूपवत्त्वंवा। तद्ज्ञानंचनसाक्षादनुमितिप्रतिबंधकंबाधवदनुमितिविषयविरोध्यनवगा
हनात्। नापिकरणविघटकंव्यभिचारादिज्ञानवत्परामर्षविषयस्याप्रामाणानवगाहनात्। अन्यथाऽ
तो साधकत्वस्यव्यभिचारादिवद्धेत्वाभासोपाध्यंतरतापत्तेः। असाधकतानुमानंचनानुमितिप्रतिबंधा
र्थंकिंतुतदपितद्धेत्वपमित्यग्रेस्फुरमिति। किंवानुमितिप्रतिबंधकयथार्थज्ञानविषयत्वंविशेषणमु

वि॰अ॰म॰
१७॰
170

पलक्षणं वा। नाद्यः। अज्ञायमानेनित्यदोषेविरुद्धादावव्याप्तिप्रसंगात्। नचतदानदसंग्राह्यमेवे
तिवाच्यम्। साध्यव्यापकाभावप्रतियोगित्वादेर्विशेषणलक्षणस्यतदानीमपिसत्वेनसंग्राह्यत्वात्।
अन्यथाविशेषलक्षणानांतदानींतिव्यापकतापत्तेः। नापिद्वितीयः। सहेतावसाधारणेसप्रतिपक्षेचवि
शेषादर्शनदशायांतादृशाज्ञानविषयत्वाद्दर्शनदशायामपिहेत्वाभासत्वापत्तेः। अपिचयत्पुरु
षीयतादृशाज्ञानविषयत्वंयस्यतस्यतंप्रतिपरंहेत्वाभासत्वमन्यंप्रत्यपिवा। आद्येयेनपुरुषेणविरु
द्धादिविशेषोनित्यदोषोनगृहीतस्तंप्रतितस्यहेत्वाभासतानापत्तेः। द्वितीयेविशेषादर्शनदशा
यामेवंपुरुषंप्रतिज्ञातकत्वादिहेतोर्हेत्वाभासत्वेविशेषदर्शनवतःपुरुषांतरस्यापिहेत्वाभासताप १७॰

शेरिति॥ अत्रोच्यते। अनुमितिप्रतिबंधकपदेन ज्ञानस्यानुमितिप्रतिबंधकतावच्छेदकाः सव्यभिचा
रत्वादयस्तु पाधयो विवक्षिताः। अनुमितिप्रतिबंधकतावच्छेदकत्वं च लिंगान्यत्वे सति अनुमितिप्रति
बंधकज्ञानविषयतयावच्छेदकत्वमेव विवक्षितम्। तद्वत्त्वगोचरयथार्थज्ञानविषयत्वं हेत्वाभासत्वमित्य
र्थः। विषयत्वं च विशेष्यत्वं अतो न व्यभिचारित्वादौ धर्मे तिव्याप्तिः। तद्वत्त्वगोचरत्वं च तात्कालिकतद्वत्त्व
गोचरत्वं तेन पाकरक्ते रूपाभावमिति धीयथार्थत्ववत्कादाचित्कसंबंधपुरस्कारेण सत्प्रतिपक्षित
त्वबुद्धेर्यथार्थत्वेन सत्प्रतिपक्षितत्वोन्नीतस्य हेतोर्नातिव्याप्तिः। न चैवं यथार्थपदवैयर्थ्यं तात्कालिक
तद्वत्त्वगोचरत्वविरहादेव सद्धेतावनातिप्रसंगादिति वाच्यम्। तद्वत्त्वं हि न विषयविशेषणं किंतु

चिं.अ.न.
१७१
चे
17)

ज्ञानविशेषणं तथा चेदानीं वह्निव्याप्तिचरितो धूम इति भ्रममादायातिप्रसंगतावच्छेदस्याप्तातादृश
ज्ञानविशेष्यत्वं च विशेषणमेव न चाज्ञायमानदशायां निरुक्तदोषव्याप्तिरिति वाच्यम्। ईश्वरज्ञानस्यैव
तदानीं तद्वदिदं लिंगमित्याकारकस्य तदापि सत्त्वात्। न चैकपुरुषीयसत्प्रतिपक्षतादशायां जनक
त्वादिहेतोः पुरुषान्तरं प्रति सत्प्रतिपक्षतापत्तिः। आपादकाभावात्। न हि तादृशज्ञानविषयः सर्व
पुरुषं प्रति हेत्वाभास इति लक्षणार्थः। किन्तु तादृशज्ञानविषयो हेत्वाभास इत्येतावतैव हेतुतदाभा
सविवेकोपपत्तेः। तत्पुरुषीयसत्प्रतिपक्षतायां तत्पुरुषीयसमानबलोपस्थित्या प्रतिरुद्धतत्पुरुषी
यानुमितिरूपकार्यलिंगत्वं प्रयोजकमिति न तदापत्तिः। एवं सद्धेतावसाधारणोऽपि सामान्यतद्दुष्टा १७१

पक्षे। विशिष्यापादकाभावात् न च समूहालंबनीभूतैकहेत्वाभासविषयकतादृशज्ञानविशेष्ये
न्यत्र सद्धेतावतिव्याप्तिः। तदंशे तद्वत्त्वगोचरयथार्थज्ञानविशेष्यत्वस्य विवक्षितत्वात् बाधितमिदमिति
ज्ञानस्य यथार्थस्य विशेष्यत्वाद्बाधिते लिंगेनाव्याप्तिः। न च तथापि सत्प्रतिपक्षे व्याप्तिरेव तत्र विरोधिपराम
सा र्शविषयीभूतस्य प्रतिबंधकस्यैव दोषत्वात् स्थापनाहेतौ च तत्संबंधाभावेन तद्वत्त्वगोचरयथार्थज्ञानाभावादि
ति वाच्यम्। इदं लिंगमनेन सत्प्रतिपक्षेणासत्प्रतिपक्षितं च विशिष्टमिति ज्ञानस्य यथार्थत्वेन सकलसिद्धत
या ज्ञानरूपसंबंधस्य स्वरूपसंबंधविशेषस्य वा कल्प्यत्वात्। तत्संबंधेन ज्ञानस्यापि यथार्थत्वाच्च। अत एव त
त्संबंधस्यानित्यत्वादनित्यदोषत्वं। न चैवं धूमो वह्निव्यभिचारीति ज्ञानसंबंधमादाय धूमेऽपि व्यभिचारित्वं वह्नि

वि॰ अ॰ म॰ सत्वादत्तिव्याप्तिःस्यादितिवाच्यम्। तद्ज्ञानस्याययार्थतयासकलसिद्धतयातत्संबंधत्वाकल्पनात्। अनव
१७२ संबंधीम्रतज्ञानस्यैवानुमितिप्रतिबंधकत्वेनतद्वत्त्वगोचरज्ञानस्यानुमितिप्रतिबंधकत्वेनेतिवाच्यम्। इ
172 ष्टापत्तेः। नह्यनुमितिप्रतिबंधकीभूततादृशज्ञानविशेष्यत्वंलक्षणार्थः। अपितुतादृशज्ञानविशेष्यत्वमा
त्रं। तच्चज्ञानंव्याप्तिवारित्वादिगोचरमनुमितिप्रतिबंधकमित्यन्यदेतत्। अन्यथाबाधितेऽव्याप्त्यापत्तेः। नहि
लिंगविशेष्यकबाधितत्वादिज्ञानस्यानुमितिप्रतिबंधकत्वं किंतुबाधमात्रविषयकस्यैवतद्विषयतयाविरोधा
भावादित्युक्तं। ननुयाथार्थ्यस्यविषयघटिततयाविषयविशेषणीभूतमपितद्वत्त्वंलब्धमेवतथाचव्यर्थवि
शेषणत्वमित्यपरितोषात्तद्वत्त्वरूपंलक्षणंकरोति। यद्विषयत्वेनेति॥ ज्ञायमानमितिवातत्रापिज्ञानविष १७२
२ अत्रचयत्किंचित्संबंधेनतद्वत्त्वगोचरयथार्थज्ञानविशेष्यत्वमतिप्रसक्तं। तत्तत्संबंधेनतथात्वमननुगतमितिविवक्षितं।

उ यीभूतस्य व्यभिचारादेर्न प्रतिबंधकत्वं किंतु तद्ज्ञानस्यैवेत्यपरितोषाद्द्वितीयं लक्षणं मंतव्यं। अनेन व्यभि
वि चारादय उपाधयो ऽवद्धिताः तद्विषयत्वेनैव लिंगज्ञानस्यानुमितिप्रतिबंधकत्वात्। अत्र च लक्षणद्व
ये तत्त्वमित्यत्र तद्वृत्तस्य तद्धत्वपरत्वेन न तद्धत्त्वमित्यर्थः। ते न व्यभिचारादो धर्मे नातिव्याप्तिः। धर्मिणि लि
गे च नासंभवः। न च पक्षताविरहरूपाया ज्ञानविरहरूपाया वा असिद्धेर्न संग्रह इति वाच्यम्। इष्टापत्तेः॥
ज्ञायमानदोषस्यैवात्र हेत्वाभासत्वेन लक्ष्यत्वात्। न चाज्ञानादिदोषो ज्ञायमानः प्रतिबंधः। कारणाभाव
त्वेन स्वरूपसत एव प्रतिबंधकत्वात्। न चैवं संदिग्धासिद्ध्यादिकं कथायां नोद्भाव्यम्। अज्ञायमानदोष
तया हेत्वाभासत्वाभावात्। निग्रहस्थानांतरत्वाभावाच्चेति वाच्यम्। हेत्वाभासाश्च यथोक्ता इति सूत्रेनुक्त

वि॰ अ॰ ८
७३
173

समुच्चयार्थेन चकारेण तस्यापि निग्रहस्थानान्तरत्वप्रतिपादनात्। सिद्धसाधनस्य पक्षताविरहपर्यवस
न्नस्यार्थान्तरत्वेनैवोद्भावनमिति सर्वमवदातं। नन्वेतल्लक्षणं सद्धेतौ सत्प्रतिपक्षिते असाधारणे चाव्याप्तं।
व्याप्तस्य पक्षधर्मतया तस्यानुमित्यनुकूलतया ऽनुमितिप्रतिबंधकतावच्छेदकताभिमतसत्प्रतिपक्षितत्वा
देरभावादित्यत आह दृष्टेति। तथा च तत्काले तज्ज्ञानस्यानुमितिप्रतिबंधकत्वादनुमितिप्रतिबंधकतावच्छे
दकरूपस्य सत्प्रतिपक्षितत्वस्यासाधारणत्वस्य च सत्त्वान्न तत्राव्याप्तिरिति भावः। पक्षपीति। अत्र सत्प्रतिप
क्षपदं विरोधिनिश्चयसामग्रीपरं तत्त्वेनैव सत्प्रतिपक्षस्य प्रतिबंधकत्वात्। न तु सत्प्रतिपक्षहेत्वाभासपरं
तस्य प्रतिपक्षासंभवादिति द्रष्टव्यम्। तथापीति। नत्वनुमित्यसाधारणदोषत्वेनावलक्ष्यता किं तु ज्ञायमानलिं ७३

गदोषत्वेनेत्यर्थः। अनुमित्यसाधारणदोषत्वमपि बाधसत्प्रतिपक्षयोरित्याह यद्वेति। बाधेनेत्युपलक्षणं
सत्प्रतिपक्षेणेत्यपि द्रष्टव्यम्। प्रत्यक्षप्रत्यक्षबाधत्वेन तत्सामग्रीत्वेन प्रतिबंधकत्वादपीतत्वानुमितावपि शं
खे पीतत्वप्रत्यक्षोदयात्। अनुमितौ तु बाधमात्रस्यैव प्रतिबंधकत्वात्तथा च बाधेनेत्यत्र बाधमात्रेणेत्यर्थो
बोद्धव्यः। ननु शाब्देऽपि बाधमात्रस्यैव प्रतिबंधकत्वं। अयोग्यताज्ञानमात्रस्यैव प्रतिबंधकत्वादिति चेन्न। आ
त्वं तावत्स्वपि ज्ञानमर्थे शाब्दः करोति हीति सिद्धांतानुसारेण तत्प्रतिबंधकत्वमनंगीकृतत्वे वास्याभिधानात्।
नवास्मत्सिद्धांतेऽपि न बाधमात्रस्य शाब्दप्रतिबंधकत्वं न रचिरः श्रौतानुमानेन तद्वचोच बोधकागमस्य बा
धापत्तेरिति वाच्यम्। उपजीव्यजातीयत्वेन शाब्दस्य बलवत्त्वात्तद्विरोधेनानुमानस्यैव बाधात्। अत एवागम

चिं·अ·ग·
१७५
175

बाधितोपाहरणमिदमेवाग्रे तद्बलवत्वाज्ञानदशायां विशेषादर्शनवतः समुत्पन्नया व्याप्त्यनुमित्या शब्दबा
धापत्तेरिष्ट[illegible]त्वादिति। ननु गौरवज्ञानस्य गुर्वर्थानुमितिप्रतिबंधकत्वे गौरवस्याप्युपाधिव्यभिचारादिवद्धेत्वाभास
त्वोपाधित्वमस्तु। न च हेतुविषयतया तद्ज्ञानस्याप्रतिबंधकत्वान्न तथात्वमिति वाच्यम् बाधस्यापि पक्षतया त्वाप
त्तेः। नहि तद्ज्ञानमपि हेतुविषयतया प्रतिबंधकमित्युक्तमिति चेत् न अयं ज्ञाने सत्यपि व्यर्थमनुमितिप्रतिबंधः त
स्य बत्तयात्वेनोन्निमतत्वान्न च गौरवम् तथा। फलमुखगौरवस्य प्रमाणसिद्धतया तद्ज्ञानस्याप्रतिबंधकत्वादि
ति। तत्र पंचलिरूप्या विशिर्विजयं तद्दत्वाहु तवेति। सव्यभिचारोपाधि यद्यपि सामान्यलक्षणानंतरं विभागो यु
क्तः तथापि प्रातःकालतापत्तेः तथाप्यनुपसंहारी न सव्यभिचारांतर्गतः किंतु सिद्धांतगर्भ इति केषांचि १७५

अनाकांक्षिता
प्रियानवापत्ते

ध्यसंतथाच्चतत्ताधारणेनसमव्याप्तियावत्स्वरूणमप्युक्तमितिचंकामपनेत्संतदंतर्गतत्वप्रदर्शनपरत्व
मेतेनग्रन्थदेवविरागेमास्पर्यमितिभावः। प्रत्यंजकत्वंसाध्यकत्वमेपादवाच्यंवागास्वमू॰ तत्रविरहपुत्र
यंप्रत्येकस्यमसंस्वतोत्पादेकस्येति। नाप्युत्तयपरेति। साध्यवत्साध्याभाववद्रूपंपक्षद्वयं। अनुपसंहा
रि। तोपद्रवस्यैवसंशयोनिरावः। उत्तयेति॰ अथचसर्वेतिविशेषणंतेनधर्मांशेमातिव्याप्तिः। अणेति। साध्यसंदेह
जनककोटिद्वयोपस्थितिः साध्यतदभावोपस्थितिः तज्जनकंयत्पक्षधर्मताज्ञानंतद्विषयत्वेसतीत्यर्थः। न
नुपक्षधर्मेनतिव्याप्तिरितिचेन्न॰ साध्यसंदेहजनकप्रामाण्याप्रामाण्यसंशयात्मककोटिद्वयोपस्थितिजन
कज्ञानविषयत्वेनतेज्ञानत्वेव्याप्तिवारकत्वात् पक्षधर्मताज्ञानंचसाध्यसंशयविषयत्वनिताज्ञानेन

चिं.अ.स. १७५ 175

वज्ञानत्वस्यसाध्यसंशयविषयपर्वतादिवृत्तिताज्ञानंप्रामाण्यसंशयात्मककोटिद्वयोपस्थितिजन
कंकिंतुज्ञानवृत्तिताज्ञानमेवेत्यन्नवतितद्व्युदासः।ननुसर्वज्ञानंनिर्विषयकंज्ञानत्वादित्यनुमितिप्रामाण्यसं
शयजनकज्ञानविषयज्ञानत्वेतथाप्यतिव्याप्तिः।तत्रसंशयविषयीभूतज्ञानवृत्तिताज्ञानस्यैवतथात्वा
दितिचेत्.नहितज्ज्ञानस्यनिर्विषयकत्वरूपसाध्यसंशयविषयवृत्तिताज्ञानत्वेनप्रामाण्यसंशयात्मको
भयकोट्युपस्थितिजनकत्वंकिंतुप्रामाण्यसंशयविषयीभूतनिर्विषयकत्वानुमितिवृत्तिताज्ञानत्वेनैव।
अन्यथाघटादिज्ञानेप्रामाण्यसंशयोनस्यात्।ज्ञानत्वस्यघटादिवृत्तिताज्ञानविरहात्।ननुव्याप्तिचारित्वा
दित्वमविषयीभूतेसद्धेतावतिव्याप्तिः।नचहेत्वन्तिमतपदेनहेत्वाभासपरेणतद्व्युदासः।अपक्षधर्मेष १७५

मतादृशान्यतमविषयेतथाप्यतिव्याप्तेः। नचतादृशकोट्युपस्थापकप्रमाविषयत्वेनैवनातिप्रसंगः।
इत्यत्रिमतपदवैयर्थ्यापत्तेः। मैवम्। इत्यत्रिमतपदस्यसाध्याव्याप्यत्वपरत्वादितिकेचित। तन्न
व्यत्तिचरितत्वादित्यन्यतमविषयीभूतेविरुद्धतथाप्यतिव्याप्तिरेवं नचविरुद्धोप्यनेनरूपेणासाधारणएवे
तिअंपञ्चतायेत्रिधाभावाघ्रस्यलक्षणत्वमेवेतिवाच्यम्। पद्धर्मतापदवैयर्थ्यापत्तेः। निर्विषयत्वादौसाध्ये
तत्र ज्ञानत्वस्यविरुद्धत्वेनलक्षणत्वाद्व्यावर्त्तनस्यानत्रिमतत्वात्। असविषयत्वादौसाध्येतस्यनविरुद्धत्वमि
तिवेतानात। तत्रसाध्येत स्यसद्धेतुत्वेनसाध्याव्याप्यत्वपदेनैववारणात्। नचविशेषणाज्ञानजन्यत्वादौ
साध्येतस्मिन्नेवहेतावतिव्याप्तिः। तस्यसव्यभिचारित्वेनसंग्राह्यत्वात्। अन्यादृशस्यचसाध्यस्याभावात्।

तस्माद्यदि विरुद्धस्यासंग्राह्यत्वं तदा व्याप्तिर्न र तत्रान्यतमविषयीभूते विरुद्धेति व्याप्तिः। यदि च तस्य संग्राह्यत्वं तद्
पक्षधर्मतापदवैयर्थ्यमेवेति चिन्त्यम्॥ वयं तु ब्रूमः। ज्ञानपदं प्रमापरमेव यद्विषयत्वेन कोट्युपस्थापकत्वं तदंशे
प्रमात्वं बोध्यम्। तेन स्वरूपासिद्धसंकीर्णेना व्याप्तिः। विरुद्धं वासंग्राह्यमेवेति पक्षधर्मतापदं सार्थकं। तादृशज्ञा
नदशायामेवात्र मते लक्ष्यतेति तदभावदशायां नाव्याप्तिः। न च हेत्वन्तिमतपदवैयर्थ्यं तस्य साध्याव्याप्यत्वपरस्य म
द्धेत्वसाधारणातिव्याप्तिवारकत्वात्। केवलान्वयीत्यादिनाग्रिमग्रंथेन तस्यालक्ष्यत्वेन प्रतिपादनादिति नानुसंधे
तावसाधारणे साध्यव्याप्यत्वस्याभावादव्याप्तिः केवलान्वयिसाध्यकेऽनुपसंहारिणि चाव्याप्तिरित्यत आह केव
लेति। विशेषलक्षणस्यापि तद्व्यावृत्तस्यैव बोध्यत्वादिति भावः। यद्यप्यस्य संग्राह्यत्वेपि न दोषः। तत्र लक्षणावारणाय १७६

विशेषणमप्यनर्थकं तथापि सद्धेतुर्न कदापि हेत्वाभास इति मतमालंब्यैतदुक्तम्। ज्ञात इति। यतः पुरुषदोषो न व
स्तुदोष इत्यर्थः। अत्रेदं चिन्त्यम्। पक्षे साध्याभावरूपबाधवत्साध्याभाववद्व्याप्यरूपप्रतिपक्षस्यापि नित्यदोषत्वं सदैव त मे
त ज्ञानस्य साध्यानुमितिप्रतिबंधकत्वात् न च साध्य व्याप्यत्वपरामर्शाभावदशायां न तथात्वमिति वाच्यम्। बाधस्या
प्यतथात्वापत्तेः। यदि च परामर्शकाले तत्प्रतिबंधकत्वकल्पनादन्यदापि तथात्वं तदा तुल्यम्। एवं क्वचित्समाक्वचिन्न
मः प्रतिबंधको बाधवदेवेत्यवधेयम्॥ प्रमेयत्वेनेति। अयं घट एतत्घटाद्भिन्नः प्रमेयत्वादित्यत्रेत्यर्थः। तथेति।
साध्याभावगतस्य हेत्वाभासत्वादिलक्षणानुसारेणैतदुक्तं बोध्यम्। साध्यवदवृत्तित्वेन निश्चितसाध्यवदवृत्तित्वे
नेत्यर्थः। पक्षे साध्यस्यासंदिग्धत्वादिति भावः। यस्य यदा तादृग्ज्ञानविषयत्वं तस्य तदा व्यभिचारित्वमिति मतानु

चिं॰ अनु॰
१७७
177

सारेलोतद्वोध्यमू। अन्यथा दन्याविशेषेऽप्यापितादृशज्ञानविषयतया संज्ञायकत्वेनातिव्याप्तिप्रसंगात्। तथा
च तदृशायामस्यापि संगाह्यत्वमेवेति भावः। एतदज्ञानेपीति। न च साधारण्याद्यज्ञाने एतज्ज्ञानस्याप्यनुमितिप्र
तिबंधकत्वाद्धि निगमकाभाव इति वाच्यं। एतज्ज्ञानस्य विरोध्यविषयत्वेनाप्रतिबंधकत्वात्। अत एव हेत्वाभासत्व
ज्ञानमपि नानुमितिप्रतिबंधकं। विरोध्यविषयत्वात्। तज्ज्ञानेन व्याप्तिव्यतिरेकत्वादिसंदेहापादने तस्यैव प्रतिबं
धकत्वमिति भावः। एतेन पक्षवृत्तित्वे सतीति। अत्र विरुद्धान्यत्वमपि [illegible]ति विशेषणं। तथा च विरुद्धान्यस्य पक्षवृत्ते
र्येनुमितिविरोधी अनुमितिपरं परा विरोधीकरणविघटक इति यावत्। तेन साधारण्यादिकं लभ्यते तत्क
प्रबंधाव्याप्तिर्विद्यमानत्वसंबंधकत्वमित्यर्थः। एतेन स्वरूपासिद्धसंकीर्णव्यतिचारिण्यव्याप्तिः। विरुद्धेऽचातिव्या १७७

प्तिः। विरुद्धान्यत्वविशेषणे विरुद्धसंकीर्णासाधारणाव्याप्तिः। बाधितत्वसत्प्रतिपक्षितत्वयोरप्यनुमितिविरोधि
त्वात् बाधसत्प्रतिपक्षयोरतिव्याप्तिः। कादाचित्कसंबंधमादायासाधारणोज्जीर्णसद्धेतावतिव्याप्तिरित्येतानि दूष
णानि निरस्तानि वेदितव्यानि। स्वरूपासिद्धसंकीर्णेऽपि साधारणत्वादेस्तादृशस्य संभवादन्यथाऽलक्ष्यत्वात्। विरुद्धा
न्यस्येति विशेषणाद्विरुद्धेनातिव्याप्तिः। विरुद्धान्यस्य पक्षवृत्तेरनुमितिविरोधिसपक्षविपक्षव्यावृत्तत्वं तस्य विरुद्ध
संकीर्णासाधारणेऽपि सत्त्वान्नाव्याप्तिः। बाधितत्वसत्प्रतिपक्षितत्वयोरनुमितिपरं पराविरोधित्वाभावान्नातिव्याप्तिः।
व त्र्या व्याप्तिपदमहिम्ना संबंधस्य विद्यमानत्वलाभात् सद्धेतावसाधारणोज्जीर्णेऽतिव्याप्तिवारणात् नानुव्यर्थ
विशेषणे नीलधूमादौ विरुद्धान्यपक्षवृत्तेरनुमितिविरोधिव्याप्यत्वासिद्धत्वं तत्संबंधस्य तत्र विद्यमानत्वादिति

वि॰अ॰स॰ व्याप्तिरिति चेत् । न । व्यर्थविशेषणान्यस्येत्यस्यापि विशेषणीयत्वात् । अनुमितिविरोधित्वं चानुमितिप्रतिबं
१७८ ना धकज्ञानविषयतावच्छेदकत्वमतो ज्ञानरूपासिद्ध्यादावतिप्रसंग इति । विरुद्धोपाति । नचैवं विरुद्धान्यस्येति
विशेषणं व्यर्थमिति वाच्यम् । अनेन रूपेणोपन्निधानादुक्तरूपत्रयान्यतमवत एव विरुद्धस्य लक्ष्यत्वात् । तथा च
178 सपक्षविपक्षव्यावृत्त्यादिज्ञानदशायामेव विरुद्धस्यासाधारणत्वेन संग्राह्यत्वं न तु विरुद्धत्वेन निश्चयदशायामु
क्तरूपत्रयाभावात् । तथा च तद्दातद्यावच्छेनाय सार्थकमेव तदिति । साध्याव्याप्यत्वे सतीति । साध्यव्याप्यत्वसाध्याभा
वव्याप्यत्वोभयनिश्चयविरोधिहेत्वाभासतोपाधिमत्त्वं साध्यवन्मात्रवृत्तित्वनिश्चयसाध्याभाववन्मात्रवृत्ति
त्वनिश्चयविरोधिहेत्वाभासतोपाधित्वं वेत्यर्थः । प्रथममिति । सव्यभिचारित्वादिग्रहं विना हेत्वाभासत्वाग्रहादि १७८

त्यर्थः। यद्यपि तदग्रहे पित्रादिना हेत्वाभासत्वं ग्रहीतुं शक्यत एव तथापि स न सार्वत्रिक इत्यर्थः। यथाश्रुते सद्धे
तावसाधारणोः व्याप्तिरिति यथोक्तस्याव्ययं वाव्यत्वेः व्याप्तित्वं केवलास्ति· सपक्षविपक्षव्यावृत्तत्वरूपहेत्वा
भासत्वोपाधेरनुत्पन्ननिश्चयविरोधिनस्तत्रापि सत्वादित्यपरितोषादाह कश्चिदिति। नापीति। अयोगोलकादि
सपक्षव्यावृत्तत्वं धूमादावपीत्यत उक्तं सर्वेति सपक्षविशेषणं। नापि पक्षवृत्तित्व इति। विरुद्धान्यपक्षवृत्तेर्यद
नुमित्योपयिकव्याप्त्यादिसंबंधशून्यत्वं तद्वत्त्वमित्यर्थः। तेन न स्वरूपासिद्ध्यादिसंकीर्णा व्याप्तिः। अनुमित्यौप
यिकत्वं तु अनुमितिकारणलिंगपरामर्शविषयतावच्छेदकत्वमतोः बाधितत्वासत्प्रतिपक्षितत्वरूपानु
त मित्योपयिकसंबंधशून्यत्वान्न बाधसत्प्रतिपक्षयोः प्रसंगः। न च विरुद्धस्य स्वरूपासिद्धेर्वातिव्याप्तिः। स्वरूप

चिं॰अ॰न॰ सिद्धेरनुमित्यौपयिकसंबंधशून्यत्वं पक्षधर्मताशून्यत्वं विरुद्धत्वसहचरितत्वशून्यत्वं। न चैतदुभयं विरुद्धान्यप
१७९ ते। क्षवृत्तौ पूर्ववर्त्तेः प्रथमस्य पक्षधर्मे द्वितीयस्य विरुद्ध एव वर्त्तेरिति। उत्तरयेति। ननु शब्दोऽनित्यः शब्दत्वादित्यादौ श
ब्दादिना व्याप्तिग्रहदशायामिदमतिव्याप्तमिति चेत्। न। तद्व्याप्तिनिश्चयस्य पक्षीयसाध्यगोचरतानियमेन
179 तदा पक्षस्यैव सपक्षतया सकलसपक्षविपक्षव्यावृत्तत्वरूपोऽन्वयकोट्युपस्थापकतावच्छेदकरूपवत्त्वस्य तत्रा
भावात्। विशेषादर्शनसहितस्यैव तस्यान्वयकोट्युपस्थापकतावच्छेदकत्वेन विवक्षितत्वादिति। ननु केवलान्व
यिसाध्यकानुपसंहारिण्यव्याप्तिस्तत्र साध्याभावकोटेरप्रसिद्धेरिति चेत्। न। तस्यालक्ष्यत्वात्। व्याप्तिनिश्चयवि
रोधिसंदेहजनककोट्युपस्थितेर्विवक्षितत्वाच्च। तादृशश्च साध्यतदभावसंशयः साध्ये पक्षवृत्तित्वसंशय १७९

स्वभवतीति भावः। अथ यथायमिच्छावान् ज्ञानवत्त्वादित्यत्र प्रामाण्याप्रामाण्यरूपोन्नयकोपस्थितिजनकता
वच्छेदकज्ञानत्ववति सद्धेतौ ज्ञानेऽतिव्याप्तिरिति चेत् नालिंगनिष्ठतया यज्ज्ञानमुन्नयकोपस्थितिजनकं तद्वत्त्वस्य
तादृशावच्छेदकरूपवत्त्वेन विवक्षितत्वात् ज्ञानत्वं तु प्रामाण्यसंशयविषयानुमितिवृत्तित्वेन ज्ञातं तथा। पर्वतो
वह्निमान् धूमादित्याद्यनुमितिवृत्तितया ज्ञातस्यापि ज्ञानत्वस्य वह्नितदभावसंशयजनकप्रामाण्याप्रामाण्यसं
शयात्मकोन्नयकोपस्थापकत्वात्। अन्यथा धूमवृत्तितया तस्याज्ञानात्तथात्वं तस्य न स्यादिति। प्रामाण्यविशे
षणकसाध्यतदभावकोपस्थापकतावच्छेदकरूपवत्त्वे वा तात्पर्यमतो न ज्ञानत्वेऽतिव्याप्तिः। विरुद्धान्यपद
वृत्तित्वे सतीति। एतच्च हृदयंपद वृत्तित्वे सतीत्यादि पूर्वपदलक्षणव्याख्यानेनैव व्याख्यातमिति बोध्यम्। लक्षणा

चिं॰ अ॰ न॰
१९॰
180

नुरोधेनेति। यद्विषयत्वेन ज्ञानस्यानुमितिप्रतिबंधकत्वमिति लक्षणानुरोधेनेत्यर्थः। साध्यवन्मात्रेति। ननु सद्धे
तुसंकीर्णविरुद्धसंकीर्णयोरसाधारणोऽव्याप्तिः। प्रथमस्य साध्यवन्मात्रवृत्तित्वात्। द्वितीयस्य साध्याभाववन्मा
त्रवृत्तित्वाभावात्। न च साध्यवत्पदं निश्चितसाध्यवत्परं साध्याभाववत्पदं च निश्चितसाध्याभाववत्परं। अनुपसंहार्य
व्याप्तेः। सद्धेतुनाद्यायां धूमेऽतिव्याप्तेश्च। प्रथमे निश्चितसाध्यवतोऽप्रसिद्धेः। प्रमेयमात्रस्यैव पक्षत्वेन संदिग्ध
साध्यकत्वात्। द्वितीयेऽनिश्चितसाध्यवत्यपि पर्वते धूमस्य वृत्तेः। अत एव तदुभयपदं पक्षातिरिक्ततदुभयपरम
पि। नान च साध्यवन्मात्रवृत्तित्वेनानिश्चितत्वे सति साध्याभाववन्मात्रवृत्तित्वेनानिश्चितत्वं तत्त्वं हेत्वाभासत्वेन विरो
धात्। पक्षाद् ज्ञायमाने धूमे व्यतिरेकव्याप्तिमत्तया ज्ञायमाने वा न तत्रातिव्याप्तिरिति वाच्यं। व्यतिरेकव्याप्तिमत्तया गृह्य १९॰

मारोहत्वंतरेणासत्वनिपद्धिते धूमे तथाप्यतिव्याप्तेः। ऊलक्ष्दादोपन्हेस्वरूपासिद्ध्योर्न हेत्वाभासेऽज्ञायमा
नेधूमेऽतिव्याप्तेश्च। असाधारण्याभावकालावच्छिन्नसाध्यव्याप्तत्वाभाववत्वे सति तत्कालावच्छिन्नविरुद्धत्वा
भाववत्वमुक्तलक्षणार्थो विवक्षितः। साध्यव्याप्तेर्विरुद्धेत्वासाधारणत्वदन्नार्थो न तदभावकालावच्छिन्नत्वविरहा
न्नाव्याप्तिरिति चेत्‌। न। असाधारण्यं हि तत्पुरुषीयं तत्साध्यीयं यत्किंचित्पुरुषीयं यत्किंचित्साध्यीयं वात्र विवक्षितं।
आद्ये यं साध्यविशेषमादाय यस्य पुरुषीयासाधारण्यं कदापि नावतीर्णं तत्साध्यकसाधारणानैकांतिकेऽप्र
मेयत्वादावव्याप्तेर्वङ्गलेपत्वात्‌। न च तत्पुरुषं प्रति साधारणत्वाभावेऽपि पुरुषांतरं प्रति तस्या तद्दतिवाच्यम्‌। अंत
स्यानित्यदोषत्वात्‌। यत्साध्यकासाधारण्यं कस्यापि नावतीर्णं तत्साध्यकसाधारणे सर्वथैवाव्याप्तेः। अंत्ये यत्

वि·अ·प·
२८१
181

किंचित्पुरुषीयं यत्किंचित्साध्यकासाधारण्यदशायां तदेवासाधारण्यमादाय विशिष्टाभावमत्वेन संदे
ह्यदशायां शाब्दव्याप्त्यादावतिव्याप्तेः। अथोच्यतां साध्यवन्मात्रवृत्तित्वसाध्याभाववन्मात्रवृत्तित्वरूपोभयनि
श्चयविरोधिहेतुतावच्छेदकोपाधिमत्त्वमत्र विवक्षितं। तादृशोपाधिः सपक्षविपक्षगामित्वमनुपसंहारित्वम
साधारणत्वं च। यद्यपि असाधारणस्य सत्प्रतिपक्षोत्थापकतया दूषणत्वपक्षे व्याप्तिनिश्चयविरोधित्वं नास्ति
तथापि साध्यवन्मात्रवृत्तित्वादिनिश्चयविरोधित्वमस्त्येव। व्यतिरेकव्याप्तिपुरस्कारेण तस्य सत्प्रतिपक्षोत्थाप
कत्वात्। केवलान्वयिसाध्यकोऽनुपसंहारी संज्ञाद्युपपवनास्मिन्पक्षे इति न तत्राव्याप्तिः। न संज्ञायुतापदे तु सा
ध्यवन्मात्रवृत्तित्वनिश्चयपदेन साध्यनिष्ठहेतुसमानाधिकरणात्यंताभावाप्रतियोगित्वनिश्चयः। साध्याभा २८१

व्यापका

ववन्माचवृत्तित्वनिश्चयव्यपदेनसाध्यनिष्ठहेतुसामानाधिकरण्यं तत्राभावाप्रतियोगित्वनिश्चयश्च विवक्षित
इति ध्येयम्॥ केचित्तु॥ केवलान्वयिसाध्यकोनुपसंहारीसद्धेतुः साधारणो विरुद्धसंकीर्णोऽसाधारणश्चयन्मते
नसंग्राह्यस्तन्मतेनेदं लक्षणं। वृत्तिमत्वेन विशेषणान्नावृत्तावतिप्रसंग इत्याहुः। ननु विरुद्धोप्यनेन रूपेण सा
धारण एवेति ग्रंथकृतात्रेत्यभिधानादुक्तलक्षणानां तत्राव्याप्तिरिति चेन्न। न हि विरुद्धोपि साधारणो नैका
न्तिक इति तद्दोषोपि तु साधारणो यो दूषणत्वोपाधिः स तत्राप्यस्तीति विरुद्धस्यापि तद्धत्वेन ज्ञायमानस्यानुमिति
प्रतिबंधकत्वमिति। साधारणविनाशकश्चोपाधिः सपक्षविपक्षगामित्वमिति न तस्य साधारणत्वं। किंतु सर्व
दा विरुद्धत्वमेव। कदाचिद्विरुद्धत्वप्रयोजकोपाधिमत्तया ज्ञातस्यानुमितिप्रतिबंधकत्वं। कदाचित्तु साधारण

वि॰ अ॰ म॰ १८२ 182 त्वप्रयोजकविपक्षगामित्ववत्त्रयेति। न च विपक्षगामित्वमेवसाधारणविनाशकमुपाधिः स्याच्चियतां तथात्वा
न्नेनरूपेणासोपि साधारण एवं तन्नवत्त्विति वाच्यम्। स्वतंत्रस्य महर्षेर्नियोगपर्यनुयोगानर्हत्वात्। अन्यथासा
धारणत्वप्रतिबंधकत्वेन बाधप्रतिरोधयोरप्येकत्वापत्तिः। वयंतु एतल्लक्षणप्रणयनं संप्रदायमतेन। स्वयं तन्मते
तु विरुद्धस्यापि संग्राह्यत्वे साध्यवन्मात्रवृत्तित्वनिश्चयविरोधिहेत्वाभासत्वोपाधिमत्त्वं त्रितयसाधारणं लक्षणं द्र
ष्टव्यमिति पश्यामः। न चैवं विरुद्धस्याप्यत्रैवान्तर्भावे विभागव्याघातः उपधेयसंकरेप्युपाधेरसंकरात्। अन्यथा त
स्यासिद्धान्तर्भूतत्वेनोक्तदोषापत्तिः। केचित्तु साध्यव्याप्यत्वेनाप्रमीयमाणत्वे सति बाधासिद्ध्यतिरिक्तहेत्वाभासता
प्रयोजकधर्मयोगित्वं त्रितयसाधारणं लक्षणं बोद्धव्यम्। असाधारणत्वं च न सपक्षविपक्षान्यतरयद्वृत्तिपरामृतदन्त १८२

र्तत्त्वप्रसंगात् । दूषकताबीजस्यैकत्वात् । तथा च सद्धेतावसाधारणेनाव्याप्तिरित्यपि वदंति । तन्नेति । तेनासा
धारणस्य साध्यतदभावनिरूपितव्यतिरेकव्याप्तिद्वयग्रहपुरस्कारेण साध्यतदभावोभयव्यापकतया दूषण
त्वपक्षेनाव्याप्तिरित्यर्थः । प्रथमलक्षणे तु तन्मते तस्मिन्नव्याप्तिरेव । तत्र संप्रदायविरोधिन्नत व्याप्तिग्रहवि
रहदशायां विशिष्टस्यैव सपक्षविपक्षव्यावृत्तत्वस्यानयकोपस्थापकतावच्छेदकत्वेन संग्राह्यत्वादिति
भाव इति केचित् । तन्नैवमिति । यद्यपि बाधस्य साध्याभावरूपत्वं न तु तज्ज्ञापकत्वं तथापि प्रमितसाध्याभा
ववत्पक्षवाच्यरूपस्य बाधस्य ग्रंथकृद्दर्शितमततया तस्य लिंगतया साध्याभावज्ञापकत्वादिति भावः । इदं
चोपलक्षणं । विरुद्धस्यापि साध्याभावज्ञापकत्वेन तद्दर्शनीयत्वापत्तेरित्यपि द्रष्टव्यं । ननु तयोः संग्राह्यत्वा
त्वे

वि॰अ॰न॰
१८३
183

व्याप्य

दोषइत्याशयेनाह-संयोगादीति। अत एवेति। अन्योन्याभावस्याप्यवृत्तित्वादुक्तातिव्याप्तिरेवेत्यर्थः। यत्रा
अनुपसंहार्यतिव्याप्तेरेवेत्यर्थः। अत एवाग्रेतद्व्यावृत्तं लक्षणमाह नापीति। निश्चितसाध्यवद्वृत्तित्वे सति सा
ध्यवदन्यवृत्तित्वमित्यर्थः। ननु निश्चितसाध्यवदन्यवृत्तित्वं-तादृशपक्षवृत्तित्वेन धूमादावतिव्याप्यापत्तेरिति।
अत एवेति। अमुके साध्यवदन्यस्मिन्नयं हेतुरित्येवो ज्ञातव्य इत्यर्थः। नापीति। पूर्वं विपक्षत्वमन्योन्याभावगर्भ
मग्रे त्वं ताभावगर्भमुक्तमिति न पौनरुक्त्यं। सपक्षपदं चात्र निश्चयाघटितमतो वा न पौनरुक्त्यमूलं न च व्यर्थविशेष
णता पक्षान्यपदस्यैव्यर्थतानेत्यर्थः। सर्वेति। यत्किंचित्साध्यवदन्यवृत्तित्वं धूमादावपीत्यत उक्तं सर्वेति साध्यावद्वि
शेषणम्-ननु साध्यविशेषणं तद्धेतोरप्रसिद्धेः। सामान्याभावस्याविवक्षायामिदं। तद्विवक्षायां तु व्यर्थविशेषणत्व १८३

मेवऽष्टव्यम्। एकव्यक्तिकेति। एका व्यक्तिराश्रयरूपा यस्य साध्यस्य तदेकव्यक्तिकं साध्यं। तथा चानेकव्यक्तिसद्
पदार्थासंभवस्तत्रेत्यर्थः। विपक्षवृत्तित्वमिति। ननु विपक्षत्वं निश्चितसाध्याभाववत्त्वं। साध्याभाववत्त्वं वा। नाद्यः।
असाधारणवदनित्यदोषतापत्तेः। न द्वितीयः। तन्निश्चयत्वेन प्रतिबंधकत्वे संदिग्धानैकांतिकोच्छेदापत्तेः। त
ज्ज्ञानत्वेन प्रतिबंधकत्वे च पक्षीयव्यभिचारसंशयस्यापि तत्त्वेनानुमितिमात्रोच्छेदप्रसंगात्। न च साध्याभावांश
निश्चयात्मततज्ज्ञानत्वेन प्रतिबंधकत्वमिति वाच्यम्· साध्यांशनिश्चयात्मतज्ज्ञानत्वेन प्रतिबंधकत्वे साधारणस्या
पि नित्यदोषतापत्तेः। अपि च· स श्यामो मित्रातनयत्वादित्यत्र पक्षातिरिक्ते मित्रातनये सर्वत्र श्यामत्वनिश्चयदशा
यां शाकपाकजत्वेनोपाधितया संदिग्धेन व्यभिचारसंदेहापादनं पक्ष एव कर्त्तव्यं। अन्यत्र विशेषदर्शनात्तथा

वसाध्याभावांशानिश्चयात्मकतयाभावाव्यभिचारसंदेहस्तत्रप्रतिबंधकोनस्यात्तान्नचैवमेवेतिवाच्यम्।तत्रो
पाधिसंदेहानुत्थापनप्रसंगात्।अपसिद्धान्ताच्च।क्षितिर्हिकर्तृकाकार्य्यत्वादित्यादावप्रयोजकत्वाहितसाध्या
भावांशसंशयात्मकतपक्षीयव्यभिचारसंदेहप्रतिबंधकत्वस्यसर्वसिद्धत्वात्।किंच।साध्याभावेप्रतियोगित्वेव्यधि
करणावच्छेद्योऽयमेतत्कपिसंयोगीएतत्त्वादित्यत्रसद्धेतावतिव्याप्तिः।तत्प्रवेशेचसाध्याधिकरणवृत्तिभिन्नाधिकरण
वृत्तिसाध्याभावसामानाधिकरण्यमितिफलितार्थः।तथाचसाध्याधिकरणवृत्तिभिन्नाधिकरणवृत्तित्वज्ञानमेवप्रति
बंधकत्वमस्तुलाघवात्।किंवासाध्यवदन्यवृत्तित्वज्ञानस्यावश्यंप्रतिबंधकत्वादन्यानन्तर्भूतत्वादाधिक्यं।एवंच
साध्यनिष्ठहेतुसमानाधिकरणात्यन्ताभावप्रतियोगित्वज्ञानस्यहेतुनिष्ठसाध्यवन्मात्रवृत्तित्वभिन्नत्वज्ञानस्यहेतु १८४

निष्ठसाध्यसंबंधाभावसामानाधिकरण्यज्ञानस्य साध्यवन्निष्ठहेतुसमानाधिकरणान्योन्याभावप्रतियो
गित्वज्ञानादेश्च प्रतिबंधकत्वादधिकं॥ मैवं। विपक्षत्वं हि साध्याभाववत्त्वमेवं न तु निश्चयगर्भमतो नानि
त्यदोषता तद्वृत्तित्वनिश्चयस्य सर्वदानुमितिप्रतिबंधकः यन्निश्चीयमानमनुमितिप्रतिबंधकं नवत्वेवतस्यै
वनित्यदोषत्वं। असाधारणे तु शब्दत्वादौ पक्षे साध्यसंशयदशायां सपक्षविपक्षव्यावृत्तत्वनिश्चयो घटपद्य
घनित्यव्योमादिनित्यव्यावृत्तत्वनिश्चयपर्यवसन्न एव प्रतिबंधकः पक्षे साध्यनिश्चयदशायां घटादिव्योमादिव्या
वृत्तत्वनिश्चयो विद्यमानोप्यकिंचित्कर एवानहितत्वेन प्रतिबंधकत्वं तस्य· किंतु सकलसपक्षविपक्षव्यावृत्तत्वनि
श्चयत्वेन· तथा च तदा पक्षस्यापि सपक्षत्वेन तन्निश्चयत्वं तत्र नास्तीति न प्रतिबंधकत्वमिति तस्यानित्यदोषता। प्रति

वि॰अ॰न॰ १८५ 185

बंधकतावव्यभिचारज्ञानत्वेनैव। न चानुमितिमात्रोच्छेदः। तर्कविशेषदर्शनादिना संशयोच्छेदेऽनुमानप्रवृत्तेः।
यद्वा हेतुमत्तयानिश्चिते उपाधिसंदेहाघनाहितो यो व्यभिचारसंशयस्तदतिरिक्तव्यभिचारज्ञानत्वेन प्रतिबंध
कत्वं। वस्तुतस्तु व्यभिचारनिश्चयत्वसंशयत्वयोः एकं न प्रतिबंधकतावच्छेदकं। तन्निश्चयस्याव्यभिचाररूपग्राह्याभा
वनिश्चयत्वेनैव प्रतिबंधकत्वात्। तन्निश्चयस्य तेनैव रूपेणान्यत्र प्रतिबंधकत्वकल्पनात्। ग्राह्यसंशयस्य चान्य
त्राप्रतिबंधकत्वादनन्यगत्या तादृशस्यापि तस्य व्यभिचारसंशयत्वेनैव प्रतिबंधकत्वं कल्प्यते। न च पक्षीयसाध्य
फल संदेहे तथाप्यतिप्रसंग इति वाच्यम्। प्रतिबंधकाननुगमस्यादोषतया बलेन तत्र संदेहत्वेनैव प्रतिबंधकताक
ल्पनात्। निश्चितहेतुमति उपाधिसंदेहाघनाहितसाध्यव्यभिचारसंशयातिरिक्तव्यभिचारसंशयत्वेनैवेति १८५

नकिंचिदनुपपन्नं।अतएवव्यभिचारसंशयत्वेनैवतदुद्भावनमपीति।साध्याभावेवप्रतियोगिवैय्यधिकरण्यंदे
यमेवानवगोरवंतज्ज्ञानेहेतौसाध्याधिकरणभिन्नाधिकरणवृत्तित्वानवगाहनात्।विरोधिविषयतयागुरुवि
षयकस्यापितस्यप्रतिबंधकत्वात्।नचसाध्यवदन्यवृत्तित्वादिज्ञानानामपिप्रतिबंधकत्वाद्धिकां।अत्यंताभा
वगर्भव्याप्तिप्रत्यक्षेऽन्योन्याभावगर्भव्यभिचारज्ञानस्याप्रतिबंधकत्वात्।अन्योन्याभावगर्भव्याप्तिप्रत्यक्षेचतद्गर्भ
व्यभिचारज्ञानस्याप्रतिबंधकत्वात्।प्रतिबंधकत्वेवाऽव्यभिचारज्ञानप्रतिबंधकज्ञानविषयतावच्छेदकत्वेनव्या
प्तिज्ञानकारणीभूतमहत्त्वारंभकहससहकार्यभावप्रतियोगिज्ञानविषयतावच्छेदकरूपत्वेनवासर्वेषामेकोक्तप
साधारणत्वेनविरजनात्।साध्यसंबंधस्यापिग्राह्यतयातत्संबंधाभावसामानाधिकरण्यस्यावश्यंविरोधितया

वि॰अ॰र॰
१८६
186

तत्संग्रहार्थमुक्तोपाधेरवश्यमनुसरणीयत्वात्। विरुद्धस्यापि साधारणत्वेन संग्राह्यत्वे उक्तोपाधिमत्त्वमेव
तत्संग्राहकं। तदसंग्राह्यत्वे सपक्षगामित्वसहचरितै तदुपाधिमत्त्वमेव तदिति सर्वमवदातं। तत्त्वाज्ञान इति।
यद्यपि तत्त्वेनज्ञानदशायामपि साधारणत्वमस्त्येव तस्यानित्यदोषत्वात्तथापि तदा तन्नोद्भाव्यते। किन्तु विरु
द्धत्वमेवेति भावः। एतत्संग्राहकं च सामान्यलक्षणं प्रागेव दर्शितमिति विशेषलक्षणसंग्रहात्तस्य सामान्य
लक्षणेनासंग्रहेण न दोषः। यदा तु दूषणोपाधिमात्रस्यैव सांकर्यं तदा दोषशंकापि नास्तीति। सर्वत्र निश्चि
तसाध्यवदिति। अत्र सर्वत्रेति निश्चितसाध्यवद्विपक्षयोरुभयोर्विशेषणं तेन सन्दिग्धधर्मादिविरुद्धयोर्नाति
व्याप्तिः। ननु शब्दे यदा नित्यत्वनिश्चयो नास्ति। शब्दत्वे वा तदा वाक्यादेरनित्यत्वप्रतियोगिकव्यतिरेकव्याप्ति १८६

मात्रग्रहस्तदा तत्राव्याप्तिरिति चेत्। नासंशयविरोधिविशेषदर्शनविरहकालीनस्य सर्वसपक्षविपक्षव्या
वृत्तत्वस्य विवक्षितत्वात्। हेत्वाभासत्वेन विशेषणान्न तत्रातिव्याप्तिरिति तु न वाच्यम्। पक्षान्तरे शब्दत्वस्य स्व
रूपासिद्धतया हेत्वाभासत्वेन दोषतादवस्थ्यात्। शब्दत्वानित्यत्वेति। तथा च तदा सपक्षव्यावृत्तत्वमपि ना
स्त्यतोपि नातिव्याप्तिरिति भावः। अन्यथेति। संदिग्धसाध्यधर्मा धर्मी पक्ष इदमतमालंब्येदमुक्तं। व्याप्तिग्राह
कमिति। नन्वेवं व्याप्तिग्राहकसहचारग्रहविघटकतया स्वतोदूषकत्वादुपाधिवद्धेत्वाभासत्वं न स्यादिति चेन्ना
पूर्वपक्षिणास्तस्येष्टत्वादिति भावः। तदुपजीव्यमिति। सपक्षव्यावृत्तत्वेनैवोदाहरणाभावात्। अन्यथा तदाहर
णमपि कुर्यादेवेत्यर्थः। असाधारणेति। अप्रतिज्ञादिनापि तूदाहरणाप्रयोगसंभवादिति भावः। व्यतिरेकि

वि॰ अ॰ त॰
१८७
187

प्रयोगे संपूर्णा इति शेषः। तथा च तत्र न्यूनत्वादिदमेवोक्तं व्याप्यमिति भावः। ननु किंचित्करत्वादिति। पूर्वः। तथा च त भावा
त्र न्यूनत्वाभावाभावात् तत्र सहचारज्ञानविघटनद्वारापि व्याप्तिग्रहप्रतिबंधकत्वादिति भावः। स्वार्थानुमान इति।
तथा चोन्नयव्यावृत्तत्वस्य ज्ञानेपि न दूषकत्वमिति भावः। अर्थादर्थापत्तिर्न इति परमते। व्यतिरेकितयेति स्व
मते। साध्यतदभावोल्लापकतयेति। साध्यतदभावानुमित्यनुकूलव्यतिरेकव्याप्तिद्वयसहितपक्षधर्म
ताज्ञानविषयतयेत्यर्थः। नन्वेवं सत्प्रतिपक्षे साधारण्याभावजं न क्वापि स्यात्। तेनापि सत्प्रतिपक्षितत्वस्यैव कर
णादिति वाच्यम्॰ तत्र तदनुभावनस्यैवेष्टत्वादिति सांप्रदायिकाः। अत्र वदन्ति। योऽनित्यत्वाभाववान् सत्त्वा
त्त्वाभाववानिति व्यतिरेकव्याप्तिग्रहे शब्दत्वाभावरूपव्यापकाभावरूपस्य शब्दत्वस्य शब्दे निश्चयोऽनि १८७

त्वस्वाभावरूपस्य तु व्याप्यस्य तत्र संशयइतिसंदिग्धानैकान्तिकस्य प्रतिबंधकत्वान्न व्याप्तिग्रह इति न
सत्प्रतिपक्षत्वं। न चानुमानमात्रोच्छेदकतया पक्षीयो व्यभिचारसंशयो न दोष इति वाच्यं। तावता व्याप्य
वत्तया निश्चिते व्यापकसंशयस्यैवादोषत्वात्। व्यापकाभाववत्तया निश्चिते व्याप्यसंशयस्य प्रतिबंधक
त्वेन कस्यापि विप्रतिपत्तेः। न चैवं व्यतिरेकिमात्रविलयापत्तिः। सर्वत्र व्यापकहेत्वभावाभावरूपहेतुमत्त्व
या निश्चिते पक्षे साध्याभावरूपव्याप्यसंशयेन संदिग्धानैकान्तिकत्वादिति वाच्यम्। अत्र तर्कादिना पक्षीय
स साध्यसंदेहमुदास्त्वेव तत्संभवात्। यस्य व्यतिरेकिणः प्रसिद्धमेव साध्यं सिध्यति तन्मते वा तत्संभवात्।
चापि न चापरस्परविरुद्धतादृशातर्कावतारः संभवति। एककोटिकतर्कावतारकाले विशेषदर्शनादसाध्या

वि·अ·म·
१८८
188

रण्यगंथोपिनास्तिकुतो व्यतिरेकव्याप्तिग्रहपुरस्कारेण सत्प्रतिपक्षत्वं। अत एव पक्षतादशायां साध्य
तदभावानिश्चयेन तस्य दोषत्वमित्यनंतरमेवोक्तवान् ग्रंथकारः। किंचैवं दूषकताबीजभेदस्य हेत्वाभा
सभेदप्रयोजकत्वादन्वयवतदभावात् सत्प्रतिपक्षभेदो न स्यात्। हेतुभेदाभेदमात्रस्याप्रयोजकत्वात्। तानाव
तासत्प्रतिपक्षविशेषत्वापत्तेश्च। नयोन्यपरामर्शविषयतापन्नं प्रतिसाधनं सत्प्रतिपक्षः। सपक्षविपक्ष
व्यावृत्तत्वं वज्ञायमानं तद्भिन्नमेव प्रतिबंधकं· तद्ज्ञानस्य व्यतिरेकोन्वयसहचाररूपतया विरोधिपराम ग्रह
र्षोत्थापकत्वादिति वाच्यं· एवं व्याप्तिचारोत्थापकोपाधिवत्परमुखनिरीक्षकतया हेत्वाभासतैव न स्यात्·
कान्तर्भावबहिर्भावचिन्ता। किं वा च नियमतः साध्यव्यापकाभावप्रतियोगित्वग्रहे विरुद्धान्तर्भावापत्तिः॥ १८८

वृत्तित्वनियमेनोभयव्यावृत्तत्वमेकत्र ग्रहीतुमशक्यमेव। वृत्तिमत्त्वेनान्यतराधिकरणवृत्ति

अपि च वृत्तिमतो धर्म्मस्यान्यतरत्वनिश्चयेनोभयाधिकरणवृत्तेर्ग्राह्यविरहरूपतया प्रतीतेः सपक्षविप
क्षव्यावृत्तत्वस्य च ज्ञानमेकत्रैकदा न विरुद्धं तृतीयकोटेः पक्षस्यापि सत्त्वेन विरोधाभावात् विरुद्धोभयव्याप्ति
ग्रहस्य च पक्षान्तर्भावेन विरोधस्यावश्यकत्वात् असत्प्रतिपक्षे वासाधारण्यं नोपलभ्येत। सत्प्रतिपक्षान्तरवत्
न चेष्टापत्तिः कणपकसंप्रदायविरोधात्। तस्मादुभयव्यावृत्तत्वग्रहस्योभयव्याप्तिग्रहसामग्रीत्वेन सत्प्र
तिपक्षवदुभयव्याप्तिग्रहप्रतिबंधकतयास्य दोषत्वं विरोध्यनुमितिसामग्र्या इव विरोधिव्याप्तिधीसामग्र्या
अपि प्रतिबंधकत्वाविशेषादिति। अत्र ब्रूमः। सत्प्रतिपक्षरूपतयैवास्य प्रतिबंधकत्वं न च पक्षीयव्यभिचारसंश
यान्न व्याप्तिग्रह इति वाच्यम्। व्यतिरेकिविलयापत्तेः। न च तर्कादिना संशयव्युदासे तत्संभव इति वाच्यम्। एवं हि

वि॰अ॰प॰ १८७ 189

निश्चितहेतुमतिपक्षेसाध्यसंदेहेनव्यभिचारसंदेहोपिप्रतिबंधकःस्यात्।नचानुमानमात्रोच्छेदः।तर्का
दिनातन्निवृत्तौतत्संभवात्।नचैवमेवेतिवाच्यं।अपसिद्धान्तात्।अतएवपृथिवीत्वेनतेनवतएवेतिग्रंथेनप
क्षतासंपन्नयघटादौतत्संदेहःप्रागुपपादितः।तस्मात्प्रतिबंधकत्वंफलबलकल्प्यं।तथाचान्वयिनिव्या
प्यनिश्चयेपक्षीयव्यापकसंशयोव्यतिरेकिणिचव्यापकाभावनिश्चयेपक्षीयव्याप्यसंशयोनदोषइति
फलबलात्कल्प्यते।नचसत्प्रतिपक्षाभेदः।हेतुभेदाभेदस्यैवतद्रूपहेतुत्वात्।नचैतावताविशेषणतद्वि
शेषत्वमेवेतिवाच्यम्।स्वतंत्रेच्छायानियोगपर्यनुयोगानर्हत्वात्।अन्यथासाक्षात्प्रतिबंधकत्वेनबाध
प्रतिरोधयोरप्यैक्यापत्तेः।वस्तुतःसत्प्रतिपक्षेउत्तरपक्षधर्मताविषयत्वेनपरामर्शस्यप्रतिबंधकत्वं। १८७

अन्यथान्यतरहेतोः स्वरूपासिद्धत्वग्रहेपि सत्प्रतिपक्षोपपत्तेः। अत्र चैकपदधर्मताविषयत्वेनैवेति न ता
तदंतर्भावशंकापि तदिदमुक्तं द्योतयति॥ यत्तु परमुखनिरीक्षकतयोपाधिर्न दूषणं यथा व्याप्तत्वेन दोषइ
तितत्रैव साध्यतदभावव्यापकाभावप्रतियोगित्वसहितपक्षधर्मताज्ञानमात्रस्यानुप्रतिबंधकतया त
द्विषयीभूतस्यैव हेत्वाभासत्वात्। तत्वस्यैव तल्लक्षणत्वाद्। अत एकैकत्रानुकूलतर्कावतारे नातिप्रसंगः।
न च विरुद्धांतर्भावः साध्यव्यापकाभावप्रतियोगित्वज्ञानस्य विरोधविषयतया तत्रप्रतिबंधकत्वानभ्यु
पगमादिति वक्ष्यते। न च शब्दत्वादेर्वृत्तिमत्त्वग्रहे तदभावस्य साध्यतदभावव्यापनसाध्यतदभावव्यापकत्व
ग्रह इति वाच्यम्। नहि सकलव्याप्याधिकरणे व्यापकसंबंधो व्यापकत्वं येन साध्यतदभावान्यतरवत्तिसि

वि॰अ॰न॰ कत्वाधिकरणे हेत्वभावसंबंधस्याग्रहाद्धेतोर्वह्निमत्त्वं न गृह्येत॰ किंतु व्याप्यवह्निष्ठात्यन्ताभावाप्रतियो

१८० गित्वात् तथा च नित्यत्वानित्यत्ववह्निष्ठात्यन्ताभावाप्रतियोगी शब्दत्वाभाव इति ज्ञानं न शब्दत्वे वह्निमत्त्वग्रहे

190 प्रतिबंधकं॰ ग्राह्याभावासंस्पर्शात्॰ अत एव हेतुर्वह्निमत्त्वज्ञानमपि न तज्ज्ञानप्रतिबंधकं॰ अन्यथा बाधस्या

व पि प्रतिबंधकत्वानापत्तेः साध्यव्याप्यत्वेनाज्ञातपदे व्यापकसंबंधस्यावगाहकत्वात् तदभावावगाहि बाध मान

ज्ञानस्यानुदयात्॰ तस्माच्छब्दो व्याप्यवत्तया निश्चिते पदे बाधरूपव्यापकाभावनिश्चयस्तथा व्याप्यवत्तानि

न्यतर त्यत्वानित्यत्वाँवत्तया निश्चिते पि शब्दे व्यापकाभावतच्छब्दत्वाभावाभावरूपस्य शब्दत्वस्य निश्चय इति न किंचि

दनुपपन्नं॰ यदि च भिन्नप्रकारकत्वात् न तस्य प्रतिबंधकत्वं तदा प्रकृतेपि तुल्यम्॰ असत्प्रतिपक्षे चैतदुत्तावन १८०

मतिष्टमेवं नचैवं कथकसंप्रदायविरोधः तस्य संदिग्धत्वात्· यद्वोक्तं तस्माद्धूमयव्यावृत्तस्यैवेत्यादिना त्वग्रह·
दर्पितविन्यासं सपक्षविपक्षव्यावृत्तिरित्यादिज्ञानेपेकालेपिशब्दादिना व्याप्तिग्रहादनुमित्युपत्तेरनुभवसि
द्धत्वात्· किंचोक्तयव्यावृत्तत्वग्रहस्योक्तयसहचारग्रहमात्रतया नोक्तयव्याप्तिग्रहसामग्रीत्वं· येन विरो
धिसामग्रीत्वेन प्रतिबंधकत्वं स्यात् किंत्वनुकूलतर्कादिसहितस्य तथात्वं अत एवैकचानुकूलतर्कावतारे
नासाध्यारणं· नहीतरसामग्रीसहितस्यापियज्ज्ञानस्य विरोधिसामग्रीत्वेनानुमितिप्रतिबंधकत्वं तस्यापि
हेत्वाभासत्वमतिमतं तथा वसतीतरसामग्रीसमवहितोपाधिज्ञानस्य व्यभिचारज्ञानसामग्रीत्वेन प्रतिबंधक
तया तस्य हेत्वाभासत्वापत्तेः तज्ज्ञानं ग्राह्याभावानवगाहीति तत्सामग्र्याअप्रतिबंधकत्वमिति यदि तदेतद्दृष्टा

वि॰ अ॰ न॰

पितुल्यम्। विरोधिसामग्रीत्वेन तत्वमुभयत्रोपपत्स्यतीति॰ बाधसामग्रीत्वेनाधिकबलोपस्थितेरपि प्रतिबंध
कत्वात्तद्विषयस्यापि हेत्वाभासांतरतापत्तिश्च परसामग्रीत्वेन प्रतिबंधकत्वमिति यदि तदेतदत्रापि तुल्यम्। कोवि
त्तु साध्यतदभावोत्थापकतया तदुभयसंशायकतयेत्यर्थः। तथा च तत्परतयैवापरोपि ग्रंथो व्याख्येय इति। तन्न।
पक्षे साध्यतदभावसंशयस्य प्रागपि सत्वात्। किं च तत्संशयस्य ग्राह्याभावविषयतया प्रतिबंधकत्वं हेतुविषय
तयाऽनैकांतिकसंशयत्वेन वा। नाद्यः। ग्राह्याभावसंशयस्य प्रमाणप्रवृत्त्यप्रतिबंधकत्वान्नांत्यः। पक्षीयसंदि
ग्धानैकांतिकस्यानुमानमात्रोच्छेदत्वेनाप्रतिबंधत्वात्। न च संदिग्धोपाध्याहितव्यभिचारसंदेहवदसाधार
णाहितोपि स प्रतिबंधक एक एवेति वाच्यम्॰ तथा सति परमुखनिरीक्षकतया तद्वदेव हेत्वाभासतानुपपत्तेः। १९१

यत्तु सपक्षविपक्षव्यावृत्तत्वे सति पक्षवृत्तित्वमसाधारण्यम्। तज्ज्ञानं साधारणसंशयसामग्रीत्वेन प्रतिबंध-
कं। यज्ज्ञानं यच्च प्रतिबंधकं तत्सामग्र्यपि तत्प्रतिबंधिकेति व्याप्तेः। न चोपाधावतिप्रसंगः। तस्य सामग्रीत्वाभावा-
दिति। तन्न। तच्छांतज्ञानस्य हि सामग्रीत्वं किमितरनिरपेक्षेण साधारणसंशयजनकत्वं। इतरकारणसहितस्य त-
दि ज्जनकत्वं वा। नाद्यः। असंभवात्। न हि कोटिस्मरणविशेषादर्शनं विनाऽ तस्य तस्य तत्संशयजनकत्वं। व्यभिचा- इतितस्य
रेण तेषामन्यत्रापि संशयाजनकत्वापत्तेः। नान्त्यः। उपाधावतिप्रसंगात्। न हीतरकारणसमवहितस्याप्युपाधि-
ज्ञानस्य न व्यभिचारज्ञानजनकत्वं। तथा सति तस्य तदजनकत्वमेव स्यात्। तथा चोपाधिरनुत्पादनमप्यनर्थकं स्या-
त्। किं चाभयव्यावृत्तत्वे सति पक्षवृत्तित्वज्ञानं साधारणसंशयमपि पक्ष एव जनयेत् न तु पक्षातिरिक्तेऽतद्व्यावृत्तत्वे

[illegible] पक्षीयव्याप्तिचारसंशयस्यैवानुमितिप्रतिबंधकत्वं ३ ततस्तत्सामग्रीत्वेन तज्ज्ञानस्या

चिं॰ अ॰ न॰ नैवहेतोर्ज्ञानेन तत्र विशेषदर्शनात् तथा च तादृशस्यैतादृशसंशयस्य तत्त्वमपि सत्त्वेन न तत्र तस्याप्रयोजकत्वाद्वे

१५२ ति संक्षेपः। यद्यपि परार्थानुमानेपि साध्यतदभावोत्थापकतयैवायं दोषस्तथापि परं प्रति विपक्षव्यावृत्तत्वांशोद

192 घत्वेन नोद्भावइत्याशयेनोक्तं स्वार्थानुमान इति दृष्टव्यम्। असाधारणेनान्वयिप्रयोगे न्यूनत्वोद्भावनमुचितं।

न त्वसाधारणस्येत्यत आह व्यतिरेकीति। एवं च यद्यपि साध्याभावप्रतियोगिकव्यतिरेकव्याप्तेरेव साध्याभावो

त्थापकत्वादुद्भावनमुचितं तथापि व्यभिचारज्ञापनायोपाधेरिव तद्व्याप्तिज्ञापनायैव तत्र सर्वसपक्षव्यावृत्तत्वस्यो

द्भावनमिति भावः। साध्येति। व्यतिरेकव्याप्तिज्ञानद्वारा साध्या[illegible]भावोत्थापकत्वादित्यर्थः। व्यर्थत्वादिति। साध्याभावो

त्थापनेऽनंगत्वादित्यर्थः। वस्तुगतिमुक्त्वा कथकसंप्रदायानुरोधादाह यद्वेति॥ लक्षणं त्विति। यद्यपि सर्वसपक्ष १५२

व्यावृत्तेपि हेतोर्यदा सवाक्यादिना साध्यतदभावान्यतरप्रतिक्षैकमात्रव्यतिरेकव्याप्तिग्रहः। यदा वा न साध्यतद योगि
भावप्रतियोगिकव्यतिरेकव्याप्तिद्वयग्रहस्तदा ऽतिव्याप्तिः। प्रथमस्य सद्धेतुत्वात् द्वितीयस्य च व्याप्तेरज्ञानादज्ञा
नरूपासिद्धिमात्रयोगितया ऽसाधारणत्वाभावाच्च यथापि साध्यतदभावप्रतियोगिकव्यतिरेकव्याप्तिद्वयवत्त्व
याज्ञायमानत्वमसाधारणस्य लक्षणमित्यत्र तात्पर्यं। असाधकतासाधनं तु तत्र सत्प्रतिपक्ष इव साध्याभावानु
मितिसामग्रीप्रतिरुद्धत्वादित्येवमेवेति न तत्रापि वैयर्थ्यशंकेति ध्येयम्। यथेति। असाधकतानुमान इति शेषः।
न विरुद्धमिति। अत्रानैकान्तिकसामान्यलक्षणायोगः पूर्ववदेव समाधेय इति ध्येयम्। सिद्ध्यसिद्धीति सपक्षवि
पक्षसिध्यसिद्धीत्यर्थः। अन्यथेति। साध्यतदभाववज्ञामियाभावे व्यतिरेकिसाध्यकस्यानैकान्तिकतापि न स्यात् तं

वि॰अ॰प्र॰ त्वानैकान्तिकसामान्यलक्षणायोगादिति भावः। व्याप्यत्वासिद्धमिति। अज्ञानरूपासिद्धमिति भावः। तथापि न
१७३ न त्वरं प्रत्युज्जीवनार्हमत आह अपार्थकमिति। अंत्यत्रा तु स्वरूपणिकत्वमाश्रित्याह साध्याप्रसिद्धाविति। नापीति
193 केवलान्वयिसाध्यके सद्धेतावतिव्याप्तेराह सत्पन्नं। शेषस्तु साधारणातिव्याप्तिवारणाय। तदर्थञ्च केवल
न्वयिधर्म्मावच्छिन्नसाध्यसिद्धिविरोधिसंदेहविषयवृत्तित्वं। साधारणश्च निश्चितसाध्याभाववद्वृत्तिरिति भावः। साध्यवन्निश्चित
विप्रतिपन्नेति। साध्याभावाप्रसिद्धावपि अभिधेयत्वं घटनिष्ठात्यंताभावप्रतियोगि न वेति संभवात्। यदि वेति।
सहचारग्रहात्पक्ष एव यत्र व्याप्तिग्रह इत्यर्थः। तत्रैवेति। यत्र सद्धेतौ पक्ष एव व्याप्तिग्रहस्तत्रैवेत्यर्थः। न च पक्षा
तिरिक्ते व्याप्तिग्रहाभावादिति भावः। दोषांतरमाह सर्वस्येति। सर्वमनित्यं मेयत्वादित्यादावित्यर्थः। ननु पक्षेति। १७३

रिक्तत्वमत्रनविवक्षितंकिंतुव्याप्तिग्रहानुकूलाप्रतीतसहचारत्वमेवेतिनोक्तदोषद्वयमित्यतआह असाधार
णेति। इष्टपकतायामिति। असाधकतायामित्यर्थः। नन्वेति। इदमसाधकमनैकांतिकत्वादित्यसाधकताऽनयो
गेऽनुपसंहारिणिव्यर्थविशेषणत्वशंकैवनास्तीतिभावः। व्यर्थगत्येति। अनैकान्तिकत्वमुभयकोट्युपस्थापक
तावच्छेदकरूपवत्त्वं। तच्चासाध्याभावकोट्युपस्थापकतावच्छेदकरूपवत्त्वमात्रस्यैवगमकत्वेविशेषणवैयर्थ्य
तत्राप्यावश्यकमितिभावः। यत्त्वनुपसंहारिणिहेतौपदर्शितेऽनैकान्तिकत्वादितिहेतुवाक्येनयोग्यतादिबला
दुक्तरूपानुपसंहारित्वरूपएवार्थोऽभिधेयः। तत्रचव्यर्थविशेषणत्वंदुःपरिहरमेवेति। तन्न। तत्रकारणोपस्थिति
विनाव्यर्थविशेषणत्वाभावात्। अन्यथाधूमवत्त्वस्यापिनीलधूमवतियोग्यताबलात्तत्परत्वेतदापत्तेः। अनैकान्ति

कत्वेन साधारणाद्यन्यतमत्वं विवक्षितं। तच्च व्यर्थविशेषणत्वमित्यप्याहुः। केवलान्वयीति। सर्वमभिधेयं मे
यत्वादित्यत्रेत्यर्थः। अत्र हेतुमाह सर्वस्येति। मात्रार्थस्य व्यवच्छेद्यस्य तत्राभावादिति भावः। यद्यपि व्यतिरेकिसा
ध्यकेऽनुपसंहारिणि अव्याप्तिर्नवत्वेऽरतथापि तस्य वस्तुतः साधारणत्वान्न तल्लक्ष्यमिष्टं परो ब्रूयादिति निः
संदिग्धामव्याप्तिं दत्तवानिति भावः। क्वचिदतिव्याप्तेरिति पाठः। तत्रायमर्थः। ननु मात्रपदं कार्त्स्न्यार्थकं वा व्यवच्छे
दार्थकं वा। आद्ये केवलान्वयीति। व्याप्यज्ञानस्य पुरुषदोषत्वात् सद्धेतौ तस्मिन्नतिव्याप्तिरित्यर्थः। अन्त्ये त्वाह
सर्वस्येति। उपलक्षणं चैतत्। असाधारणादावप्यतिव्याप्तिर्द्रष्टव्या। व्याप्तिग्रहानुकूलेति। व्याप्तिग्रहानुकूला
य एकधर्म्युपसंहारः सहचारग्रहस्तद्भावो यत्रेत्यर्थः। पक्षे सहचारसंदेहसत्वादंशतो तत्सहचारत्वमसं १९४

र्भवीत्यत आह व्याप्तिग्रहानुकूलेति। तदनुकूलत्वं च सहचारनिश्चयत्वेनेत्यर्थः। अन्यथा तत्रापि व्याप्तिधीप्रसं
गात्। ननु व्याप्तिग्रहानुकूलत्वं स्वव्याप्तिग्रहानुकूलत्वं तथा च केवलव्यतिरेकिण्यपि तादृशसाध्यसहचारानि
श्चयोस्तात्पति व्याप्तिरितिचेत्। न। व्यतिरेकसहचारस्यापि स्वव्याप्तिग्रहानुकूलत्वात्। व्यतिरेकसहचारेणा
न्वयव्याप्तिर्गृह्यत इति मतं। मतान्तरे तु व्याप्तिपदमेव स्वसाध्यसिद्ध्यनुकूलव्याप्तिपरम्। तथा च व्यतिरेकिणि
तादृशी व्यतिरेकव्याप्तिरेव भवतीति तद्ग्रहानुकूलस्य व्यतिरेकसहचारस्य सत्त्वात्तत्र प्रतीतिरस्त्येवेति नातिव्या
प्तिरिति भावः। नन्वज्ञायमानतादशायां स्वहेतावतिव्याप्तिः। न च हेत्वन्तिमतपदं हेत्वाभासपरं। जलह्रदादिपक्षे
स्वरूपासिद्धतया हेत्वाभासे तत्रैवातिव्याप्तेः। न च साध्यसहचारनिश्चयविरोधिहेत्वाभासतोपाधिमत्त्वं विवक्षित

वि॰ अ॰ न॰
१९५
195

मिति वाच्यम्। विरुद्धेपि गतत्वादिति चेत्। न। स्वसाध्यसिद्ध्यनुकूलव्याप्तिग्रहानुकूलसहचारत्वावच्छिन्ननिश्चय
विरोधिहेत्वाभासतोपाधिमत्त्वस्य विवक्षितत्वात्। विरुद्धस्य व्यतिरेकसहचारनिश्चयाविरोधित्वात्तन्नातिव्या त्व
प्तिरिति भावः। अनुपसंहारिणि तु प्रमेयमात्र एव साध्यसंदेहान्नोभयसहचारनिश्चय इति न च केवलान्वयिसा
ध्यकेऽव्याप्तिस्तत्र व्यतिरेकसहचाराभावादिति वाच्यम्। तत्रान्वयव्याप्तिमात्रस्यैव स्वसाध्यसिद्ध्यनुकूलतया त
द्ग्रहानुकूलसहचारत्वेनान्वयसहचारमात्रस्यैव लाभादिति भावः। विरुद्धत्वाज्ञानेति। यद्यपि विरुद्धत्वज्ञानद
शायामप्युक्तलक्षणसत्त्वात्तदाप्यनुपसंहारित्वमस्त्येव तथापि तदा विरुद्धत्वमेवोद्भाव्यत इतीदमुक्तम्। एतच्चान्व
यसहचारमात्रनिश्चयविरोधित्वेनानुपसंहारित्वमभ्युपेत्योक्तम्। वस्तुतो व्यतिरेकसहचारनिश्चयस्य तत्रासं १९५

मवान्नानुपसंहारित्वं तस्येति ध्येयम्। ननु तादृशसहचारग्रहाभावः कारणाभावत्वेन स्वरूपसन्नेव व्याप्तिग्रह
प्रतिबंधक इत्यनुशयादाह केवलेति। केवलान्वयिधर्मव्यापकस्य साध्यसिद्धिविरोधिसंदेहविषयवृत्ति
त्वमित्यर्थः। तेन प्रमेयत्ववत्त्व वर्त्तते न वेति संदेहाधीनपक्षताके केवलान्वयिसाध्यकेऽनुपसंहारिणा व्याप्तिः
अस्यापि संशयस्य स्वसाध्यसिद्धिविरोधित्वात्। न वा विशेषदर्शनकालेप्यनुमित्सयानुमितिसंभवान्न त्वे
वातिव्याप्तिः। तादृशसंशयाभावात्। न वा द्रव्यगुणकर्मसामान्यविशेषसमवायाभावा अनित्यामेयत्वा
दित्यत्राव्याप्तिः। केवलान्वयिधर्मावच्छिन्नसंशयाभावेपि तव्यापकसंशयसत्त्वात्। अन्यथानुपसंहारि
पद. त्वानुपपत्तेः। न च सर्वो धूमवान् वह्निमान् धूमवत्त्वादित्यत्र सकलधूमाधिकरणे वह्निसंशयदशायां

वि॰अ॰प॰
१९६
196

अनुपसंहारिणि व्याप्तिः। तस्य व्यतिरेकसहचारनिश्चयाविरोधित्वेनानुपसंहारित्वाभावेनालक्ष्यत्वात्
केवलव्यतिरेकिवत्‌। अन्वयज्ञाने संशयस्योपलक्षणत्वात् स्वरूपसत्त्वादृशसंशयाक्रान्तसकलप्रमेयवृत्ति
त्वज्ञानं व्याप्तिज्ञानविरोधितयाऽनुमितिप्रतिबंधकं वाच्यम्। तथा च सहचारनिश्चयविरहस्यावश्यकत्वाद्व्या
प्यग्रहादज्ञानरूपासिद्धिरेव न तु हेत्वाभासः। न च पक्षे साध्याभाववत्सहचारज्ञानानन्तरं तादृशसहचारनिश्चयद
ति हेत्वाभासत्वमिति वाच्यं। तथा सति साध्याभाववत्सहचारस्यैव साधारणत्वात्तत्रैवान्तर्भावापत्तेः। न च तन्निश्चयो ना
स्त्येव तत्संशयश्च पक्षीयो नानुमितिविरोधी। अनुमितिमात्रोच्छेदकत्वादिति वाच्यम्। अत एव स न हेत्वाभासः। ज्ञा
यमानप्रतिबंधकोपाध्यत्वाभावात्। न वा तस्यैव साध्याभाववत्सहचारसंशयस्य व्यभिचारसंदेहत्वेनानुमित्यप्र १९६

तिबंधकत्वेपिविशेषगोचरसंदेहविषयसाध्याभावसामानाधिकरण्यज्ञानत्वेनप्रतिबंधकत्वंकल्प्यतामिति
चान्यम्।सहचारनिश्चयाभावेनैवव्याप्त्यप्रतीतौतेनरूपेणप्रतिबंधकत्वाकल्पनात्।कल्पनेवाकेवलान्वयि
साध्यकासंग्रहस्यतथाप्यापत्तेः।तत्रसाध्याभावाप्रसिद्धेः।नचतस्यालक्ष्यत्वमेवेतिवाच्यम्।अव्यवहिताग्रिमग्रं
थविरोधात्।तज्ज्ञानस्यप्रतिबंधकत्वेपिसाधारणविलक्षणप्रतिबंधकतावच्छेदकानुपन्यासात्।अन्यथाता
दृशसंशयविषयसाध्याभावज्ञानत्वेनापिप्रतिबंधकत्वकल्पनेहेत्वाभासाधिक्यापत्तेः।यदिचोक्तदोषान्न
ज्ञानेसत्यपिव्याप्तिज्ञानसत्त्वान्नतस्यतथात्वंतदाप्रकृतेपितुल्यम्।नचतादृशसंशयविषयवृत्तित्वमेवहेत्वा
भासतोपाधिः।तज्ज्ञानस्यफलकरणविषयविरोध्यनवगाहितयाप्रतिबंधकत्वाभावात्।अत्रवदंति।केच

चिं॰व्य॰म॰
१९७

लान्वयिधर्म्मव्यापकताद्दशासंशयविषयमात्रवृत्तित्वमेवानुपसंहारित्वं। तज्ज्ञानं च हेतौ साध्यसामाना
धिकरण्यसंशयसामग्रीत्वेन प्रतिबंधकं। संशयसामग्र्याः सामान्यत एव निश्चयप्रतिबंधकत्वकल्पनात्। तद्वि
शिष्टहेतुज्ञानस्य हेतौ साध्यसामानाधिकरण्यसंशयजनकत्वमवर्जनीयमेव। हेतुमति सर्वत्र साध्याभाववत्संदे
हे न हेतौ साध्यसामानाधिकरण्यसंदेहस्यौचित्यावर्ज्जितत्वात्। अत एवास्यानित्यदोषत्वं। विशेषदर्शनेन तस्य संशय
सामग्रीत्वाभावात्। नन्वोक्तक्रमेणात्र साध्याभाववत्संशय एव एव दोषत्वेन कल्प्यतामिति वाच्यम्। क्वचिदप्यकल्पनात्।
संशयसामग्र्यास्तु निश्चयप्रतिबंधकत्वं क्लृप्तमिति॥ अत्रेदं चिन्त्यम्। तज्ज्ञानसत्वेऽपि व्याप्तिग्रहसंभवेन तस्य
न व्याप्तिधीप्रतिबंधद्वारानुमितिप्रतिबंधकत्वं। साध्यसामानाधिकरण्यसंदेहस्यैव योग्यतासंशयपर्यवसन्नत १९७

याऽतच्चाप्रतिबंधकतया तत्सामग्र्याः सुतरामप्रतिबंधकत्वात्तान्नन्वेवं व्याप्तिवारसंदेहस्यापि चाव्याप्तिग्रहप्र
तिबंधकतया व्याप्तिवारस्यापि हेत्वाभासत्वं न स्यादिति वेत्न हि तत्संशयस्य प्रतिबंधकत्वेन तस्य हेत्वाभासत्वमपि स्य
स्य तु तन्निश्चयस्य प्रतिबंधकत्वेनाप्यनिश्चये ऽवश्यमनुमितिप्रतिबंधस्तस्यैव हेत्वाभासत्वात् अन्यथा साध्याव्यापकत्व
साधनाव्यापकत्वसंशयविषयीभूतोपाधिज्ञानस्योक्तविधया वर्जितव्यभिचारसंदेहसामग्रीत्वेन प्रतिबंधकतया
उपाधेरपि हेत्वाभासान्तरतापत्तेः न च तज्ज्ञानस्य न व्याप्तिवारसंदेहसामग्रीत्वं तत्सत्वे कोटिस्मरणादिविरहे व्यभि
चारसंशयानुत्पादकत्वादिति वाच्यम् एवं हि तादृशसंशयविषयीभूतज्ञानस्यापि न सामानाधिकरण्यसंशयसा
मग्रीत्वं तत्सत्वेपि सामानाधिकरण्याभावादिकोटिस्मरणविरहे तत्संशयानुत्पादकत्वात्तान्नत्वसाध्याभावेन साध्याभावसा

वि॰ अ॰ म॰
१९८
198

मानाधिकरण्योपस्थापनमिति वाच्यम् । तच्च तस्यासामर्थ्यादिति । साध्याभावेति । साध्याभाववद्वृत्तित्वानिश्चयदशा
यामित्यर्थः । तदवगम इति । तन्निश्चय इत्यर्थः । संकर एवेति । कालभेदेन तच्चोभयसमावेशादित्युक्तम् । तदानुपसंहा
रित्वाभावेन संकराभावादिति भावः । व्याप्यत्वेति । इदं च व्यतिरेकिसाध्यकानुपसंहारिणमभिप्रेत्य । केवलान्वयिसा
ध्यके तदभावादिति भावः । यद्वा ज्ञानरूपासिद्धिमभिप्रेत्योक्तम् । अत एवानुपदमेव तथा विभावयिष्यति । अत ए
व च तज्ज्ञाने नोपजीव्यत्वमित्यपरितोषेणाभावनेचेत्तु क्रमः । अनुपदस्वीकृतेः व्याप्तिमात्रं काह । घटेति । इदं च साध्या
नवगतसहचार इत्यादिलक्षणमभिप्रेत्य । वस्तुतः साधारणोपमितिमंतव्यम् । संयोगादीति । संयोगविशेषसाध्य
क इत्यर्थः । किंतु साध्यासमानाधिकरणेति । साध्यवैयधिकरण्यावच्छेदकावच्छिन्नसाध्याभावव्याप्य इत्यर्थः । अन्यथेति । १९८

तत्राधिकरणे धेयस्याभावान्नैवोपपन्नेरित्यर्थः। कस्यचिन्मतं निरस्यति। नचेति। अत्र व्यभिचारव्याहतेनरूपेण
नुमित्यप्रतिबंधकत्वान्नेदानुपपत्तितादवस्थ्यमित्यपि द्रष्टव्यम्। अस्तुतावदिति। वस्तुनोनैकान्तिकसामान्यज्ञानं
प्रतिबंधकमेवन। विरोधाविषयत्वात्। किंतु विपक्षदृष्टित्वादिज्ञानमेव। तथा च तदन्तर्भावेनाभावव्याप्यक इतिभावः।
तथानुपन्यासादिति। [illegible] नीलवह्नित्वेन धूमवत्त्वानुपन्यासादित्यर्थः। अन्यथेति। तथैवोपन्यासे तदसमत्ति
व्याहतस्य नीलस्य निराकांक्षतयाऽनन्वयेऽपार्थकत्वापत्तेरित्यर्थः। साध्याऽनवगतेति। साध्याप्रमितसहचारइ
त्यर्थः। तेन गोत्वाश्वत्वयोः सहचाराज्ञाने [illegible] नाव्याप्तिः। विपक्षेति। साध्याभावसहचरितत्वमात्रविषयत्वेनैवप्रति
बंधकत्वे विशिष्टविषयत्वेन। तथात्वाभावेन रूपेण नहेत्वाभासत्वमिति भावः। वह्निविरुद्धवत्त्वमदन्यायांध

चि॰ व्य॰ र॰
१९९
199

मेति व्याप्तिरित्यनुशयेनाह॰ तत्प्रमापकत्वं वेति। साध्याभाववेति। साध्याभावव्याप्यत्वेनैव तत्प्रमापकत्वं ग्रा
ह्यं तथा च तत्संबंधबुद्धिभावरूपकी। अन्यथा तत्प्रमापकत्वग्रहस्यापि विरोध्यविषयतयाऽप्रतिबंधकत्वापात
दिति भावः। एतेन साध्याभाववद्व्याप्यत्वे व्यर्थविशेषणत्वादिनाद्दूषिते साध्यवदन्यान्याभाववद्व्याप्यत्वं द्विती
यं लक्षणमनूद्य दूषयति नापीति। साध्यव्यापकेति। नन्वेतस्य ज्ञानं न व्याप्तिधीप्रतिबंधकं हेत्वभाववत्साहि
साध्यव्यापकत्वं तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वं। न चैतद्विषयकबुद्धौ साध्यसामानाधिकरण्यादिवि
रोधी कोप्यर्थः स्फुरति। ग्राह्याभावास्फुरणात्। अतथाभूतस्य च ज्ञानस्याप्रतिबंधकत्वात्। अन्यथातिप्रसंगादि
ति चेन्न। सकलसाध्याधिकरणनिष्ठात्यंताभावाप्रतियोगित्वस्य विवक्षितत्वात्। सर्वस्मिन् साध्याधिकर १९९

साध्याधिकरणे हेतु
विरहस्य

णो हेतुविरह इति ज्ञानं च हेतौ साध्यसामानाधिकरण्यधीविरोध्येव। साध्याधिकरणे हेतोर्ग्रहस्तु तया तद्वि
रहस्याग्रहस्य विरहरूपत्वात्। अभावपदं च प्रतियोगिव्यधिकरणाभावपरम्। तेनायं हेतोरव्याप्यमेतत्कपिसं
योगवत्त्वादित्यत्र नातिव्याप्तिः। अथायमाकाशाभावानुद्व्यत्वादित्यत्रेदमव्यापकं। तत्र साध्याधिकरणाप्रसि
द्धेः। न च तदलक्ष्यमेवेति वाच्यम्। साध्ये हेतुसामानाधिकरण्याभावग्रहस्य व्याप्तिधीप्रतिबंधकत्वेन तद्विष
यस्यापि हेत्वाभासताप्रयोजकत्वौचित्यात्। तस्य च तत्र सत्त्वात्। न च हेतुसामानाधिकरण्याभाव एव सकल
विरुद्धव्यापकत्वाद्धेत्वाभासतोपाधिरस्त्विति वाच्यम्। अस्याप्याकाशादिरूपविरुद्धाव्यापकत्वात्। हेतौ साध्य
सामानाधिकरण्याभावस्य दूषकताबीजस्य तत्रापि सत्त्वादिति चेन्न। सर्वेषामेव विरुद्धोपाधित्वं विरोधित्वा

वि॰व्या॰म॰
२००
200

विशेषेण विनिगमकाभावात्। न च हेत्वाभासाधिक्यं। सामानाधिकरण्ये साध्यहेतुप्रतियोगिकत्वधीवि-
रोधिधीविषयत्वेन सर्वोपाधीनेकीकृत्य महर्षिणा विभजनात्। अत एव वक्ष्यमाणं साध्यवदवृत्तित्वादिकमपि
नाधिकं। अत एव साध्यवान् हेतुमानिति ज्ञानस्य प्रतिबंधकत्वात् सकलसाध्याधिकरणनिष्ठान्योन्याभावप्रतियो-
गितावच्छेदकत्वमपि हेतौ हेत्वाभासताप्रयोजकमिति विभागन्यूनतेति निरस्तम्। तज्ज्ञानस्य साध्यसामानाधिक-
रण्यग्रहविरोधित्वे उक्तविभाजकोपाध्याक्रांतत्वात्। तदविरोधित्वे व्याप्तिज्ञानाप्रतिबंधकत्वात्। अव्यभिचार-
सहचारयोर्ग्रहमविरुंधतां व्याप्तिग्रहाविरोधित्वात्। यत्तु साध्यसामानाधिकरण्यधीविरोधित्वं विभाजकोपाधि-
रिति। तन्न। अवृत्तिसाध्यकविरुद्धाव्यापकत्वादिति। नन्वेतदवृत्तिहेतावतिव्यापकं। न च दूषकताबीजस्य सामा- २००

त्वस्यापि तल्लक्षणत्वमेवेति वाच्यम्। तत्रोक्तविरुद्धत्वग्रहेपि व्यतिरेकव्याप्तिग्रहाप्रतिबंधकत्वादित्यस्वरसादाह य
द्वेति। तथा च वृत्तिमतः सकलसाध्याधिकरणनिष्ठात्यंताभावप्रतियोगित्वग्रहेन व्यतिरेकव्याप्तिग्रह इति ता
वः। केचित्तु वृत्तिमत इत्यसंकीर्णस्थलकथनाय। अन्यथाऽवृत्तित्वे सामान्यतो ज्ञाते पक्षावृत्तित्वस्यापि ज्ञानात्स्वरू
पासिद्धिसंकीर्णतापत्तेः। इत्थकताबीजं तु साध्यवद्वृत्तित्वमात्रमेवेत्याहुः। साध्यवद्वृत्तित्वेति। साध्यवद्वृत्तित्वप्र
तियोगिकाभावाधिकरणत्वमित्यर्थः। पूर्वोक्तस्वरसमन्वापि हृदि निधाय वृत्तिमत्व [illegible] परधर्मपद
त्वर्गविनलक्षणद्वयान्तरमाह साध्येत्यादि। अन्योन्याभावात्यंताभावगर्भतया लक्षणयोर्भेदो द्रष्टव्यः।।
वयं तु ब्रूमः। असाधारणोक्तन्यायेन वृत्तिमत्वघटितोक्तविरुद्धत्वग्रहस्यापि न व्यतिरेकव्याप्तिग्रहप्रतिबं

वि·अ·स·
२०१

धकत्वं तस्मिन्नसत्यपि श्राक्षादिना तद्ग्रहे बाधकाभावात् । तस्माद्व्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यत इति
मते विरुद्धस्य हेत्वाभासत्वं । तत्र च वह्निमत्त्वान्न भावः । तं विनाप्यन्वयव्याप्तिग्रहप्रतिबंधकत्वसंभवात् । अत एव
व्याप्यत्वासिद्धेरपि हेत्वाभासत्वं । नहि व्यर्थविशेषणे नीलधूमादौ तद्ज्ञानस्य व्यतिरेकव्याप्तिग्रहप्रतिबंधकत्वसं-
भावनापि विषयविरोधाभावादिति । व्यतिरेकयति व्याप्तिरिति । साध्यवद्वृत्तित्वज्ञानस्य तत्रापि संभवादनुमितिप्र-
तिबंधापत्तिरित्यर्थः । वस्तुतः व्याप्तेरसंभवात् । अत एव तत्र तादृग्ज्ञानाभावमेवोपपादयति · तत्रेति । व्यभिचार-
ज्ञानेति । अव्यभिचारज्ञानेत्यर्थः । अयोग्यताज्ञानस्येति । अयोग्यता हि पदार्थयोः संसर्गाभावप्रमैव । सैव च प्रकृते वि-
ज्ञान रुद्धत्वधीः तथा च विरुद्धत्वज्ञानमेवायोग्यताधीः पर्यवस्यतीति तस्याविरुद्धत्वज्ञानोपजीवकत्वमिति भावः । एवं २०१

ऊ१

बाधेपीति। अत्रचैवानुमाने बाधधीः सैव त्राद्धेः योग्यताधीरिति कथमनयोरुपजीव्योपजीवकभाव इति चिन्त्यम्।
निरग्निकत्वात्। अग्निसंबंधाभावादित्यर्थः। तेन धूम [illegible] व्यापकवह्न्यर्थोऽभावस्तद्व्याप्यत्वं तत्संबंधाभाव इति भा
वः। अत्रेदेपि व्याप्यव्यापकभाव इत्यभिप्रायेणावह्न्यभावएव वा हेतुः। अत एवाग्रे व्यापकत्वमन्तेदपीति वक्ष्यति। ए
तदज्ञानेपीति। अत्रेदं चिन्त्यं यदि प्रतिबंधकज्ञानविषयतावच्छेदकत्रैविध्यान्न त्रैविध्यं तदा विध्यांतरमपि स्याद्व
पूर्वोक्तसाध्यवदवृत्तित्वादिज्ञानानामपि प्रतिबंधकत्वात्। यदि विसहचारज्ञानत्वेन तेषामनुगमः तदैतेषामप्यनु विरोधि
गमान्न त्रैविध्यम्। न चैतत्त्रितयं विरुद्धहेत्वाभासतोपाधिः। प्रथमोपाधिज्ञानस्यासाधारणज्ञानत्वेनैव दोषत्वात्। द्विती
यतृतीयोपाधिज्ञानस्य विरोध्यविषयत्वेनाप्रतिबंधकत्वात्। न हि धूमे साध्ये वह्न्यभावव्याप्यत्वग्रहस्य हेतोव

सि. व्या. ह्निविरुद्धत्वग्रहस्य वा विरोधित्वं । किंतु धूमविरुद्धत्वग्रहस्यैव वा जलाशयत्वादौ वह्निविरुद्धत्वग्रहकालेपि ज्ञाद्धाभास सि
२०२ दिना धूमव्याप्यत्वग्रहसंभवात् । न च पूर्वोक्त एव विरुद्धहेत्वाभासतोपाधिः तस्य च ग्रहणप्रकारत्रयमिदमिति वाच्यम् ।
२०२ एतत्त्रितयप्रकाराज्ञानेपि साध्यवदवृत्तित्वादिग्रहात् । तद्ज्ञानेपि कदाचित्साध्यविरुद्धत्वाग्रहात् । एवं निषेधसाधनेपा ति-
ननु विरुद्धबाधाद्यन्यतमज्ञानस्यावश्यकत्वात्तस्यैवानुमितिप्रतिबंधकत्वेन नास्य हेत्वाभासान्तरत्वमित्यत आह । अयं चे-
ति । बाधादिपदं तत्तद्ज्ञानपरम् । तथा च क्वचिद्बाधादिज्ञानसांकर्येपि क्वचित्तदसंकीर्णसाध्यवदवृत्तित्वादिज्ञानस्य
प्रतिबंधकत्वादस्य हेत्वाभासत्वमिति भावः ॥ यत्तु चतुर्विधाः परमाणवः नित्याः पार्थिवपरमाणुत्वादित्यत्र क्वचित्त विरु-
द्धस्य बाधितत्वादिदोषसांकर्यमिति स्वरूपकथनमिति । तन्न । प्रकृतानुपयुक्तत्वात् । अन्यथा हेत्वाभासांतरेपि हेत्वाभा- २०२

सांतरसांकर्य्यविरहावयेदिति। नापि व्याप्तिपदं धर्म्मतयाज्ञातत्वमिति। व्याप्तिपदं धर्म्मतावगाहिसामानज्ञानविषयत्व
मित्यर्थः। आरोपयितुमिति। यद्यपि व्रमरूपानित्यत्वव्याप्यश्रावणत्वप्रसिद्धिः संभवत्येव। तथापि प्रमितमेवारोप्यत इ
तिमतमाबंल्ब्येदमुक्तम्। एकत्रेति। सत्वप्रतिपदद्वयोर्म्मध्ये एकत्र हेतावित्यर्थः। पदं विशेष्यकपरामर्षोत्तिप्रायेण
दं बोध्यम्। विशेषणतावच्छेदकप्रकारकज्ञानस्येव विशिष्टवैशिष्ट्यावगाहिज्ञानजनकत्वमिति मतमालंब्येदमुक्तं।
अन्यथा हेतुविशेष्यकपरामर्षे विशिष्टस्यानारोप्यत्वेन तदप्रसिद्धेरदोषत्वात्। एकस्य द्वयमिति न्यायेन शब्दश्रा
वणत्ववैशिष्ट्यस्य श्रावणत्वे च नित्यत्वव्याप्यत्ववैशिष्ट्यस्य युगपदवगाहनात्। पदं विशेष्यकत्वेप्यदोषत्वाच्चा ज्ञातए
मत्वञ्चकं व द्रूषणामिदं सिद्धान्तेनोद्धरिष्यति। अन्यथा लिंगाज्ञानासादनुमित्यनापत्तेरिति। यद्वा। एकत्राकारत्रादौ लिंगेऽज्ञातया।

वि॰अ॰न॰

२०३

१०३

भावात् व्याप्तिपक्षधर्म्मता तयाभावात् विशिष्टस्योभयस्य व्याप्तिपक्षधर्म्मतारूपस्याप्रसिद्धेरित्यर्थः। विशेषस्य
न व्याप्तिसंगासंगरूपेति। अनिर्द्धारितो वा अ इति शेषः। एकत्र संगनियमादिति। तथा चान्यतरत्वेन निर्द्धारण
संभवात् न सर्वथैवोभयोरनिर्द्धारितविशेषत्वमित्यर्थः। साध्येति। अत्राधिकबलोपस्थितिप्रतिबद्धकार्य्यहीनब
लेलिंगे इति व्याप्तिवारणायोक्तं समानबलोपस्थित्येति। समानत्वं च निर्णयाजनकत्वेन विवक्षितम्। अधिकबलोप
स्थितिश्च निर्णयजनिकैवेति न समानेति नोक्तदोषः। न नु तत्फलस्य बाधस्यैव तत्रानुमितिप्रतिबंधकत्वं न त्वधिकब
लोपस्थितेः। किंच यत एव दोषात्प्रतिबध्यस्य हीनबलत्वं तत एव तत्रानुमितिप्रतिबंधसंभवात्तस्यापि तत्प्रतिबं
धकत्वमिति चेत् न। बाधस्यानुमितिप्रतिबंधकतया तत्सामग्रीत्वेनाधिकबलोपस्थितेरपि प्रतिबंधकत्वात् यद्वा। २०३

नेयत्र प्रतिबंधकमित्यादिव्याप्तेः। अन्यथा बाधावतारदशायां समयेहीनबलेनापि लिंगेनानुमितिजननापत्तिः।
न च तदा तुल्यबलतया सत्प्रतिपक्षत्वमेवेति वाच्यम्। अव्यवहितोत्तरसमयेऽधिकबलेनापि बाधरूपानुमित्य
जननापत्तेः। यदि च हीनबलत्वप्रयोज्यं दोषान्तरमपि ज्ञातं तत्तदा तस्यापि प्रतिबंधकत्वमस्तु। प्रत्येकमवध्यत्वसा
मर्थ्यात्। विनिगमकाभावात्। अन्यथा हेत्वाभासद्वयावतारकालेष्वन्यस्य प्रतिबंधकत्वं न स्यात्। दोषान्तर
ज्ञानसंकीर्णाया एवास्याः सर्वत्र प्रतिबंधकत्वात् तद्विषयस्य न हेत्वाभासतोपाधित्वं। अतथाभूतज्ञानविषयस्यैव
तथात्वात्। अत एव बाधस्य दोषान्तरासंकरायप्रयास इति। धूमोयं न व्याप्तपक्षधर्मः। पर्वतश्चनित्यादित्यादौ
यदा बाधावतारस्तदा पर्वतश्चनित्यादौ लिंगस्यतिव्याप्तिः बाधरूपोपास्थितेर्व्याप्तिपक्षधर्मताविषयत्वेन बलोप

वि॰अ॰त॰
२.५

स्थितित्वात्तस्य चायं चनिर्णयरूपतयानिर्णयाजनकत्वेनसमानत्वाज्ञेत्यतआह साध्यविरोध्युपस्थापनसमर्थ
त्वमुपस्थितौ विशेषणमू। बाधरूपोपस्थितिस्तु साध्यविरोध्युपस्थितिरेव॰ ननु तज्जनिकेतितद्युदासः। नचब
बल २.५ लपदस्यैव विरोधिबलवत्त्वादेवनायमतिप्रसंगइतिवाच्यम् उक्तविशेषणदानेनतत्पर्यवसानात् ननुकेव
लमेवबलपदंतत्परम्। विशेषणवैयर्थ्यापत्तेः। साध्यविरोध्युपस्थापनसमर्थत्वंचसाध्यसिद्धिविरोध्युपस्थि
तिजनकत्वमतोनकेवलान्वयिसत्प्रतिपक्षाव्याप्तिः। ननुयत्रानित्यत्वव्याप्यवत्तकत्वनिश्चयःसत्प्रतिपक्षात्मा
तत्रैवचसमूहालंबनात्मकेनित्यत्वविरुद्धजन्यत्वमपिज्ञातंतत्रनित्यत्वविरुद्धत्वेनज्ञायमानेजन्यत्वेऽतिव्याप्तिः
नित्यत्वरूपसाध्यविरोध्यनित्यत्वोपस्थापनसमर्थयानिर्णयाजनकत्वेनसमानयात येवबलोपस्थित्यात २.५

स्यप्रतिबद्धकार्य्यत्वात्। न च बलोपस्थितित्वेन प्रतिबंधकत्वं विवक्षितम्। विरुद्धत्वोपस्थितेश्च सहचारनिश्च
यविरोधित्वेन तत्त्वमिति वाच्यम्। एवं हि पर्वतवृत्तित्वादौ हेतावतिप्रसंगात्। बाधादिविशेषणवैयर्थ्यमेव। न हि त
त्र बलोपस्थितित्वेन प्रतिबंधकत्वं। किंतु ग्राह्याभावनिश्चयत्वेनेति चेत्। अत्राहुः। बलोपस्थितित्वेनैव प्रतिबंधक
त्वं विवक्षितम्। एवं च सर्वांश एव विशेषणान्यसंग्रहवारणायेति न तद्वैयर्थ्यं। तथा हि बलोपस्थितित्वेन प्रतिबंधकत्वम
संग्रहविरुद्धकार्यबलोपस्थितेरप्रतिबंधकत्वात्। ततः साध्यविरोधीत्याद्युपस्थितौ विशेषणम्। केवलान्वयिसत्प्रति
पक्षसंग्रहानुरोधाद्ज्ञानेनैव रूपेण प्रतिबंधकत्वं। ननु साध्याभावसाधकबलोपस्थितित्वेनेति न दोषतावदेवं स्यात्।
साध्यविरोध्युपस्थितिस्वरूपयोग्यत्वस्य हानं बलोपस्थितावपि सत्त्वेन तत्त्वं न प्रतिबंधकतावच्छेदकमिति संभवता।

चि॰ अ॰ म॰ दवस्थेन तद्धारणार्थं च समानपदं। समानत्वं च प्रतिबध्यापेक्षं वैलक्षण्यं च न्याय्यं निर्धार्यमाणत्वमानवहीना या
२०५ यां बलोपस्थितौ तदस्ति। एवं च बाधतत्सामग्र्यादावतिव्याप्तिरेव नास्तीति तद्धारणाय न विशेषणमिति। अत्रेदं
205 चिन्त्यम्। ताद्रूप्या बलोपस्थितित्वमपि न प्रतिबंधतावच्छेदकं तथा हि। यत्रानयहेतुपरामर्षकाले तन्नयत्र बाधा
व[illegible]तारेणानयस्यापि हीनबलत्वं तत्र तदुपस्थितावतिप्रसंगेन पुनरप्यसंभव एव। तस्या अपि प्रतिबध्यापेक्षं वैया
लक्षण्यावच्छिन्नयाऽनिर्धार्यमाणत्वेन समानत्वात्। न च तदा सत्प्रतिपक्षत्वमिष्टमेवेति वाच्यम्। अपसिद्धान्तात्। बाधादेवा
नुमितिप्रतिबंधसंभवात्। बाधितेनापि सत्प्रतिपक्षे हेत्वाभासांतरेणापि तदापत्तेः। किंचाधिकबलोपस्थितेरपि प्रति
बंधकत्वात् समानबलोपस्थितित्वं न प्रतिबंधतावच्छेदकं। किंत्वन्यूनबलोपस्थितित्वमेवातश्च समानपदं न तथा २०५

तथाचसुतरामसंभवः। तेनरूपेणक्वचिदपिप्रतिबंधकत्वाकल्पनात्॥४

वविवक्षितमितिवाच्यम्। हीनेबलेऽतिव्याप्त्यापत्तेः। अनेनैवरूपेणाधिकबलोपस्थित्याप्रतिरुद्धकार्यलिंगत्वा
त्तस्याननुच्चाधिकबलोपस्थितेर्विरोधिसामग्र्यात्वेनैवप्रतिबंधकत्वंनत्वनेनरूपेणेतिचेत्। तर्हितेनैवसमानबलोप
स्थितेरपिविरोधिज्ञानसामग्र्यात्वेनैवप्रतिबंधकत्वमस्तु। परस्परविरुद्धार्थकराद्वयस्थलेतथाप्रतिबंधकत्वकल्प
नात्। तस्माद्बलोपस्थितित्वेनाप्रतिबंधकत्वेपियद्रूपोपस्थितेः प्रतिबंधकत्वेव्याप्तिपक्षधर्मतारूपंबलंकेनापिरूपे
लिंग णाविषयतयाऽवच्छेदकंतदुपस्थित्याप्रतिरुद्धकार्यत्वंविवक्षितम्। तथाचपर्वतरुत्रिवादिलिंगप्रतिबंधकबलोप
स्थितेर्ग्राह्याभावोपस्थितित्वेनप्रतिबंधकत्वं व्याप्तिपक्षधर्मताविरहस्यचतत्रग्राह्यतयातदभावरूपस्यबलस्य
ग्राह्याभावरूपतयातदवच्छेदकत्वमित्यतिव्याप्तेः तद्वारणायसाध्यविरोधीत्यादिविशेषणम्। अनित्यत्वव्याप्य

वि॰अ॰भ॰ २६ उतकत्वनित्यत्वविरुद्धजन्यत्वनिश्चयरूपबलोपस्थितौ वसमूहालंबनरूपायां विषयतया न बलं प्रतिबंध
कतावच्छेदकं किंतु विरुद्धत्वमात्रं तावतैव तस्याः सहचारधीप्रतिबंधद्वारा व्याप्तिधीप्रतिबंधकत्वसंभवादिति
२०६ लिंगपदं व्याख्यातपरं धर्मतया ज्ञातत्वपरं तेनापि तादृशाबलोपस्थित्याप्रतिरुद्धकार्ये लिंगे विरुद्धत्वेन ज्ञायमा
म नेऽनुत्पत्त्यादौ नातिप्रसंगः। अत एव चात्मैनः प्रभृतौ विरुद्धव्यभिचारिणि वा तत्वेन ज्ञायमानेनातिव्याप्तिः तदपि हि
तादृशाबलोपस्थित्याप्रतिपद्यावतारूपया प्रतिरुद्धकार्यमेवातत्प्रतिरुद्धयामनुमितौ लिंगवदात्मादेरपि का
रणत्वात्तन्नवसाध्यविरोधी तत्र साध्यपदं स्वसाध्यपरमतः कथमलिंगे तत्रातिव्याप्तिरिति वाच्यम्। साध्यं हि ज्ञाप्यं लिं
गस्यैवात्मादेरपीति सर्वं सुस्थम्। यत्तु समानबलोपस्थित्याप्रतिरुद्धकार्यलिंगत्वमेव लक्षणम्। समानत्वमेव के २६

नरूपेण विवक्षितमित्यपेक्षायां साध्यविरोध्युपस्थापनसमर्थत्वं विशेषणं तथा चानेन रूपेण समानयाबलोप
स्थित्याप्रतिरुद्धकार्यत्वं विवक्षितमिति। तन्न। अधिकबलोपस्थित्याप्रतिरुद्धे हीनबलेऽतिव्याप्तेः। न च समानसमाना
धिकेति वाच्यम्। साध्यविरोध्युपस्थापनसमर्थत्वेन तस्या अपि समानत्वात्। प्रकारान्तरेण समानत्वविवक्षायां
साध्येत्यादिविशेषणवैयर्थ्यापत्तेः। ननु बलं सपक्षसत्त्वादिकं विपक्षासत्त्वादिकं वा आद्ये व्यतिरेकव्याप्तिरन्त्ये केवला
न्वयिन्यव्याप्तिरित्यत आह। बलं चेति। व्याप्तिश्च स्वसाध्यसिद्ध्यनुकूला विवक्षिता सा च क्वचिदन्वयव्याप्तिः क्व
चिद्व्यतिरेकव्याप्तिरिति भावः। विरोधीति। अत्राप्यधिकबलोपस्थित्याप्रतिरुद्धकार्ये लिङ्गेऽतिव्याप्तिवारणाय वि हीनबले
रोधिबोधकान्येति गमकतौपयिकरूपविशेषणम्। बोधकत्वं न स्वरूपयोग्यत्वं किन्तु फलोपहितत्वं तेन न सत्यपि

वि॰अ॰न॰
२०~
२७

पक्षस्यापि विरोधिबाधस्वरूपयोग्यत्वेन तदन्यत्वासंभवात् नासंभवः। तदर्थोपि विरोधी बाधः तदुपहितान्यत्व यो १

मतो न केवलान्वयिसत्प्रतिपक्षे विरोधिबाधकाप्रसिद्ध्याऽव्याप्तिः। गमकतौपयिकं च रूपं व्याप्तिपक्षधर्म्मते॰ अत्रा

पि व्याप्तिपक्षधर्म्मतया ज्ञातत्वपरं लिंगपदं बोध्यम्। तेन पूर्वोक्तातिव्याप्तिः। यत्तु यन्मते चक्षुरादिकमप्यनुमानेन सप्र

तिपक्षितं भवति तन्मते तत्साधारणमपि लक्षणं भवत्विति नाव्यलिंगपदमुक्तमिति॰ तन्न। तन्मते हि यथा चक्षुरनुमानेन प्र

तिपक्षितं भवति तथा चक्षुषाप्यनुमानं सत्प्रतिपक्षं वाच्यम्। तच्च नोक्तलक्षणसंगृहीतं स्यात्। ज्ञायमानतया चक्षुषोऽप्र

तिबंधकत्वात्। अग्रे चक्षुरादेस्त्वेत्यनेन ग्रंथकृतैव तन्मतस्य दूषयित्वाच्च। एकदा निरंतरं तयोर्वृत्ति। सामग्र्यनियमात्। क्व र

चिदेकदा क्वचिन्निरंतरयोर्वृत्तिर्व्यवस्थितविकल्पः। न चाग्निमपरामर्शकाले प्रथमपरामर्शेणानुमितिजननाप २०~

त्तिः। विरोधिपरामर्शसामग्र्या एव तदप्रतिबंधकत्वात्। अग्रिमपरामर्शस्य प्रतिबंधकतया तदभावस्य कार्यस
हकृतस्यैव जनकत्वाभ्युपगमेन तत्कालेन तदभावाच्चात्यपरसाधारणत्वादिति। तथा चास्यापि दूषणसमर्थत्वाद्दो
षांतरवदुद्भावनं परार्थानुमानेप्यविरुद्धमिति भावः। प्रतिरुद्धत्वेति। विरोध्युन्नयपरामर्शविषयीभवत्प्रतिसाधन
ज्ञानानन्तरमित्यर्थः। प्रतिरुद्धत्वज्ञानस्य प्रतिरोधाहेतुत्वात्। उन्नयोरेकत्रेति। ननु विरोध्युन्नयोरेकत्र निश्च
य एवकृत इति चेत्। हेत्वोर्विरोधापरिस्फूर्त्तौ साध्ययोश्च तत्प्रतिपत्तौ स्वसामग्रीसमाजादुन्नयपरामर्शसंभवात्।
नहि साध्यविरोध एव हेतुविरोधः। उन्नयपरामर्शानंतरं साध्ययोर्विरोधप्रतिसंधानेन च सत्प्रतिपक्षसंभवात्। किं
च प्रत्यक्षरूपे परामर्शे विरोधिव्याप्यवत्ताग्रहो न प्रतिबंधकः पीतः शंखः इति भ्रमानुपपत्तेः। किंतु ग्राह्याभावग्रह

चि·च्य·म·
२८
सत्प्रतिपक्षे
208

मात्रं तस्य च तच्चाभावान्न सत्प्रतिपक्षत्वसंभव इति भावः। ननु सद्धेतुं कथं सत्प्रतिपक्षः हेत्वाभासता प्रयोजक
स्य व्याप्याद्यविरहस्य तच्चाभावात् तादृशस्यापि हेत्वाभासत्वे सर्वदैव तस्य तत्त्वं स्यादित्यत आह दूषकताबीजमि
ति। हेत्वाभासताप्रयोजकमित्यर्थः। तथा च विरोधिपरामर्शविषयाभाववत्त्वायं निर्णयं जनयत्यत एव हेत्वाभासो ननु
व्याप्याद्यभावात् तथा च सद्धेतोरपि तस्य तथात्वमत एव न सर्वदैव तथात्वं तादृशविरोधिपरामर्शस्य कादाचित्क
त्वात्। ननु दूषकताबीजमनुमितिप्रतिबंधकज्ञानविषयतावच्छेदकमिति क्रमः कर्त्तव्यः। निर्णयाजनकत्वज्ञानस्या
प्रतिबंधकत्वात् तादृशज्ञानविषयतावच्छेदकं च प्रतिहेतुद्वयमेव। तद्वत्त्वं च यथा तदुभयस्य तथोक्तं प्राक्। एकं चेति।
अन्यतरत्वप्रकारकव्याप्त्यादिलिंगज्ञानजनकत्वलक्षणेन वा नातिप्रसक्तेर्दुष्टिबीजेनास्य हेत्वाभासत्वमित्यर्थः। २८

तज्ञकादाचित्कमिति न सदास्य हेत्वाभासत्वमिति भावः। एवं च यदा व्याप्त्यादिलिंगज्ञानद्वारास्य दोषत्वं तदा दूष
कतायामसिद्ध्युपजीवनान्नास्य हेत्वाभासत्वं पृथगिति निरस्तं बोध्यम्। नन्वनुमानप्रतिरुद्धेव कुत्रापि लिंगत्वाभा
वादुक्तलक्षणयोरव्याप्तिः। तस्य व्याप्तिपुरस्कारेणागमकत्वान्नलिंगज्ञानद्वारा तत्र दूषणत्वासंभवश्चेत्यत आह
ननु यादृश्चेति। तदुपस्थिताविति। पीतत्वाभावव्याप्यशंखत्वोपस्थितावपि पीतप्रत्यक्षोदयस्यानुभवसिद्धत्वादि
त्यर्थः। नन्वेवमिति। यदि समानबलमात्रेणासत्प्रतिपक्षत्वमुपगमइत्यर्थः। समबलत्वइति व्याप्त्यादित्रितयं बलमस्तु
पत्यालक्षणायोगदोषसत्त्वेव दोषान्तरमाह। अधिकेति। तस्येति। विरोधिवाक्यस्याधिकत्वे ज्ञातेऽनुमेयस्य बा
धितत्वादेवानुमानवैयर्थ्यम्। न्यूनबलत्वेवज्ञाते साध्यनिश्चयादेव तद्वैयर्थ्यमिति भावः। तत्रं हीति। भावद्रूपे

त्वप्रमाणेनतादृशंबलमित्यर्थः।प्रतिवादिवाक्यजंचज्ञानमप्रामाण्यशंकास्कंदितमितिनप्रतिबंधकं।ननुय
दिव्याप्तिपक्षधर्मतेबलंतदाप्रत्यक्षादेःसत्प्रतिपक्षतयोपन्यासःसर्वसिद्धोविरुध्येतेत्यतआह।प्रत्यक्षाद
स्व रिति।कथायामिति।यदुपन्यस्तंपरंप्रमांजनयतितदेवोपन्यसनीयम्।चक्षुरादेस्तुस्वरूपसतएवप्रमाजनक
209 त्वं।शाब्दस्यतथात्वेपिवाद्युक्तत्वेनाप्रामाण्यशंकास्कंदितत्वान्नतुल्यबलमितिभावः।एकैकमिति।प्रत्येकमसाधा
रणत्वाभावादितिभावः।साध्यतदभावयोरित्यादि।साध्याभावएवबाधः।अप्रामाण्यशंकाशून्यंचतज्ज्ञानंप्र
तिबंधकमितिमतेनेदमुक्तम्।ननुविरुद्धनिश्चयदशसामग्र्याःसंशयजनकत्वकल्पनादवश्यमचतयानुमिति
रूपसंशयजत्वाद्यः।नचविशेषादर्शनसहितायाःतस्यास्तथात्वं।प्रकृतेचविशेषदर्शनमितिवाच्यम्।एकमात्रको २०९

रिविशेषदर्शनस्यैवसंशयवारकत्वान्नदशावस्यैवसंशयकारणत्वात्तस्यैवप्रसन्नतेमत्वात्।अन्यथास्थाणुपु व्य
रुषत्वोभयव्याप्यदर्शनेसतिपुरोवर्तिनितदुभयकोटिकसंशयानुपपत्तेः।ननुविरुद्धप्रत्यक्षद्वयसामग्र्याःसंश
यजनकत्वमन्यथाविरुद्धस्मृतिसामग्रीतःसंशयरूपस्मृत्यापत्तेः।विरुद्धार्थकशब्दयोःशाब्दसंशयापत्तेश्चेतिचेत्।
न।एतन्मतेइष्टापत्तेः।नन्वेवमन्यत्रापिसंशयरूपस्मृतौबाधकाभावात्संशयस्यापिसंस्कारजनकत्वंस्यात्तच्चसर्व
मतनिषिद्धमितिचेत्।एवंतोताविरुद्धानुभवसामग्रीत्वेनसंशयजनकत्वमस्तु।ननुप्रत्यक्षेसाध्याभावप्रत्यक्षत्वेनै
वप्रतिबंधकत्वं।अनुमितौशाब्दज्ञानेचसाध्याभावज्ञानत्वेनप्रतिबंधकत्वेकल्प्यमानेलाघवेनसामान्यतःसाध्या
धिकरणानधिकरणज्ञानत्वेनकल्प्यतांतच्चसाध्याभावव्याप्यज्ञानेप्यस्तीतिचेत्।एवंहिजलह्रदोवह्निमानितिभ्र

वि·अ·४·

210

मरूपाप्यनुमितिःकदापिनस्यात्।पर्वतावच्छेदकजलह्रदत्वादिज्ञानसत्येवसाध्याधिकरणानधिकरणज्ञानत्वे
नप्रतिबंधकत्वसंभवात्।नचस्वरूपेणतज्ज्ञानंनप्रतिबंधकमपितुसाध्याभाववद्व्याप्यत्वेनेतिवाच्यम्।एवंहिसाध्या
भाववद्व्याप्यज्ञानस्यतत्त्वेनैवदृष्टत्वमेवप्रतिबंधकत्वंवाच्यम्।नोक्तरूपेणउक्तातिप्रसंगात्।तच्चनसंभवति।अन्यत्र
तथाप्रतिबंधकत्वाकल्पनात्।किंचैवंसाध्याभाववद्व्याप्यबुद्धौसत्यामाप्तवचनाद्यादृग्ज्ञानंनोत्पद्येतानवस्थापत्तिः।
योग्यतादिज्ञानसत्वेयादृग्ज्ञानोत्पत्तेरावश्यकत्वात्।ननुनप्रत्यक्षस्थलेकोटिस्मृत्यादेर्निश्चयत्वावच्छिन्नसाम
ग्रीत्वंकिंतुज्ञानसामग्रीत्वमेवतद्विशिष्टज्ञानंप्रत्येवतत्कोटिस्मृतेर्जनकत्वात्।प्रतिबंधकाभावेसतिसानिश्चयंज
नयतीतिनिश्चयसामग्र्यांतूच्यते।तथाचतत्संशयस्यापिज्ञानत्वावच्छिन्नत्वात्तत्सामग्र्यातदुत्पत्तावविरोधः।व्या २१

प्यदर्शनं तु न ज्ञानमात्रसामग्री किंत्ववधारणात्मकनिश्चयसामग्रीति न तयाऽनवधारणात्मकसंशय
स्योत्पादनमिति चेत् । नाहृतीयलिंगपरामर्शस्य हि कार्य्यतावच्छेदकमनुमितित्वं जातिर्लाघवात् नत्व
वधारणात्मकनिश्चयत्वं । गौरवाद्व्यभिचाराच्चाऽनुमितित्वं च संशयरूपायामप्यनुमिताविति कथं तेन
न तदुत्पादनं । यत्तु साध्याभावव्याप्यवत्त्वज्ञानं साध्यानुमितिप्रतिबध्नात्येव अन्यथा पीतः शंख इत्यनुमिति
रपि स्यात् पीतत्वाभावव्याप्यशंखत्वबुद्धेरप्रतिबंधकत्वात् । प्रत्यक्ष इव दोषबलाविशेषादिति तत्तुच्छम् ॥
शंखे पीतत्वव्याप्यधर्म्मपरामर्शसंशयरूपपीतत्वानुमितेरिष्टत्वात् तदपरामर्शे तु कारणाभावादेव पी
तानुमित्यनुत्पाद इति तदभावव्याप्यवत्त्वज्ञानस्यापि प्रतिबंधकत्वे मानाभावः । अनुमाप्य तदभावनिश्चय

चि॰ अ॰ त॰
२११
२॥

स्य परस्परं प्रतिबंधकत्वात्तत्सामग्रीत्वेन परामर्शयोरपि परस्परं प्रतिबंधकत्वमिति चेत् न। प्रत्यक्षस्थले
पि संशयापलापापत्तेः। मैवं। संशयरूपाप्यनुमितिरनुभवबलात्स्वीकार्या विरोधिनिश्चयसामग्रीत्वेन
संशयजनकत्वकल्पना त्सामग्रीबलाद्वा। नाद्यः अनुमिनोमीत्यनुव्यवसायस्य सत्प्रतिपक्षस्थलेऽसिद्धेः। संदे
हमीत्यनुव्यवसायस्यावश्यकल्पनीयकारणताव कोटिस्मरणादिजन्यसंदेहविषयत्वेनाप्युपपत्तेः। नापि द्वि
तीयः। विरोधिप्रत्यक्षसामग्रीत्वेनैव संशयजनकत्वकल्पनात्। अन्यथा व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यत्व
स्यानुमितित्वप्रयोजकत्वात्संशयोत्तरप्रत्यक्षेऽप्यनुमित्यापत्तेः। तत्रानुमिनोमीत्यनुव्यवसायाभावात्फलाभावेन नि
श्चिते प्रत्यक्षसामग्रीविरहसहकृततज्जन्यत्वमनुमितित्वप्रयोजकमिति तदाप्रसक्तेपि तादृशानुव्यवसायाभावा २११

द्विरोधिप्रत्यक्षसामग्रीजन्यत्वं संशयप्रयोजकमिति तत्त्वम्। तस्मात्फलानुरोधेन कारणकल्पना न तु कारणा
नुरोधेन फलकल्पना। अत एव विशेषणज्ञानविशेष्येन्द्रियसन्निकर्षादिरूपस्य कारणसत्त्वेऽपि पर्वते वह्निसाक्षा
त्कारानुभवात् विशेषणसन्निकर्षस्यापि तत्र कारणत्वं कल्प्यत इति संक्षेपः। साध्यविरोधित्वादिति। यद्य
पि नैकं विरोधित्वमुभयज्ञाने विषयः तथापि यथा साध्याभाववज्ज्ञानं साक्षात्प्रतिबन्धकं तथा तदभावव्याप्यव
त्त्वज्ञानमपीति तात्पर्यम्। विपरीतेति। ज्ञानपदं भ्रमापरम्। अपक्षधर्म इति। वृत्तिमत इति लक्षणानुरोधेनाकाशा
दिर्न विरुद्ध इति मतेनेदमुक्तम्। नन्विदं बाधितेऽपि गतमित्यत आह बाध इति। तथा च विपरीतज्ञानजनकत्वं विरु
द्धत्वं न तु विपरीतज्ञानविषयपक्षवृत्तित्वमतो न तत्रातिव्याप्तिरित्यर्थः। पर इति। अन्यतोऽपि विपरीतज्ञानसं

वि॰अ॰म॰
२१२

212

भवादित्यर्थः। व्याप्तिबाध इति। व्याप्यत्वपक्षधर्म्मताबाध इत्यपि द्रष्टव्यम्। तथा च व्याप्तिपक्षधर्म्मतान्यतरबाधः फ
लमित्यर्थः। प्रकृतेति। प्रकृतोभयसाध्यसाधकहेत्वोरित्यर्थः। व्याप्तीति। तादृशजिज्ञासाजनकोपस्थितिविषयत्व
मित्यर्थः। नन्वेकपरामर्षादपि तादृशजिज्ञासा भवतीत्यत आह। नहीति। असतीति। ह्टणरणिन्या
येन विजातीयजिज्ञासायामस्यजनकत्वान्न व्यभिचार इति भावः। अत्र हेतुसमीचीनत्वन्तूपलक्षणमसाध्याञ्चे
प त्यपि द्रष्टव्यम्। अपरहेत्विति। क्वचिद्व्याप्तिज्ञानेन क्वचित्पक्षधर्म्मताज्ञानेनाग्निमद्विशिष्टज्ञानं च वह्निव्याप्यवा
नयमित्याकारकं पर्वतवृत्तिधूमे वह्निव्याप्तिरित्याकारकं वा। तदन्यतरज्ञानोत्पत्तिकाले पूर्वपरामर्षविनाशादि
त्यर्थः। अन्यथा विरोधिगुणत्वेन प्रथमज्ञानस्यैव परामर्षनाशकत्वात्तज्ज्ञानाभ्यामित्यसंगतं स्यात्। जात्यन्यत्व इति॥ २१२

सत्त्वादौ व्यभिचारवारणाय सतीति घटरूपादौ व्यभिचारवारणाय द्वितीयविशेषणम् । ननु गुणवत्त्वादावनु
पाधौ तथापि व्यभिचार इति चेन्न । तथापि सत्प्रतिपक्षत्वमक्षतमेव । विशेषादर्शनकाले तेनापि तत्स्वीकारादत ए
व वक्ष्यति विशेषादर्शनदशायामिति । अत एवाग्निमानुमानेपि पद्यान्योन्याभावादौ व्यभिचारो न दोषावह इति भा
वः । पीतत्वव्याप्यतद्धंखत्वादिपरामर्शस्य शंखे नापीतत्वानुमितिप्रतिबंधकः । अप्रामाण्यशंकास्कंदितत्वात् । तद
नास्कंदे तु सत्प्रतिपक्षत्वमिष्टमेवेति ध्येयम् । वस्तुत इति । इदं च विशिष्टाभावस्य प्रत्येकाभावसमानसंवित्संवेद्य
त्वमभ्युपेत्योक्तम् । वस्तुतस्तु खंडाभावस्य तस्य शब्दादिना केवलस्यापि ज्ञानात् तज्ज्ञानस्य ग्राह्याभावज्ञानत्वाविशे
षेणावश्यं प्रतिबंधकत्वात् सोपि दोष एव । यथा च न हेत्वाभासाधिक्यं तथा वक्ष्यते । व्यर्थेति । इदमप्यखंडाभाव

त्ति।

चि॰ अ॰ न॰ २१३ 213

ननन्वनुपेत्योक्तमुपजीव्योऽजीव्यादिति त्वेकाभावाज्ञाने ज्ञातस्यापि विशिष्टाभावज्ञानस्याप्रामाण्यप्रसंगात्कास्कं
दितत्वे न स्वकार्य्यक्षमत्वादिति भावः। क्वाचित्कान्तिप्राये तो पजीव्यत्वमुक्तमित्यप्याहुः। नन्वेवं व्यभिचारादेर
सिद्ध्यन्तर्भाव इत्यत आह॰ व्यभिचारादेर्वेति उपजीव्यत्वं क्वाचित्कान्तिप्राये तो वेति ध्येयम्। तत्त्वेति। इदन्त्वनोपाधि
कत्व व्याप्तिपक्षे तत्रोपाधिरेव व्याप्तिविरह इति ध्येयम्। दुरूहत्वादिति। साध्यव्यापकत्वादिना न पदार्थघटि
तत्वेन तस्य तदपेक्षया विलम्बितप्रतीतिकत्वादित्यर्थः। ननु ज्ञप्तावनुपजीव्यत्वेप्युत्पत्तावस्य तत्त्वं स्यादित्यत आह॰ य
द्विवतस्मादिति। स एवेति ज्ञानगर्भहेत्वाभाससलक्षणानुरोधादिति भावः। सिद्धो द्वयोरपि हेतुत्वादित्यत्र हेतुमा
ह॰ व्यभिचारादेरिति। सद्धेतौ सद्धेतुत्वदशायां सिद्धिदशायामिति यावत्। तथा च व्यभिचरितादेर्हेतुत्वं तदा। २१३

स नस्याद्यदि सिद्धिखंडनहेतुत्वं तन्निष्ठव्यभिचारादेः स्यात् तच्चेन्नास्ति तदा तस्य न हेत्वाभासत्वं किंतु हेतुत्वमेवेत्य
र्थः। अन्ये तु ननु यत्र व्यभिचारादेर्हेतुदोषस्यासत्त्वं हेतुर्यत्र च तस्य सत्त्वं स तदाभास इत्येव हेतुतदाभासविवे
कः स्यादित्यत आहुः व्यभिचारादेरिति। चकारो व्यभिचारादेश्चेत्येवं योजनीयः सोऽप्यर्थः तथा च व्य
भिचारादेरपि सिद्धिखंडनप्रयोजकतया हेत्वाभासत्वमिष्यते। सिद्धिखंडनं च यदि व्यभिचारादिविरहितेऽस्य
तावपि स्वीकृतं तदा तत्र यत्सिद्धिखंडनं तदकुर्वतस्तस्य सिद्धिखंडनाप्रयोजकत्वान्न हेतुदोषत्वं स्यात्तथा च तत्सा
त्वासत्त्वज्ञानेऽपि हेतुतदाभासविवेको न स्यादिति भाव इत्याहुः। मनोयोगादिरपीति यदि च मनोयोगादिकारणत्वे
प्रमाणान्तरमस्ति तदा तद्व्यतिरेकादप्यनुमितिव्यतिरेकस्यावश्यकत्वादसिद्धिवदस्यापि हेत्वाभासान्तरत्वं स्या

दित्यनिष्टंबोध्यम्। कारणाभावत्वस्याविशेषादिति। ननु मास्तु मनोयोगादिकारणमित्यभ्युपगंतारं प्रत्याह सि
द्धेरिति। तथा चापसिद्धान्त इति भावः। गमकतोपयिकपदेनाबाधितत्वासत्प्रतिपक्षितत्वे विवक्षिते तत्प्रतिद्वंद्वि
त्वं बाधसत्प्रतिपक्षयोस्तावदन्यतमत्वं च लक्षणमिति भावः। ननु गमः व्याप्तिविरहनियतत्वेनेति। व्याप्तिविरहनिय
ततावच्छेदकरूपेण व्यभिचारत्वादिना ज्ञातयोरित्यर्थः। विशेषदर्शनस्येवेति। विरोधिविषयतामात्रेण सामग्र्य'
त्व यद्वानुमग्राह्याभावव्याप्यग्रहस्य प्रतिबंधकत्वदर्शनादनयोरपि व्याप्तिविरहव्याप्यत्वेनैव ज्ञातयोः प्रतिबंधकत्व
मित्यभिमानेनैतदुक्तम्। विवक्षितत्वादिति। असिद्धत्वेनेति विशेषः। तच्चेति। ननु व्याप्तिपक्षधर्मताविशिष्टाभावा
दिकमिति भावः। प्रत्येकमेवेति। एवकारो भिन्नक्रमः। प्रत्येकं दोषा एवेत्यर्थः। ननु विशिष्टाभावः विशिष्टाभावमात्र

मित्यर्थः। अत्र हेतुः पूर्वोक्तः प्रत्येकस्य ज्ञानादित्यादिः। परामर्शविषयाभावो नेत्यत्र हेतुमाह व्यर्थविशेष
णत्वादिति। परामर्शांशस्य व्यर्थत्वादित्यर्थः। नस्य परामर्शांशस्येत्यर्थः। एतेन विशिष्टाभावोपि दोषएव वि
शिष्टस्यापि ग्राह्यत्वेन यावत्तदभाववज्ञानस्यापि विरोधित्वात्। न च व्यर्थविशेषणताखंडाभावतदभावात्
राद्यादिना प्रत्येकाभावानुपस्थितावप्युपस्थितत्वाच्च न तेनैवान्यथासिद्धिः। तथा च प्रत्येकमेव दोषो। न
तु विशिष्टाभाव इत्यसंगतमित्यपास्तम्। तस्यापि दोषत्वस्वीकारात्। उक्तयोरनयाश्च ग्रंथस्यासंगतत्वात्
च्चासिद्धेस्त्रिविधत्वोपवर्णनमुपलक्षणम्। अत एव हेतोः पदसंबंधविरहः पदे हेतुसंबंधविरहः। व्या
प्तिपदधर्मतासामानाधिकरण्यविरह इत्यादयोपि परामर्शविषयीभूततत्पदार्थप्रतियोगिकाभा

वि॰ अ॰ न
२१५
215

वाच्यसिध्यात्वर्त्मता एवासंनोवं हेत्वाभासाधिकं स्यादित्यत आह॥ परामर्शविषयाभावव्यनेति। नन्वव्याप्तिवा
र सहचारयोः परामर्शविषयतया तदभावेव्याप्तिचारविरहचाति व्याप्तिः। साध्यस्यापि तादृशातयात तदभावरू
प बाधस्यातिव्याप्तिः। ननु यद्रूपोपस्थित तद्विषयतया परामर्शस्यानुमितिजनकत्वं तद्रूपावच्छिन्नतदभावो विव
क्षितः। साध्यप्रतियोगिकव्याप्तित्वप्रकारोपस्थितव्याप्तिविषयतयाच परामर्शस्यानुमितिव्याप्तित्वावच्छिन्नाभावो
त्र वक्तव्य सिद्धिः। नतु व्याप्तित्वाद्यारवविष्टप्रत्येकाभावः प्रत्येकविषयत्वेन च परामर्शस्य जनकत्वेतच्च परामर्शाद
नुमित्यापत्तेः नियतमेवं हेतुसंबंधासिध्यापेरसंगत्यापातः। न हि हेतुसंबंधत्वप्रकारोपस्थितहेतुसं
बंधविषयतया परामर्शस्यानुमितिजनकत्वमाह हेतुसंसर्गस्य परामर्शसंसर्गविषयाभावत्वेन तत्र प्रकाराभावात्। २१५

नवा व्याप्तित्वप्रकारोपस्थितव्याप्तिविषयतया परामर्शस्य कारणत्वं। विशिष्टावगाहित्वव्यतिरेकात्त्वाद्यावसत्याशस्य
रागानीतनयाविनःपदे लिंगवैशिष्ट्यविषयकस्य लिंगेवतद्पुनरवैशिष्ट्यविषयकस्य मानसादिपरामर्शस्या
नुमित्यजनकतापत्तेः। व्याप्तित्वस्यापूर्वानुपस्थितत्वेन प्रकारत्वासंभवात् तद्गुणवैशिष्ट्यस्यैव व्याप्तिरूपतया
तद्विषयतयाऽनुमितिप्रतिजनकत्वं तस्यापीति भेदः। व्याप्तिचारादिवन्नदृष्टप्रतिबन्धादित्वान्नासत्वस्य विशादको
पाधित्वात्। अतएवेति। असिद्धेरेकरूपत्वाभावादेवेत्यर्थः। अन्यथा बहुवचनं पेडत्पन्न स्यादिति भावः। नन्वि
ति। व्योमकमलं सुगन्धि कमलत्वादित्यादावेवाश्रयासिद्धिर्व्याप्या। तत्र व्योमकमलादिकमसिद्धमिति कथं त
द्विरहतज्ञानाभावादपदत्यर्थः। व्योमकमलमिति। निषिध्यतइति शेषः। अपार्थकमिति। तथा च नाश्रयासिद्धिरूपा व

वि॰ अ॰ न॰
२१६
216

तत्किंत्वपार्थकमेवेत्यर्थः। नन्वेवमाश्रयासिद्धिः कुत्रेत्यत आह॰ आश्रयेति। सुवर्णमयोऽद्रिरग्निमान् धूमवत्त्वादि
त्यादौ सुवर्णमयत्वादिविशेषणासिद्धिराश्रयासिद्धिरसंकीर्णेत्यर्थः। एवं च व्योमकमलपदमपि प्रसिद्धकमलता
त्पर्य्येणोच्चार्यते तदा तत्र व्योमीयत्वविशेषणासिद्ध्याश्रयासिद्धिरेव॰ अग्रे सुवर्णमयत्वासिद्धिवदिति ध्येयम्। न
न्वेदमपार्थकम्। आश्रयासिद्धेस्तत्रोपजीव्यत्वात्। अत एव धर्बांस्यापि दोषत्वं ह्यनुपहृतविशेषणोपहृतात् तदसिद्धि
राश्रयासिद्धिरिति तत्त्वं। तद्धि रहस्यकारणाभावत्वेन स्वरूपसत एव प्रतिबंधकतया हेत्वाभासत्वाभावात्। ननुप
हृतावच्छेदकधर्म्माभावो न हेत्वाभासः। तज्ज्ञाने सत्यपि पक्षे धर्म्मिणि लिंगपरामर्षसत्वेनानुमितिप्रतिबंधाभावात्।
न च हेतुपहृतावच्छेदकसामानाधिकरण्यस्य परामर्षविषयतया तदभावज्ञानस्य तद्विशिष्टपरामर्षविषय २१६

कतया तद्विशिष्टावगाह्यनुमितिप्रतिबंधकत्वेन हेत्वाभासत्वमिति वाच्यम्। एवं हि साध्यपक्षतावच्छेदकसामाना
धिकरण्यस्यानुमितिविषयतया पक्षतावच्छेदकधर्म्माभावज्ञानस्य ग्राह्याभावज्ञानत्वेनैव प्रतिबंधकतया त
स्य बाधान्तर्भावापत्तेः। न च साध्याभाव एव बाध इति वाच्यम्। पक्षतावच्छेदकसाध्यसामानाधिकरण्याभाव
स्यापि बाधबहिर्भूतत्वापत्तौ हेत्वाभासाधिक्यापत्तेः। न च सोप्याश्रयासिद्धिरेवेति वाच्यम्। परामर्षविषयाभावा
भावत्वेनैतस्य तदविघटकतयाऽसिद्धिबहिर्भूतत्वात्। तत्राहुः। हेतुपक्षतावच्छेदकसामानाधिकरण्यस्य प
रामर्षविषयतया तदभावस्याश्रयासिद्धिरूपत्वं। तादृशसामानाधिकरण्यस्यानुमितिविषयतया तदभावस्य
बाधत्वासंभवात्। पक्षतावच्छेदकाभावपक्षतावच्छेदकसाध्यसामानाधिकरण्याभावादयस्तु ग्राह्याभावतया

तदभावोप्यसिद्धिरेवस्यादितिवाच्यम्। लिंगोपहितलैंगिकज्ञानपक्षे लिंगव्याप्त्यादेरपिग्राह्यतया ३

खि॰ अ॰ न॰ बाधान्तर्भूता एवेति। वयं तु पक्षतावच्छेदकाभावस्य व्याप्याभाववत्तया यदि बाधत्वं तदा परामर्षविषयाभाव-

२१७ तयाः सिद्धत्वमेव कुतो न स्यात्। तन्न व्याप्याभावातिरिक्तपरामर्षविषयाभाववत्त्वमसिद्धत्वमिति वाच्यम्। परामर्षविष-

217 याभावातिरिक्तव्याप्याभाववत्त्वं बाधत्वमित्यस्यापि सुवचनात्। नन्वेवं साध्यस्यापि परामर्षविषयतया तदभा-

वस्यापि बाधत्वापत्तिरिति तुल्यम्। तस्माद्यज्ज्ञानं परामर्षविघटनद्वारानुमितिं प्रतिबध्नाति स न बाधः। यज्ज्ञानं च

परामर्षे जाते साक्षात्प्रतिबंधकं स एव बाधः। अत एव लिंगोपहितलैंगिकज्ञानपक्षे स्वरूपासिद्ध्यादीनां न बा-

धत्वं। प्रवर्तते च कोचनमयत्वाद्यभावज्ञानं। तद्विशिष्टपक्षकानुमितौ तद्विशिष्टपक्षधर्मतावगाहिपरामर्षविघटनद्वा-

रैव प्रतिबंधकं न तु साक्षात्। तादृशपरामर्षस्य पक्षे तद्वैशिष्ट्यविषयतानियमेन तदनन्तरं पक्षे तदभावज्ञानासंभवात्॥ २१७

पक्षे वह्न्यभावज्ञाने च कांचनमयत्वविशिष्टपक्षधर्मतावगाहिपरामर्शाभावादेवानुमितिप्रतिबंधः। तथा च प
क्षतावच्छेदकाभावस्य ग्राह्याभावत्वेपि न बाधत्वं किं त्वाश्रयासिद्धित्वमेव। कदापि साक्षात्प्रतिबंधकत्वाभावादिति। प
र्वतांशेऽनुमित्यप्रतिबंधेपि विशिष्टविषयकानुमितिप्रतिबंधकत्वेनास्य हेत्वाभासत्वं व्यर्थविशेषणस्थलेऽनुमित्युत्पा
देऽप्युद्देश्यानुमितिप्रतिबंधकत्वेन हेत्वाभासत्ववत्। एवं च कांचनमयत्वविशिष्टत्वेन ज्ञानेपि पर्वतत्वाभावज्ञानपर्वत
त्वसुवर्णमयत्वसामानाधिकरण्याभावज्ञानादीनामपि परामर्शप्रतिबंधकत्वात्तद्विषयाभावानामाश्रयासिद्धित्वमेव।
स्वरूपासिद्धिव्याप्यत्वासिद्धिभिन्नासिद्धित्वेन तेषामनुगमश्चेति न विभागव्याघात इत्यवधेयम्। व्याप्तिविरहस्त्विति। अ
संकीर्ण इति शेषः। आदिपदाद्व्यर्थविशेष्यत्वपरिग्रहः। यथा वा च व्याप्यत्वासिद्धिस्तथाग्रे वक्ष्यते। ताननुव्यर्थविशेषणा

दावसंकीर्णतायथा तथास्तु। सव्यभिचारादिहेतौ व्यभिचारादिसंकीर्णव्याप्यत्वासिद्धेः कथम्। अयं किंचिद्व्याप्तिविर
हस्य सद्धेतुसाधारणत्वात्। वह्न्यादिसमानाधिकरणत्वंतादृशाभावाप्रतियोगिधूमादिसामानाधिकरण्यरूपमन्यत्र व्या
प्तेरसिद्धेः। न च साधनसमानाधिकरणात्यन्ताभावप्रतियोगित्वं साध्ये व्याप्यत्वासिद्धिरिति वाच्यम्। अव्यभिचरितसा
मानाधिकरण्यस्य व्याप्तित्वेन विशेषणीभूताव्यभिचारविरहरूपतयाऽस्य व्यभिचारान्तर्भूतत्वात्। विशेष्यरूपसामा
नाधिकरण्यविरहस्य च विरुद्धत्वात्। तथा च विशिष्टविरहस्य तत्त्वं वाच्यम्। तत्र चाप्रसिद्धिरेवेति चेत्। मैवं। हेतुसा
मानाधिकरण्यविशिष्टस्य हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगित्वस्याभावो व्याप्यत्वासिद्धिः। न च विशेष्यविरहज्ञान
स्यैव व्यभिचारज्ञानतया प्रतिबंधकत्वमिति वाच्यम्। हेतौ साध्यसामानाधिकरण्ये गृह्यमाणे साध्येपि हेतुसामानाधिकरण्य २१८

स्यसमानसंविसंवेद्यतयाग्राह्यत्वेन तद्विशिष्टानावग्रहस्यापि प्रतिबंधकत्वात्। न च प्रतियोग्यप्रसिद्धिः सव्यभिचारादिहेतुव्यापके प्रमेयत्वादौ तदप्रसिद्धेः। न चावृत्तिविरुद्धे तथाप्यप्रसिद्धिः तद्व्यापकाप्रसिद्धेरेवेति वाच्यम्। तस्य व्याप्यत्वासिद्धत्वेनासंग्राह्यत्वेनादोषात्। विरुद्धत्वादिनैव तस्य हेत्वाभासत्वादिति दिक्। स्वोक्त एवाचार्यसम्मतिमाह· तदुक्तमिति। ननु अनौपाधिकत्वस्य व्याप्तिरूपत्वेन तदभावरूपत्वेनोपाधिः व्याप्यत्वासिद्धिर्न तु नीलधूमादावुपाधिरस्तीति न तत्र व्याप्यत्वासिद्धिरित्यत आह। उपाधिस्त्विति। न च प्रयोजक एव किमित्यसांकर्येनोक्तमित्यत आह· अप्रयोजकेति। प्रतिकूलेति। न च तद्विषयस्य तर्करूपमेव ज्ञानं प्रतिबंधकमिति तस्य हेत्वाभासतापत्तिः। तज्ज्ञानस्य नियमतोऽयथार्थत्वात्। अनुमितिप्रतिबंधकयथार्थज्ञानविषयस्यैव हेत्वाभासत्वादिति केचित्। अपरे तु यद्विषयत्वेन ज्ञान

चिं॰ अ॰ त॰
२१९
219

स्यप्रतिबंधकतावच्छेदकं तस्यैव हेत्वाभासत्वंमत एव सिद्धसाधनस्यानुमितिप्रतिबंधकत्वेपि साध्यं न हेत्वाभासः।
नचैह तर्कविषयविषयकत्वं तथा। तदर्थविषयकज्ञानान्तरादप्यनुमितिप्रतिबंधापत्तेः। किंच विषयनिरपेक्षानि
ष्टप्रसंगत्वेनैव तर्कस्य तथात्वंमत एव समानविषयकादपि तर्कादिष्टापादनदशायां न प्रतिबंध इत्याहुः। इह यथा व्या
प्तिविरहज्ञानं पक्षधर्मताविरहज्ञानं च साक्षात्परामर्शविघटकं तथा व्याप्तिविरहव्याप्यवत्वज्ञानं पक्षधर्मताविरह
त व्याप्यवत्वज्ञानं च। विरोधित्वेनाविशेषात्। तथा च तदुभयविरहवत्तदुभयविरहव्याप्यवत्वं कथं न हेत्वाभासान्तरमिति
चिन्त्यमिति वदन्ति। अत्र केचित्। तद्विरहव्याप्यवत्वज्ञानं व्याप्तिपक्षधर्मताप्रत्यक्षादिविरोधितया तथा व्याप्त्याद्यनुमिति
विरोधितया वा। आद्ये ह्यसंभवः। न हि व्याप्त्यादिविषयके प्रत्यक्षे शाब्दज्ञाने वा तदभावव्याप्यवत्वधीर्विरोधिनी। प्रत्यक्षस्या २१९

त्याभावप्रत्यक्षस्यैव शाब्दज्ञाने साध्याभावज्ञानमात्रस्यैव प्रतिबंधकत्वात् । अन्ये तु सत्प्रतिपक्षत्वमेवाविरुद्धोऽन
य व्याप्यज्ञानात् । न चैवमुपाधिना व्यभिचारानुमितिरपि विरोधिनी न स्यादिति वाच्यम् । योग्ये धर्म्मिणि व्यभिचारस्यापि
योग्यत्वे विशेषदर्शनानन्तरं पुरुषप्रत्यक्षवद्व्यभिचारप्रत्यक्षस्यापि तत्रोत्पत्तेः । अयोग्ये सत्प्रतिपक्ष एवेति वदन्ति ॥ तन्न ॥
व्याप्त्याद्यनुमितिप्रतिबंधकत्वेनैव हेत्वाभासत्वात् न च सत्प्रतिपक्षत्वमेव वह्नौ धूमव्याप्तिविरहव्याप्यवत्त्वस्य धूम
व्याप्त्यनुमितौ सत्प्रतिपक्षतया प्रतिबंधकत्वेपि वह्निना धूमानुमितौ सत्प्रतिपक्षत्वात् । धूमविरहव्याप्यस्यैव स
ज्ञान त्प्रतिपक्षत्वात् न तु धूमव्याप्तिविरहव्याप्यस्य । तस्य व्याप्तिविघटनद्वारा धूमानुमितिप्रतिबंधकत्वात् । सत्प्रतिपक्ष
स्य साक्षात्प्रतिबंधकत्वात् । अन्यथा व्याप्तिविरहादेरपि बाधत्वापत्तेः । ग्राह्याभावस्यैव बाधत्वात् । न च व्याप्तिरूप

ग्राह्याभावो न बाधः । किंत्वनुमितिविषयाभावः तस्यैव साक्षात्प्रतिबंधकत्वात् अस्यत्वपरंपराप्रतिबंधकत्वा
दिति वाच्यम् । एवं ममापि व्याप्तिरूपग्राह्याभाववव्याप्यवत्वं न सत्प्रतिपक्षः । किंत्वनुमितिविषयाभाववव्याप्यवत्वं तस्यै
व साक्षात्प्रतिबंधकत्वादस्य च परंपराविघटकत्वादिति तुल्यम् । तस्माद्यथा व्याप्तिग्रहे व्याप्तिविरहज्ञानस्य बाध
ज्ञानत्वेन प्रतिबंधकत्वेपि न धूमाद्यनुमितौ बाधत्वं तथा व्याप्तिग्रहे व्याप्तिविरहव्याप्यवत्वग्रहस्य सत्प्रतिपक्षज्ञान
त्वेन प्रतिबंधकत्वेपि न धूमाद्यनुमितौ सत्प्रतिपक्षत्वं । किंतु व्याप्तिविरहादिवद्धेत्वाभासान्तरमेवेति ॥ अपरे तु । तयोर
घ पि व्याप्यत्वासिद्धत्वमेव । ततो नाधिक्यं । न चाननुगमः स्वरूपासिद्ध्याश्रयासिद्धिभिन्नासिद्धित्वेन स्वरूपसतेकेन
रूपेण सर्वसंग्रहादित्याहुः । तदपि न । तत्र हेत्वाभासव्यवहाराभावेन वक्ष्यमाणदोषाद्धेत्वाभासत्वाभावेन च व्या २२०

प्यत्वासिद्धत्वाभावात्॥ वयं तु ब्रूमः। स एव हेत्वाभासो यस्य प्रत्यक्षज्ञाने सत्यवश्यमनुमितिप्रतिबंधः। न च यज्ज्ञा
ने सति कदाचिदनुमितिप्रतिबंधः सोपि तथा। उपाधेरपि हेत्वाभासतापत्तेः। व्याप्त्यादिविरहव्याप्यवत्त्वज्ञा
ने च सति नावश्यमनुमितिप्रतिबंधः तज्ज्ञाने सत्यनुमितिरूपव्याप्तिग्रहप्रतिबंधेपि प्रत्यक्षज्ञात्वव्याप्तिग्रहाद
नुमित्युत्पत्तेः। नहि व्याप्त्यविरहव्याप्यज्ञानं प्रत्यक्षप्रतिबंधकं। पानत्वाभाववव्याप्यत्वं स्वत्वग्रहेपि पीतप्रत्यक्षो
दयात् तानवात् तज्ज्ञानं शाब्दज्ञानप्रतिबंधकं। योग्यतादिज्ञानाविरोधित्वात्। अत एव स्थाणुत्वाभावव्याप्यकर
त्रमानेतरमयं स्थाणुरेवेत्याप्तवचनात्स्थाणुत्वनिश्चयोऽनुभवसिद्धः। अत एव बाधप्रतिपक्षातिरिक्तः प
रामर्शविषयाभाववएव हेत्वाभासः शास्त्रकारातिसंधानविषयः। तादृशाश्चाश्रयासिद्ध्यादिरेवतेन व्याप्त्यादि

चि॰ अ॰ न॰ विरहव्याप्यवत्त्वस्य ज्ञायमानतया साक्षात्प्रतिबंधकत्वेपि न हेत्वाभासत्वं न च शास्त्रकारस्य तथाभिसंधाने व
२२१ मानाभावः। तत्र हेत्वाभासव्यवहारस्यैव मानत्वादिति समाधानमनुपादेयम् उक्तेनैवोपपत्तेरिति। पक्षे साध्य
२२१ सिद्धौ सिद्धसाधनमेव। तदभावसिद्धौ स्वरूपासिद्धिरेव। तदसिद्धावज्ञानरूपासिद्धिरेवेति साध्याविशेषस्य
नाधिक्यमाशंकनीयम्। साध्याभाववदिति। प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नसाध्याभाववत्पक्षक
त्वमित्यर्थः। एवमग्रिमलक्षणेपि पक्षाभावपदं तादृशाभावपरं बोध्यम्। ननु चेदं बाधितत्वं केवलान्वयिन्यप्रसिद्ध
मित्यबाधितत्वमपि तत्र नास्तीति तत्र तद्बोधकनिगमनस्यानवकाशः स्यादित्यपरितोषादतिरिक्तविषयतावा
दिमतेन लक्षणान्तरमाह। पक्षनिष्ठेति। पक्षनिष्ठं यत्प्रमाविषयत्वं विशेषणताविशेषः तत्प्रकारीभूताभावप्रति २२१

योगिसाध्यकत्वमित्यर्थः। विवक्षितेति। बाधज्ञानस्य हेतुविषयतयाप्रतिबंधकत्वाभावात्तन्मात्रविषयतयै
वप्रतिबंधकत्वादिति भावः। प्रमात्वेनेति। तथा च तत्प्रमात्वं दोषस्तज्ज्ञानस्य प्रतिबंधकत्वादिति भावः। अप्रमा
यामित्युपलक्षणं प्रमायामप्रमात्वनिश्चयेऽनुमित्युत्पत्तेश्चेत्यपि द्रष्टव्यम्। ननु पक्षे साध्याभावानुपस्थितौ वि
रोधाभावादप्रतिबंधकत्वं। उपस्थितौ च हेतुविषयत्वे व्यभिचारः। तदविषयत्वे त्वसिद्धिरिति नासांकर्य्यं ज्ञाना
पि बाधस्येति शंकते। अथेति। आश्रयासिद्धिरिति संप्रदायमतेन बोध्यम्। पक्ष इति। तथा च फलबलात्पक्षीय
व्यभिचारसंशयस्याप्रतिबंधकत्वेपि तन्निश्चयस्य तत्त्वं स्यादेवेति भावः। अनुमित्युत्पादेनेत्युपलक्षणम्। तज्जनक
परामर्षेणेवेति द्रष्टव्यम्। विशेषेति। विरोधीत्यर्थः। एकदेशिमतेनासांकर्य्यं शंकते। अथेति। प्रत्यक्षस्थले लाघवात्स

वि॰ अ॰ म॰
२२२

मात्वावच्छेदेनैवोपनयसहकारित्वकल्पनादिति भावः। अत एवेति। विशिष्टाप्रसिद्ध्या तदंशावप्रसिद्धेः तस्य सु
त्रसंशयप्रयोग्यत्वाभावेनाश्रयासिद्धिरपि नेत्यर्थः। व्यधिकरणधर्मावच्छेदेन बाधवद्व्यभिचारोपि संभवत्येव मता
न्तरे तु बाधोपि नेत्याशयेन समाधत्ते। वस्तुत इति। अज्ञानादिति। विशिष्टवैशिष्ट्यावगाहिज्ञाने विशेषणतावच्छेद
कप्रकारकविशेषणज्ञानस्यैव कारणत्वमिति मतेनेदमुक्तं विशेष्ये विशेषणं तत्र च विशेषणान्तरमिति न्यायेन
विशिष्टवैशिष्ट्यावगाहिज्ञानसंभवादिति ध्येयम्। न चैवं धूमेन वह्न्यनुमितौ वह्नित्वानुमितिरपि न स्यात्। धूमे त
न्निरूपितनिश्चितव्यभिचारादिसत्त्वात्। अथ साध्यतावच्छेदकावच्छिन्नसाध्यनिरूपितव्यभिचारादिकं दोषः। तथा
प्यत्र तेपि तुल्यमित्यपरितोषादाह। नचेति। नच साध्याभाव इति। तथाच कांचनमयवह्न्यभावोपि न बाध इति भावः। २२२

222

ननु साध्यतावच्छेदकस्य हेतुनिष्ठव्याप्त्यनिरूपकत्वेन तद्व्यक्तित्वस्यादोषत्वेपि वह्नौ कांचनमयत्वाभावज्ञान
स्य ग्राह्याभाववज्ज्ञानत्वेन प्रतिबंधकत्वं स्यादेव तथा चान्यत्र साध्याभावस्यापि हेत्वाभासत्वं ग्राह्याभाववत्वाविशे
षात्तज्ज्ञानस्यापि प्रतिबंधकत्वादित्यस्वरसादाह· वस्तुतस्त्विति। तथा च वह्नौ कांचनमयत्वानुमितिसामग्रीविरहा
न देवं तज्ज्ञानं न तु बाधादिति भावः। नन्वेवं प्रत्यक्षमात्रस्यायथार्थत्वप्रसंगः। सर्वत्र पूर्वोपस्थितसकलभानापत्तेः।
न चादृष्टादिकं नियामकं। प्रत्यक्षेपि तुल्यत्वात् फलव्यतिरेकस्याप्यप्रसिद्धेः। लाघवेन प्रमाणत्वावच्छेदेनैवोप
नयसहकारित्वकल्पनाच्च। अथोपनीतभानसामग्री प्रत्यक्षादौ प्रत्यक्षादिप्रमाणसामग्रीसहाया वाच्या न तु
स्वातंत्र्यात् प्रत्यक्षादिसामग्र्यभावेपि भानापत्तेः। तथा चोपनीतभानस्थलेपि ज्ञानलक्षणेंद्रियप्रत्यासत्तिसत्वा

वि॰ अ॰ ग॰ दत्तत्रूपनीतांशोपि तत्प्रत्यक्षम्। अनुमितिसामग्री तु व्याप्त्यादिका। न चोपनीतस्थले सास्तीति कथं तदसहायात्
२२३ चोपनीतज्ञानसामग्र्याः कथं वा साध्यीऽनुमितिर्विषयैक्यं विना सामग्र्योरन्योन्यसहकारित्वस्यातिप्रसंगेनामा
223 नकत्वादिति चेत्। एवं तर्हि ईश्वरानुमानेकत्वैकत्वमपि न ज्ञासेत। न च लाघवोपनीतज्ञानसामग्र्याः प्रमाणमात्र
सहकारित्वीतिनत्तदुपनीतं ज्ञासत इति वाच्यम्। तस्या अपि स्वतंत्राया अजनकतया प्रत्यक्षादिसामग्रीसहिताया
एव जनकत्वाभ्युपगमप्रसंगात्। तस्याश्च प्रकृते व्याप्त्यादिरूपाया अभावात्। न च व्याप्त्यादिसामग्रीसाहित्यमात्रं
विवक्षितं न तु तद्व्याप्त्यादिसामग्रीसाहित्यं गौरवादिति वाच्यम्। अत्रापि तुल्यत्वात्। यथा च तत्रैकत्वं ज्ञासते तथाव
गतइत्यपरितोषादाह॰ अपि चेति। तुल्यमिति। तथा चोद्देश्यानुमितेरज्ञासत्वाभावाद्दज्ञासत्वप्रयोजकत्वेन। २२३

पितोपनीतस्यान पक्षेपि बाधो दोषः। उद्देश्यानुमितिप्रतिबंधकतया तदाभासता प्रयोजकतया वा हेत्वाभास
त्वाभ्युपगमादिति भावः। तत्र बाधकानामिति। तथा च बाधकाभासत्वमेव सामान्यतो दृष्टाभासत्वे प्रयोजकत्वाद्बा
धरूपो दोष इति भावः। बाधस्येति। बाधकगताभासत्वरूपस्येत्यर्थः। वह्नित्यादिकमेवेति। वह्निरनुष्ण इत्याद्यनु
मान इति भावः। तदेति। हेतोः साध्याभावव्याप्यसामानाधिकरण्ये साध्यसमानेपक्षे साध्याभावव्याप्यवत्त्वस्यापि
साधनात्। सामानाधिकरण्यस्य तदधिकरणाधिकरणत्वरूपत्वात्। अन्यथा विरोधिविषयत्वाभावादिति भा
वः। अनैकान्तिकत्वमेवेति। वस्तुतः साध्याभावव्याप्यवत्त्वबुद्धेरनन्यथासिद्धत्वं न व्याप्यबुद्धेरन्यथासिद्धत्वं विना। साध्य
अन्यथा सत्प्रतिपक्षस्यैव सत्त्वप्रसंगात्। तथा च तदेव तत्र दोषो न तु स्वरूपो बाधः। तेन रूपेण कश्चिदपि प्रतिबं

स्वरूपसत एव प्रतिबंधकत्वादिति। साध्याभावप्रमाबाध इति मतेनेदं बोध्यं।२

वि॰अ॰भ॰ धकत्वाकल्पनात्। अत एव न मणिमंत्रादिवदुभयप्रतिबंधकत्वमिति भावः। हेत्वाभासान्तरतापत्तेः। पक्षनिष्ठसाध्याभा
२२४ वस्येति शेषः। तस्य तदनुपगतबाधानन्तर्भूतत्वादिति भावः। अन्यत्रेति। प्रत्यक्षादावित्यर्थः। अत्रैव तथा दूषकत्वकल्पने
224 गौरवमिति भावः। ज्ञानमात्रादिति। ज्ञानमात्रस्यार्थनिश्चयरूपत्वे प्रामाण्यग्रहवैयर्थ्यात् भ्रमत्वेनापि ज्ञायमानस्यार्थनिश्च
यत्वप्रसंगश्चेत्यर्थः। तथाचेति। अत्र पक्षे साध्याभावनिश्चयो यदि व्यभिचारज्ञानत्वेनैव सद्दोषो वाच्यः। तदा तदुपजीव्यत्वेप न
क्षे साध्याभावज्ञाने प्रमात्वनिश्चयोऽपेक्षणीयः। यदि च बाधत्वेनैव सद्दोषो वाच्यः। तदा तत्कृताधिकबलत्वेन सोऽप्यपेक्ष
त्वेन२ णीय इत्यन्योन्याश्रयेणोपजीव्यत्वेनाधिकबलत्वेन वेति विकल्प उक्तः। अधिकबलत्वं चाधिकं च तद्बलं चेति कर्मधारयो न तु
बहुव्रीहिः। तेनाधिकबलत्वस्य प्रमात्वनिश्चयधर्मत्वलाभ इत्यवधेयमित्याहुः। व्यभिचारो व्यभिचारनिश्चयः। उपजी २२४

व्यत्वादिति। ननु पक्षे साध्याभावज्ञानस्य प्रमात्वं साध्याभाववति साध्याभावप्रकारकत्वं। तथाच तन्निश्चयोपि पक्षे
साध्याभावनिश्चय एव। अन्यथा पक्षनिष्ठसाध्याभाववत्त्वांशाविषयत्वाभावे तस्यानुमितिविरोधिताया अप्यसंभव
त्। एतेन यत्र विशेष्यावृत्त्यप्रकारकत्वादिरूपप्रमात्वग्रहादधिकबलत्वं। तत्र व्यभिचाराविषयत्वमित्यपास्तम्। त
था सति विरोध्यविषयकत्वेन प्रतिबंधकत्वासंभवात्। तस्मात्तस्यापि साध्याभावसहचरितहेतुविषयतया व्यभि
मु चारज्ञानत्वेनैव दोषत्वमुपेयम्। न तु साध्याभावज्ञानप्रमात्वज्ञानत्वेन। तथा प्रतिबंधकत्वाकल्पनात्। तज्ज्ञानस्यैव व्य
भिचारज्ञानतया उपजीव्यत्वस्याप्यभावात्। यदि च तन्निश्चये हेतुर्न भासते तदाऽसिद्धिरेवेति चेत् यत्र परामर्षानं न.
तरं पक्षे साध्याभावज्ञानस्य प्रमात्वस्मरणं शाब्देन वा तज्ज्ञानं तत्र तस्य हेतुविषयतया व्यभिचाराविषयत्वात्। न च त

दाऽसिद्धिसां कार्यमेवेति वाच्यं। परामर्शस्य हेतुविषयकस्य तदानीमपि सत्त्वेन तदसंभवात्। किंच शाब्दादौ तज्ज्ञान
स्य तत्त्वेनैव प्रतिबंधकत्वकल्पना व्यभिचारादिसां कार्येपि न दोषत्वं। मणिमंत्रवदुभयोरप्यन्यत्र प्रतिबंधकत्वसत्त्वे
सामर्थ्यत्वेन विनिगमकाभावात्। अपि च परामर्शोत्तरकालीनस्य तज्ज्ञानस्य यदि न बाधत्वेन साक्षात्प्रतिबंधकत्वं क
ल्प्यते तदाऽव्यवहितोत्तरक्षणे विनश्यदवस्थेन परामर्शेणानुमितिजननापत्तिः। व्यभिचारज्ञानस्य परामर्शविष
यकस्यं तस्मिन्नसत्यकिंचित्करत्वात्। न वा परामर्शोत्तरं व्यभिचारज्ञानावकाशोपि। अव्यभिचरितसामानाधिकरण्य
रूपव्याप्तिविषयकपरामर्शस्यैव व्यभिचारग्रहपरिपंथित्वात्। भावाभावज्ञानयोरन्योन्यप्रतिबध्यप्रतिबंधकत्वाभा
वदर्शनात्। यत्र च पक्षतावच्छेदकसाध्यसामानाधिकरण्याभावग्रहस्य पांडुरवह्निमानित्यादौ पक्षीयवह्निमा २२५

त्रविरहग्रहस्य वा ग्राह्याभावग्रहत्वेनानुमितिप्रतिबंधकत्वं। तत्र तज्ज्ञाने हेतुविषयत्वेपि साध्यतावच्छेदकावच्छि
न्नसाध्याभावसामानाधिकरण्यरूपव्यभिचारविषयत्वासंस्पर्शाद्बाधस्य व्यभिचारासंकीर्णत्वं। एतेन पक्षे साध्या
भावज्ञाने भ्रमात्वस्य ज्ञानं न प्रत्यक्षेण तस्य परतो ग्राह्यत्वात्। किंत्वनुमानेन। तच्च पक्षनिष्ठसाध्यव्याप्यवत्वग्रहेण
सत्प्रतिपक्षितं साध्याभाववत्वघटितस्य तद्भ्रमात्वस्य ग्रहे कथं समर्थं स्यात्। न चानुमानयोः पक्षभेदे कथं सत्प्रति
पक्षत्वमिति वाच्यं। विषयविरोधस्यैव तत्र तंत्रत्वेन पक्षाभेदस्यातंत्रत्वादित्यपास्तम्। अस्मत्पादिरूपस्य प्रमात्वग्रहस्य
संभवात्। अत्रेदं चिन्त्यम्। भवतु बाधस्य व्यभिचारासांकर्यं तथापि तद्भ्रमात्वज्ञानं नानुमितिप्रतिबंधकं। मानाभावात्।
विरोधिज्ञानस्य सत्प्रतिपक्षादौ तथा प्रतिबंधकत्वाकल्पनात्। किंतु स्वरूपसत्साध्याभावज्ञानमेव। नन्वेवं पातन्त्र

मानंतरं शंखत्वादिनाऽपीतत्वानुमितिर्न स्यात्। न चाप्रामाण्यशंकाशून्यं ज्ञानं प्रतिबंधकं। तच्छंकायास्तत्रोत्तेजकत्व
पत्वात् साध्यज्ञाने सिसाधयिषावत्। पीतत्वभ्रमस्याप्रामाण्यशंकास्कंदित एव। अन्यथाऽपीतत्वानुमितेरनुत्पत्तेरिति वा
च्यम्। एवं तर्हि पीतत्वज्ञानेऽप्रामाण्यसंदेहोऽपि न स्यात्। तस्यापि शंखे पीतत्वाभावे पर्यवसन्नतया तत्स्वरूपं तदनास्कंदिते न वत्य
एपा पीतत्वज्ञाने नैव निवर्त्तनीयत्वात्। एवं चाप्रामाण्यानुमितिरपि न स्यात्। तस्मादनन्यगत्या प्रमात्वग्रह एव प्रतिबंधक इति
चेत्। अप्रामाण्यग्रहसामग्र्या अप्युत्तेजकरूपत्वात्। उत्तेजकत्वप्रतिबंधकत्वयोः फलबलकल्प्यत्वात्। तथा च तदसंव
लितस्य साध्याभावग्रहस्य प्रतिबंधकत्वमतो नोक्तदोषलेशावकाशः। न च तादृशसाध्याभावग्रहापेक्षया तत्प्रमात्व
ग्रहस्य लाघवात् प्रतिबंधकत्वं तस्याभावादिघटितत्वादिति वाच्यं। तस्य गुरुत्वेऽप्यावश्यकत्वात्। अन्यथा साध्याभावज्ञाने २२६

अप्रामाण्यशंका मूलस्थस्य विशेषणस्येत्यर्थः॥
ल

प्रमात्वज्ञानं यत्राप्रामाण्यशंकास्कंदितं तत्राप्यनुमितिप्रतिबंधापत्तिः। न च तत्प्रमात्वज्ञानमपि प्रमात्वेन ज्ञातं प्रतिबं
धकमिति शक्यं वक्तुमनवस्थाप्रसंगात्। एवं रजतत्वेनेदं रजतमिति ज्ञानेऽपि विशेषदर्शने न यत्र रजतत्वग्रहः। तत्रापि रज
तत्वाभावग्रहस्याप्रामाण्यशंकास्कंदितत्वे नैवाप्रतिबंधकत्वं। अन्यथा रजतत्वग्रहानुपपत्तेः। न तु विरोधिविशेषदर्श
नस्याप्युत्तेजकतया तत्संवलितस्याप्रतिबंधकत्वं। तथा सति बाधस्यानुमितिप्रतिबंधकत्वानापत्तेः। तृतीयलिंगपराम
र्शरूपविशेषदर्शनरूपोत्तेजकसंवलिततया तस्याप्रतिबंधकत्वात्। यदि नैवं तदाऽप्रामाण्यशंकास्कंदितस्यापीतत्व
समानाधिकरणशंखत्वज्ञानस्य व्यभिचारज्ञानत्वेनापीतत्वानुमितावप्रतिबंधकत्वा व्यभिचारज्ञानस्यापि प्रमात्वेने
व ज्ञातस्य प्रतिबंधकत्वं कल्प्येत। शंखत्वानुमितशुक्लत्वेनापीतत्वानुमानेवाप्रामाण्यशंकाकांतस्य शुक्लत्वाभावग्रह

स्यस्वरूपासिद्धिज्ञानतयाऽप्रतिबंधकत्वात्ज्ञानस्यापिप्रमात्वेनैवज्ञातस्यप्रतिबंधकत्वंकल्प्येत।किंचयत्रयोग्येऽ
योग्येचलिंगेऽनुमितिरूपव्याप्तिग्रहसामग्र्यनंतरंव्याप्यत्वासिद्धिनिश्चयस्तत्रतन्निश्चयस्यबाधत्वेनैवप्रतिबंधक निश्चय
त्वंवाच्यं।तथाचतत्प्रमात्वाग्रहात्तस्यव्याप्तिग्रहप्रतिबंधकत्वंनस्यात्।नस्याद्ग्रहेत्वाभासता।तज्ज्ञानेसत्यप्यनुमि
वा त्युपपत्तेः।तथाऽसिद्ध्यादिष्वपितत्रज्ञानप्रमात्वमेवतत्रहेत्वाभासःस्यात्।ततश्चपरामर्षविषयाभावत्वेनसर्वासिद्धि
संग्रहोऽपिसाधुसमर्थितःस्यात्।यदिचसाध्याभावग्रहस्यनानुमितिविरोधित्वंतदाविरोधिसामग्रीत्वेनसत्प्रतिप
क्षस्याप्यनुमितिविरोधित्वंनस्यात्।ननुप्रमात्वेनाग्रहीतमपिसाध्याभावज्ञानंनप्रतिबंधकं।तद्ग्रहंविनाऽधिकबल
ताभावादितिचेत्।न।अनन्यथासिद्धसाध्याभावग्रहत्वेनैवतस्याधिकबलत्वात्।नहिप्रमात्वग्रहाधीनमेवाधि

कबलत्वं। अन्यत्र तथाऽदर्शनात्। किंतु स्वभावाधीनं। अत एवानुमानापेक्षया प्रत्यक्षस्याधिकबलत्वेन तयोर्न
सत्प्रतिपक्षत्वं। वस्तुतस्तु विरोधिविषयत्वे सत्यन्यूनबलत्वमेवानुमितिप्रतिबंधकत्वे तंत्रं। न त्वधिकबलत्वं। अन्य
थासत्प्रतिपक्षज्ञानमपि प्रमात्वेनागृहीतं न प्रतिबंधकं स्यात्। न हि संभवति विरोधिविषयत्वाविशेषेपि साक्षादेव हि
विरोधिविषयं साध्याभावज्ञानं तत्प्रतिबंधाय प्रमात्वज्ञानमपेक्षते न पुनः परंपरया विरोधिविषयं साध्याभावव्या
प्यवत्त्वज्ञानमिति। न च तदपि गृहीतप्रामाण्यमेव प्रतिबंधकमिति वाच्यं। एकत्र विरुद्धोभयव्याप्यवद्यज्ञाने प्रमात्वग्र
हस्याशक्याभावात्। अपसिद्धांताच्च। अत एव यदि साध्याभावज्ञानमुक्तरूपं बाधनिश्चयः स्यात् तदा सत्प्रतिपक्षस्थ
ल इव नैकस्मिन्नपि फलोदयः स्यात्। विरोधिज्ञानविद्यमानताया अविशेषात्। तथाँ बाधेनाधिकबलवत्त्वमन्यहेतोरित्यपि व

चि॰अ॰प॰
२२८
228

मतमित्यपास्तं।उक्तरूपत्वेनैवबाधस्याधिकबलत्वात्।ननुयदिसाध्याभाववज्ज्ञानंस्वरूपसदेवानुमितिप्रतिबंधकं
तदातद्धेत्वाभासोनस्यात्।ज्ञायमानप्रतिबंधकस्यैवहेत्वाभासत्वेनग्रंथकृदभिमतत्वादितिचेत्।न।इष्टत्वात्।पक्षेसा
ध्याभावस्यैवबाधत्वात्।तस्यचज्ञायमानस्यप्रतिबंधत्वात्।अतएवबाधोपिपक्षेविषयापहारइतिसिद्धान्तप्रवादोपि।
अन्यथापरामर्शानंतरमप्रामाण्यशंकाशून्यसाध्याभावग्रहेप्यनुमितिःस्यात्।नचतत्प्रमात्वग्रहादेवतत्रानुमितिप्र
बंधइतिवाच्यं।तत्प्रमात्वग्रहस्यानुमितिरूपतयापक्षज्ञानपरामर्शाद्यधीनतयाविलंबितत्वेनानुमितिसामग्रीबलव
त्तयाचानुमितेरेवोत्पत्तेः।अतएवशाब्दादौतथादर्शनादित्यप्यसंगतं।उक्तयुक्त्यातत्रापिप्रमात्वग्रहस्याप्रतिबंधकत्वा
त्।नचैवमत्रसाध्याभावप्रमेतिज्ञानादनुमितिप्रतिबंधोनस्यादितिवाच्यं।तज्ज्ञानस्यापिसाध्याभावविषयतयानिय २२८

तत्त्वेन तत्तन्नैवरूपेण प्रतिबंधकत्वात्। अन्यथा विरोधिविषयत्वाभावेनाप्रतिबंधकत्वादिति एतमेवापरितोषं हृदि
निधायाह· पक्षधर्मताबलेन प्रसिद्धमित्यादि। अत्र बाधपदं साध्याभावपरमतो नोक्तदोषावकाशः। अत्र च व्यतिवा
राघभावादेव बाधज्ञानं न तद्ज्ञानसांकर्य्यशंकास्पदमिति भावः। अत्र वदंति। प्रसिद्धस्य पक्षान्यवृत्तिसाध्यस्य सिद्धौ भ्र
मरूपानुमितिः स्यात्। तथा च यवांकुरं प्रति कमलबीजस्येव भ्रमरूपानुमितिविशेषं प्रति सत्यपरामर्षस्याकारणत्वा
देव ततो न प्रसिद्धसाध्यानुमितिः न तु बाधात्। अन्यथा समानप्रकारकज्ञानस्य विरोधित्वात् तद्वह्नित्वेन रूपेण बाधानवगा
मात्प्रसिद्धोपि वह्निः पक्षे भासेतैवापक्षान्यवृत्तिसाध्यं पक्षे नास्तीत्यादिरूपबाधस्य भिन्नप्रकारकत्वात्। न च समानप्रका
रकत्वेन बाधस्य प्रतिबंधकत्वमेव नेति वाच्यं। एवं हि निर्वह्निपर्वते पक्षान्यवृत्तिर्वह्निर[illegible]त्र नास्तीति ज्ञाने लिंगपरामर्षे

समानविषयत्वेन बाधस्य प्रतिबंधके

वि·अ·न·
२२९
२२९
णानुमितिर्नस्यात्। पर्वतीयवह्नेरसंभवात्। पक्षातिरिक्तवह्नेर्बाधितत्वात्। न चेष्टापत्तिः। दृश्यमानप्रवृत्त्यादिविरोधा
त्। तथा च तत्रानन्यमत्वात्। तादृशां वह्निबाधमवधूय वह्नित्वेन रूपेण बाधित एव पक्षातिरिक्तवृत्तिर्वह्निर्भासत इत्युपे
यं। तस्मात्सत्यपरामर्शस्थलेपि न तादृशबाधस्य प्रतिबंधकत्वं। किंच तादृशसाध्यविषयकानुमितेर्भ्रांतत्वनियमेन त
ज्जनकदोषस्य वा अयथार्थपरामर्शस्य तच्चाभावान्न तदनुमितिरिति। मैवं। अयथार्थपरामर्शस्य दोषत्वाभावात्। अन्यथा
द्विकर्तृके घटे कार्यत्वेन सकर्तृकत्वानुमितिर्लाघवक्रमेण एककर्तृकत्वविषया भ्रान्ता न स्यात्। दोषाजन्यत्वात्। प्र
उ माच स्यात् गुणजन्यत्वात्। वह्निमति च पर्वते बाष्पे धूमभ्रमाज्ज्ञायमानानुमितिर्भ्रांता वह्न्यंशेपि स्यात्। दोषजन्यत्वादेवा
अत एव न यथार्थपरामर्शस्य गुणत्वं। गंधप्रागभावावच्छिन्नायां पृथिवी गंधवतीत्यत्र बाधानवतारदशायामनुमितेर्भ्रा २२९
वस्त्रे सासामानाधिकरंगचिश्चयं गौः सास्नावत्वादित्यनुमितिर्भ्रांता स्यात् दोषजन्यत्वादिति दूषणं स्पष्टमेव

तत्वानुपपत्तेश्च। तस्मादबाधितत्वप्रमागुणः तन्नमश्च दोषः। नचैवं प्रसिद्धवन्हेरबाधितत्वभ्रमाभावादेवपर्वते
नभानं नतु बाधादिति वाच्यम्। बाधस्य तच्चोपजीव्यत्वात्। अन्यथा व्यभिचारज्ञानादेरपि प्रतिबंधकत्वं नस्यात्। तस्मि
न्सति परामर्शाभावादेवानुमितिप्रतिबंधात्। न चाबाधितत्वज्ञानस्यानुमितिजनकत्वेमानाभावः बाधस्य प्रतिबंध
कतया तदभावस्यैव हेतुत्वात् प्रत्युताबाधितत्वज्ञानस्य साध्यग्रहपर्यवसन्नतया सिद्धसाधनापत्तेरिति वाच्यम्।
संशयनिश्चयसाधारणस्यैव तज्ज्ञानस्य योग्यताज्ञानत्वकारणत्वाभ्युपग[illegible]मा[illegible]गुणानुरोधेनैव तज्ज्ञाने कारण
त्वकल्पनात्। अन्यथाऽयोग्यताज्ञानस्य शाब्दज्ञानप्रतिबंधकतया तदभावस्यैव तत्कारणत्वापत्तौ योग्यताज्ञाने
कारणत्वानुपपत्तेः। अभावकारणत्वापेक्षाभावकारणत्वस्य लघुत्वाज्ज्ञानत्वप्रत्यक्षेन वस्याभियात तज्ज्ञानस्याका

प्रतिबंधकाभावतया कारणत्वकल्पनादत्रापि तथेति वाच्यं· तत्र प्रत्यक्षबाधमात्रस्यैव।

वि·अ·म· रणत्वाद्बाधज्ञानाभावस्यैव प्रतिबंधकतया तदभावस्य प्रत्यक्षं प्रति कारणत्वकल्पनेपि बाधज्ञानसामान्याभा
२३ वस्यानुमितिं प्रति हेतुत्वमत्रैव कल्पनीयं तथा च लाघवावतारात्। अत एवाबाधितत्वादिबोधनाय निगमनमिति सि
230 द्धान्तोपि। तद्धेतुत्वानभ्युपगमेपि पक्षतावच्छेदकावच्छेदेन पक्षे ज्ञाप्याभाववति लिंगज्ञानस्य दोषत्वे तद्वत्त्वे लिंग
ज्ञानस्य गुणत्वं। तथा च प्रसिद्धानुमितिजनकदोषस्य सत्वाद्बाधादेव प्रतिबंधः। समानविषयत्वेन च ज्ञानस्य विरोधा
वश्यकत्वात् न समानप्रकारत्वेनापि विरोधित्वं। गौरवात्। अन्यथा पक्षे पक्षीयः पक्षातिरिक्तवृत्तिश्च वह्निर्नास्ति
वह्नौ पक्षवृत्तित्वं नास्तीत्यादिबाधानन्तरमनुमितिः स्यादेव वह्नित्वप्रकारिका। बाधस्य तद्भिन्नप्रकारत्वेनाविरोधात्।
नचैवं भ्रमानुमितेरनुत्पत्तिः पक्षान्यवृत्तिरेव वह्निरित्यवधारणे इष्टापत्तेः। तदनवधारणे वह्नित्वेन ज्ञातस्य तत्रा २३

रोपात्। वह्नित्वेन ज्ञातं च पर्वतत्वादिकं संभवत्येव ज्ञानं च संशयादिसाधारणं। वह्निमत्त्वेन ज्ञातस्यारोपादारोपा
द्वा पर्वतस्यापि वह्निमत्त्वेन संशयविषयत्वात्। यत्तु दोषप्राधान्येन बाधमवधूय भ्रमोत्पत्तेः पीतः शंख इत्याद
वेव निर्णयाद्बाधितोपि दोषबलाद्वह्निर्गोमतमति। तन्न। तथा सति बाधस्य प्रतिबंधकत्वे मानाभावात्। तस्मिन्सत्य
प्यनुमितेः तादृशदोषाभावादेव च सत्यस्थले प्रसिद्धानानोपपत्तेः। अत एव पीतः शंख इत्यत्रापीतत्वानुमितिरूप
बाधस्याप्रतिबंधकतया भ्रमरूपबाधत्वेन प्रतिबंधकत्वं कल्प्यते। असाधकतायां च हेतूपरागेण यद्यप्यस्य लिंग
त्वं प्रतिबंधकत्वे च तद्वैयर्थ्यं तथापि यावद्विषयत्वेन दोषत्वं तावदंतर्भावो हेत्वाभासत्वे त्वेवास्य तथात्वमिति विभा
वनीयं। कल्पनान्तरमाह। साध्याभाववन्मात्रसहचार इति। साध्याभाववन्मात्रसहचारो हेतुसाध्याभाववयोरिति शेषः।

क्वचित्साध्याभावैसहचार इति पाठः स च सुगम एव। एवं चेति। एवं च रूपप्रागभावावच्छिन्नो घटो रूपवान् घट
त्वादित्यादौ पक्षशरीरभूते धर्म्मिणि रूपात्यंताभावाभावान्न व्यभिचार इति प्रागभावरूपसाध्यविरहज्ञानमेव त
त्रानुमितिप्रतिबंधकं। अतो बाध एव तत्र दूषणमिति भावः। ननु रूपप्रागभावविशिष्टो घटादिरत्र पक्षः तत्र च रूपा दि
त्यंताभावो न तु तत्प्रागभावः। विशेषणांशे संदेहावृत्तेः तथा च तत्र व्यभिचार एवेति चेत् न। प्रागभावपदस्य स्वस
मयपरत्वात्। अत एवानुपदमेव तथा विभावयिष्यति। तथा च तत्समये रूपप्रागभाव एवातो न व्यभिचारः। अत
एव रूपप्रागभावविशेषणो घटत्वादेरभावाद्विशिष्टस्वरूपासिद्धिरेव। तस्य चोपलक्षणत्वे सिद्धसाधनमेवेति नि
परमाण्वादिरूपस्य रस्तम्। तत्समयस्य विशेषणत्वात्। तत्र च घटत्वादेः सत्वात्। यद्यपि तत्समयरूपविशेषतापि रूपान्तरसत्वात् विशि २३१

विशेष्ये घटे कालभेदेन घटीयरूपस्येति शेषः।

असंकालीनबाधःस्यादिति

ष्टेपि न बाधः किंतु सिद्धसाधनमेव तथाप्येक[illegible]स्य कस्यापि रूपस्य विशिष्टे वृत्तिर्नेति तत्र बाधः। तद्घटत्वेन
तद्घटीयरूपसाधने तथाप्यप्रतीकारस्येति भावः। ननु साध्यात्यन्ताभाववद्गामित्वं न व्यभिचारः। द्रव्यत्वेन गुणा
ननुमानापत्तेः। न च साध्यतावच्छेदकावच्छिन्नतदत्यन्ताभाववद्गामित्वं तदिति वाच्यम्। एतद्घटादिना संयोगा व्या
विशेषानुमानापत्तेः। न च प्रतियोगिसामानाधिकरण्यमपि विशेषणं तर्हि तादृशाभाववद्गामित्वमेव व्यभि
चारोऽस्तु किमत्यंताभावपद[illegible]ग्रहणेन। रूपप्रागभावस्य प्रतियोगिसमानाधिकरणतया तावतापि पदे व्यभि
चारशंकावारणादिति चेत् न। अत्यन्ताभावस्यैव तच्च तात्पर्यात्। न च प्रागभावसमयविशिष्टघटे कदापि रूपा
नुत्पत्तेः प्रतियोगिसमानाधिकरणसाध्याभाववत्त्वाद्व्यभिचार इति वाच्यम्। एवं हि प्रथमक्षणविशिष्टघटे सर्वदै

ननुरूपप्रागभावसमयसामानाधिकरण्येनसाध्यसाधनेहेतोःसामर्थ्यंनतुतदवच्छेदेन·साधकाभावादितितत्रानुमि
तिर्नवर्त्यैवेतिनबाधोदोषइतिवापाठः।२

चि॰ अ॰ न॰ वगुणानुत्पत्तेःताहशसाध्याभावसत्त्वाद्व्यभिचारप्रसंगेनद्रव्यत्वेनापिगुणाननुमानप्रसंगात्।तस्माद्विशेषधर्मी
२३२ तरावच्छेदेनताहशसाध्याभावोनव्यभिचारप्रयोजकः।अतिप्रसंगात्।ननुरूपप्रागभावसमयावच्छेदेनरू
232 पसाधकाभावादेवनरूपानुमितिःनतुबाधात्।नचपक्षधर्मताबैःपक्षतावच्छेदकविशेषणावच्छेदेनपक्षेसाध्य लेनहेतो
साधकत्वान्नफलमेवतत्साधकमितिवाच्यंपक्षधर्मताहिलिंगस्यपक्षेवृत्तिरेवसाचसाध्यसामान्यव्याप्तिमतस्त
स्यपक्षीयंसाध्यविशेषंविनानुपपन्नेत्यतोव्याप्त्यासहकृतपरामृष्यमाणपक्षसंबंधंसाध्यंसाधयतिनतुपक्षतावच्छे
दकत्वेनयदुपादीयतेतदवच्छेदेनसाध्यस्यपक्षसंबंधं।बीजाभावात्।तंविनातस्यानुपपत्त्यभावात्।तदवच्छेदे
नपक्षेसाध्यसंबंधंविनापक्षतेघटत्वादिहेतोर्व्याप्तिपक्षधर्मतायाउपपन्नत्वात्।स्वच्छाभावादेवसातस्यतंसाधय २३२

तातिराजनिदेशमात्रत्वात्। तथा च पक्षधर्मताबलेन साध्यस्य पक्षतावच्छेदकधर्मसामानाधिकरण्यम
र्थवशात् संपन्नं सिध्यति। तत्र तयोः पक्षेऽधिकरणेन नानावच्छेदेनापि वृत्तौ निर्वहत्येव। अत एव पक्षधर्मतानुप
पत्तिनिरासमात्रक्रममेव साध्यं पक्षधर्मताबलात् सिध्यति न त्वन्यादृशमपीत्याचार्य्यचरणैरुक्तम्। अत
एव च परिमले जगद्गुरुणोक्तं। उत्पत्तिकालीनोयं घटो रूपवान् घटत्वादित्यत्र हेतुर्बाधादेव दुष्ट इति न। किं
तूत्पत्तिकालीनस्यैव कदाचिद्रूपसत्त्वे बाधाभावात् पक्षविशेषेणैव तत्सामानाधिकरण्यं सिध्यतीति। अ
तावच्छेक त एव पक्षधर्मताबलात् पक्षधर्मसामानाधिकरण्यं साध्यस्य सिध्यतीत्यत्राधिकरणं देशकालावुभावपि वि
वक्षितौ। तेन यदा यत्र पक्षतावच्छेदकं तदा तत्र साध्यं सिध्यति। अन्यथा तत्कालीनवह्न्यर्थिप्रवृत्तिर्न स्यादिति परास्तं।।

चिं. अ. म.
२३३
233

तत्कालीनं साध्यं विना पक्षतायाऽनुपपन्नत्वेन तादृशास्वरसावाकल्पनात् । स्वकीयविवक्षामात्रस्यातिप्रसञ्जकत्वा-
त् । तत्कालीनवह्निसिद्धेस्त्रैकालिकव्याप्तिग्रहादप्युपपत्तेः । न च यथा शाब्दे तात्पर्यवशेन क्वाचिदेकस्य द्वयं क्व-
चिद्विशिष्टवैशिष्ट्यं चेत्यन्वयबोधे द्वैविध्यम् । तथानुमित्सावशादनुमितावपि द्वैविध्यमिति वाच्यम् । सिसाधयि-
षायाः पक्षताशरीरनिष्पादकत्वेनान्यथासिद्धतया व्यभिचारेण चानुमितावहेतुत्वात् । न चानुमितिविशेषतद्धे-
तुत्वं मानाभावात् । पक्षताया अहेतुत्वापाताच्चेति चेत् । अत्राहुः । प्रमाणस्यायं स्वभावो यद्बाधकं विना विशिष्टवै-
शिष्ट्यविषयकमेव ज्ञानं जनयति । अरुणयेत्यादिशाब्दस्थले तथादर्शनात् । तथा च ज्ञानसामग्रीबलादेव तदवच्छे-
देनानुमितिः साध्यस्य स्यात् यदि न बाधो दोष इति । अवच्छेदक इति । एतच्च यथाश्रुतमभिप्रेत्योक्तम् । प्रागभावपद २३३

स्यस्वसमयपरत्वेऽसिद्धेरसंभवादितिऽष्टव्यम्।तद्धीति।सिद्धसाधनं ह्युद्देश्यसिद्धौ भवति।उद्देश्यं वा त्वप्रा
गभावसमयावच्छेदेनघटेरूपवत्त्वंतत्सिद्धिश्चेत्तदा प्रागभावप्रतियोगिनोरेककालतापिस्यादित्यर्थः।प्रागभावृत्ति
वस्यप्रध्वंसस्यप्रागभावप्रध्वंसंतच्चप्रतियोगीचप्रागभावप्रध्वंसप्रतियोगिनौतयोरित्यर्थः।अन्यथेति।एकवृ
त्तितामात्रेणपरस्परावच्छेदेनापिवृत्त्यनुपगमेसंयोगादितदत्वंताभावयोरप्यव्याप्यवृत्तित्वंभज्येतेत्यर्थः।ननु
साध्याभावनिश्चयेसंभाव्यादिघटितपक्षताविरहात्पक्षासिद्धिरेवदोषःस्यान्नतुबाधइत्यतआह।असिद्धेर
पीति।असिद्धेःपक्षासिद्धेः।तथाचोपजीव्यत्वाद्बाधएवतत्रदोषोनत्वसिद्धिरितिभावः।इदंचप्राचीनमतेन।
वस्तुतोबाधेपिनपक्षताविरहइतिध्येयम्।सिसाधयिषितेति।एतदपिसंप्रदायैनैवग्रंथकृन्मतेतस्यसाक्षात् मते

चिं॰ अ॰ न॰ तस्य प्रतिबंधकत्वेपि ज्ञायमानस्य न प्रतिबंधकत्वमिति न हेत्वाभासत्वं। ननु तथापि साध्यं हेत्वाभासोस्तु। तस्य ज्ञाय
२३४ 234 मानस्य प्रतिबंधकत्वादिति चेत्। न। यन्निश्चययोर्ह्यनुमितिप्रतिबंधाय नान्यदपेक्षते तस्यैव हेत्वाभासत्वं। साध्यं
च न तथा। तन्निश्चयेपि तदंशे सिसाधयिषाविरहापक्षणात्। अन्यथाश्रवणानंतरं मननाभावप्रसंग इत्याकूतं।
नन्वेति। तथा च रूप्यप्रागभावादिरूपो बाधो न दोष इति भावः। रजतनिश्चयादिति। विशेषदर्शने नेति शेषः। प्रत्य
क्षप्रमेति। अप्रामाण्यशंकाशून्यं प्रत्यक्षमित्यर्थः। अनुमितेस्त्विति। प्रमाग्रहणं वास्तवबाधाभिप्रायेण। अप्रामाण्य
शंकाशून्यमभावज्ञानमात्रमेव न तु मानमसाधारणं न तु विपर्यस्तत्वं विपर्यस्तत्वमिव तत्र तंत्रमित्यर्थः। बाधस्य
यद्यपि साध्याभावत्वं तावत्साध्यप्रागभावसाध्यसंबंधाभावसाध्यवद्भिन्नत्वादिरूपतयानेकस्तथापि प्रतिसे २३४

धातिरिक्तत्वे सति साध्यादनुमितिप्रतिबंधकज्ञानविषयतावच्छेदकत्वेन स्वरूपसतानुगतत्वात्सव्यभिचारव
दक एवेति वा ध्येयम्। आगमेनेति। नारं स्पृष्ट्वास्थि सस्नेहं सचैलो जलमाविशेदित्यादिनेत्यर्थः। राजेति। स्वारा
ज्यकामो राजा राजसूयेन जयेतेति श्रुत्यादेः क्षत्रियकर्तृकत्वताबोधिकयार्थो ब्राह्मणकर्तृकत्वता
निषेधादित्यर्थः। उपोद्घातसंगतिमाह-इत्याशासानामिति। तथा चासाधक त्वाज्ञानेन सदुत्तरत्वापत्ति
ति त्वयेहत्याशासनिर्वचनमेव निरर्थकमापद्येतेति भावः। किमिति। तथा चासाधकतासाधकत्वेन सदुत्तरत्वमिति
भावः। परेति। परेच्छायामनुमितिमुद्दिश्य प्रयोगः तत्तत्प्रतिबंधकत्वमित्यर्थः। तत्राद्यमिति। तथा च तदर्थमिदमसै
कान्तिकमित्येवोन्नायकमत इति भावः। द्वितीयं त्विति। इदमसाधकमनेकान्तिकत्वादिति क्रमेण लिंगत्वेनाभिधा

नादित्यर्थः। न च साधकतासाधनमुद्देश्यमित्यत्रैवाद्देपरस्य तत्राह। प्रतिबंधकत्ववदिति। इषणत्वसंभवः। अ
पकर्षसूचकत्वमित्यर्थः। तथा च कथकसंप्रदायानुरोधाद्दत्यन्ताशक्तिख्यापनार्थं तदुद्देश्यमिति भावः। पक्षध
र्म्मेति। यद्यप्यसाधकतानुमाने विरुद्धत्वादित्यादिकमेवप्रयोज्यं न तु पक्षधर्म्मतापि धूमवत्त्वादित्यत्रैवा
नां कान्दितत्वात्तत्रापि विरुद्धोयमिति प्रथमोद्भावनमस्तिमेत्वेदं दुष्टत्वमां विरुद्धं चेदमित्युपनयैकदेशाः
पक्षधर्म्मतोपदर्शनाय कार्यएवेत्यप्याहुः। अबाधितत्वादिबोधनाय किमिति निगमनं न क्रियत इति तु चिन्त्यं॥
केचित्तु उदाहरणं विनावयवचत्वारोऽवयवाः कर्त्तव्या एवा पक्षधर्म्मताया एवेत्येवकारव्यवच्छेद्या व्याप्तिरित्याहुः। अ
धिकेति। अनाकांक्षितानभिधानापत्तेरित्यर्थः। समयेति। एतेन सामेकत्वप्रदर्शनेन न यत्र न समयस्तत्रासाधकता २३५

साधनं मन्क्रियत इति सूचितं। आवश्यकत्वादिति। अन्यथा वादिप्रतिवादिनोस्तारतम्यासमयकरणमेवासं
न्नवि। असाधकताव्याप्तेन दूषणेन तत्साधनासंभवादिति भावः। यस्त्विति। व्याप्तिमात्रानंगीकर्त्राचार्वाकादि
रित्यर्थः। बाधस्येति। दूषणस्येत्यर्थः। बाध्यतेऽनेनेति व्युत्पत्तेः। दूषणत्वमिति। असाधकत्वव्याप्यत्वमित्यर्थः।
कर्त्तव्य एवेति। एवकारो भिन्नक्रमः। तथा च तं प्रति दूषणत्वं प्रसाध्यैव पंचावयवप्रयोगः कर्त्तव्यः। विवादपद
साध्यसाधनायेति शेषः। तथा चासाधकतानुमाने तत्रापि नोदाहरणं विधेयमिति भावः। स्वतोपि परस्यक
पाञ्चित्यरामर्षसंभवेन स्वकर्त्तव्यतया यथा पंचावयवप्रयोगः क्रियते तथाऽसाधकतानुमानेपि पुरुषेण
स्वव्यापारस्य कर्त्तुमुचितत्वादित्याह। यत्विति। कथयेति। तथा चापसिद्धान्तभिया पंचावयवप्रयोगस्तत्र न

कार्य्य इत्यर्थः। तेन विरुद्ध[illegible]दिना। तत्त्वेन। विरुद्धत्वादिनेत्यर्थः। नन्वेतत्काल इति। दूषणज्ञानकाल इत्यर्थः।
तथा च तत्कालीनं साध्यविशिष्टपक्षज्ञानाजनकत्वमसाधकत्वमिति। विशेषणत्वस्याग्रेसिद्धांततया तत्का-
लीनस्योपलक्षणत्वपक्षमालंब्य दूषयति· सत्वेतावितिः। सत्वेनासत्प्रतिपक्ष इति। असाधारणस्यसंशयोत्पा-
पकतापक्षे साध्यांशेतस्यापि प्रमात्वादव्याप्तिरेवेति भावः। साध्याप्रसिद्ध्याव्याप्तिरित्यपि बोद्धव्यं। अप्रसिद्ध-
साध्यकेऽसिद्ध[illegible]दावव्याप्तिरित्याह· साध्याप्रसिद्ध्याविति। इदमुपलक्षणं· अवृत्तिसाध्यकेपि तदप्रसिद्धे-
रित्यपि द्रष्टव्यम्। घटोऽभिधेयो लोष्टत्वादित्यादौ स्वरूपासिद्धेप्यत्र तु साध्यानैकान्तिकत्वाप्रसिद्ध्याऽसाध-
कत्वं न स्यादित्याह· केवलेति। इदं चोपलक्षणं· यत्साध्यनिरूपितं सत्प्रतिपक्षादिकं न ज्ञातं तत्साध्यकेऽप्रसि २३६

ह्यसाध्यकेवासिद्धादावव्याप्तिरित्यपि द्रष्टव्यं। अंशान इति। अनैकान्तिकाद्यन्यतमत्वे साध्ये अनैकांतिकत्व
स्य साध्यांशस्य सिद्धस्यैव साधनादित्यर्थः। अथ तन्नासिद्धं तत्राह साध्येति। असिद्धत्वेन साध्यादविशेष इत्य
र्थः। यद्वा ननु नानैकान्तिकाद्यन्यतमत्वं साधनायं किंतु यत्रानैकान्तिकत्वं तत्र तदेवासाधकत्वं। यत्रचासिद्धत्वं
तत्र तदेवासाधकत्वमिति न केवलान्वयि साधनेऽनैकान्तिकत्वाप्रसिद्ध्या कोपि दोष इत्यत आह। अंशान इति॥
असाधकत्वनिर्वचन इति शेषः। एवं सति सिद्धसाधनं साध्याविशेषश्चेत्यर्थः। यत्विति। यत एव तत्कालपदेन
व्यभिचारादिधीकालो विवक्षितः। अत एव तत्पुरुषीयत्वमपि विशेषणं तेन सद्धेतुसत्प्रतिपक्षादौ पुरुषान्त
रीयतादृशाप्रमाकरणत्वान्नाव्याप्तिः। अत एवाग्रे प्रतियोग्यप्रसिद्धिं वक्ष्यति। यद्यप्येतत्कालत्वस्याभावव

शेषणत्वेनाप्रसिद्धिस्तथापि जलह्रदो ऽग्निमानित्यादौ पक्षविषयताद्वाराप्रमायाश्चाप्रसिद्धिरेवेति। व्यधि
करणयोरिति। एतच्च तत्साध्यव्याप्यहेत्वन्तरे यदा न तत्पुरुषीयताद्वारासाध्यप्रमाकारणत्वं तदा बोध्यं। बा
धेतदपि न संभवतीति ध्येयं। तन्मते नैव दूषयति· तन्नेति। उत्पबलतेति। विरुद्धोभयव्याप्तिपक्षधर्मता विष
यतेत्यर्थः। भ्रमस्येति। एकत्र विरुद्धोभयव्याप्यपक्षधर्मयोरभावान्न ज्ञानस्य भ्रमत्वनियमादित्यर्थः। हेत्वाभा
सत्वलक्षणं चयथासुस्थं तथोक्तं। धर्म्ममात्रस्येति। भ्रमादावपि व्यभिचारिणमादाय अनयोरन्यतरांशवैकल्यमि
तिप्रमायाः सत्त्वादनुमानमात्रोच्छेदापत्तिरित्यर्थः। नन्वन्यतरांशवैकल्यज्ञानसत्प्रतिपक्षयोरसिद्ध्यादिसंशया
धायकत्वेन दूषणं स्यादेव। भ्रमादौ तत्ज्ञानं न संशयाधायकं विशेषदर्शनात्तद्दर्शनदशायां तत्रापि न २३७

ज्ञानादनुमितिप्रतिबंधकत्वस्येष्टत्वादित्यपरितोषादाह॰ अन्यतरेति। अपेति। यद्यपि हेत्वाभासत्वनिय
तमसाधकत्वं ज्ञाने नास्ति: तथापि तादृशज्ञानविषयत्वमसाधकत्वमिति मंतव्यं। एतदिति। एतद्धेतुविषयानै
वे कान्तिकज्ञानत्वादित्यर्थः। अत एतत्पुरुषीयेत्यपि हेतुविशेषणं। तेन परकीयतज्ज्ञाने न व्यभिचारः॥ केचित्तु त
त्रसाध्यसत्वान्न व्यभिचारः। तस्यापि प्रतिबंधकत्वात्तान्नवत्तथा सति तत्सत्वेऽनुमितिर्न स्यादिति वाच्यं। अत्र पु
रुषे परकीयतादृशज्ञानस्याभावादित्याहुः। अत्र च मते प्रकृतहेतोः प्रकृतसाध्यव्याप्यत्वस्योपनयसिद्धत्वा
भावः। तादृशासमयाभावादिसुदाहरणमपि कार्य्यमेव। अत एव तद्विशिष्टं दृष्टांतमाह॰ एतदन्यतद्ज्ञान
वदिति। न च यत्वानैकान्तिकज्ञानमन्यदा न जातं तत्र दृष्टांतासिद्धिः। तत्र सामान्यव्याप्त्यभिप्रायेणातत्त्वंस

अस.

चि.अ.म. वादितिभावः। साध्यैवैतत्पक्षके तु देशप्रसिद्धये पक्षान्तरेपि तस्यानुमितिप्रतिबंधकत्वादित्यवधे

२३८ यं। साध्यप्रत्ययेति। साध्यविशिष्टपक्षप्रत्ययेत्यर्थः। एकव्यक्तिकेति। गोत्वादिसाध्यक इत्यर्थः। अन्यतरत्वं भा

238 वत्वाभावत्वान्यतरत्वं लिंगं लिंगतावच्छेदकं नत्वभावाभावान्यतरत्वं लिंगमित्यर्थः। प्रतियोग्यप्रसिद्धेरि

ति ध्येयं। तद्व्याप्तीति। तद्धर्मावच्छिन्नव्याप्तीत्यर्थः। साध्यव्याप्यत्वमेवेति। साध्यव्याप्यत्वमेवानुमितिविषयत्वे

तंत्रं। तथा च भावो ऽभावो वा ऽप्रमेयं यथापि प्रमेयमित्यनुमितौ प्रमेयत्वव्याप्यमेव विषयः स्यात् तच्च बाधोना

स्त्येवेत्यर्थः। वह्निव्याप्येति। इदं चाभ्युपेत्य समाहितं। वस्तुतो वह्निव्याप्याभेदे भासमाने वह्निस्तद्व्यापकत्वेन

त भासते नत्वकूटव्यापके वह्नित्वं भासते सामग्रीविरहादित्यवधेयम्। नियमं इति। पक्षधर्मतानिश्चयविष २३८

यत्किंवि

यत्वादित्यर्थः। तथाचयेनरूपेणपक्षधर्म्म[illegible]ता[illegible]निश्चयविषयत्वंतेनरूपेणानुमितिविषयत्वंसाध्यम
तःसंदेहविषयीभूतेनावत्वादौनव्यभिचारः। नियमतइति। नाहृत्वाज्ञानविषयोदासीनहृत्वादिव्यभिचा
रवारणाय। ननु[illegible]पक्षधर्म्मताज्ञानेनियमेनभासमानत्वंहृत्वादेरपिसर्वत्रतथोक्तोपवर्त्ततत्ववदित्यसंग
तमितिचेत्। न। यद्विषयत्वेनपक्षधर्म्मताज्ञानस्यानुमितिजनकत्वंतत्वस्यविवक्षितत्वात्। व्याप्तीति। अत्रापि
यद्विषयत्वेनव्याप्तिज्ञानस्यकारणत्वंतत्वादितिविवक्षितमितिनहृत्वादौव्यभिचारः। एवमग्रेपियुक्त्यंत
रमाह किंचेति। अत्रचमतेपूर्वज्ञानोपनीतंहृत्वादिकमप्यनुमितौभासतएवायुक्तेस्तोल्पात्। पूर्वकल्प
त्वकारणीभूतज्ञानविषयत्वेनतद्विषयत्वमिति। तच्चनतद्विषयत्वमितिमंतव्यं। शंकते· विषयेति। ननुअ

रमकारणस्यापि प्रतिबंधकसम्भावान्न फलजनकत्वं स्यादित्यत आह॰ प्रत्यक्षादीति। तथा चानुमित्यनंत
रमनुमित्यंतरमेव स्यान्नानुव्यवसायादिरूपविषयान्तरसंचार इत्यर्थः। सिद्धेति। पक्षताविरहादिति भा
वः। यत्तु॰ अनुमितौ लिंगज्ञाने धूमाद्वह्निमनुमिनोमीत्यनुव्यवसायो न स्यादुपनायकाभावादिति त
न्नुच्छं। ज्ञानान्तरोपनीतस्यापि धूमजन्यत्वस्य तद्विषयत्वसंभवात्। अन्यथा लिंगज्ञानपक्षेऽपि परामर्शेण धूमजन्यत्वा
नुपस्थापनात्तादृशानुव्यवसायासिद्धिप्रसंगात्। न चैवं चक्षुषा रूपं पश्यामि पदेनार्थमधिगच्छामीत्यनुव्यवसाय
बलाच्चक्षुःपदयोर्व्यापारत्वस्य ज्ञानविषयत्वापत्तिरिति। उक्तमिति। लक्षणवाक्येन सर्वांशसमानाचानसाध्यप्रत्य
याजनकत्वमुक्तं। तत्राह। तमेवेत्यर्थः। अस्तु तावदिति। अत्रेदं चिंत्यं। दैवाज्जनत्र धूमसत्त्वेपि सनानुमितिविषयः। त २३९

स्येवःधूम

विषय

स्य वह्निव्याप्यत्वेनापरामर्षात् तादृशोपनीतत्वेन च लिंगज्ञानानुपगमात्। अन्यथा तस्य सद्धेतुत्वेनासंग्राह्यत्वा
त्वात् तथा च बाध्यस्य धर्मत्वेन परामर्षविषयत्वात् तादृशोपनीतस्य तस्यैव धर्मत्वेनानुमितिविषयत्वं। अन्यथा पराम
र्षेपि तत्र भ्रान्तो न स्यादिति तदंशे लौकिकप्रमनुमितेः सत्यत्वमिति। अत्र केचित्। लिंगस्यानुमितौ ज्ञानेमानाज्ञावए
वानवोक्तानुमानं तथा। अप्रयोजकत्वात्। नापि कारणीभूतज्ञानेत्वं तथा। अप्रयोजकत्वादेवानन्येक विशेष
णावच्छया ज्ञाने विशेषणान्तरधीसामग्रीत एव विशिष्टवैशिष्ट्यप्रतीतिरित्युक्तमिति चेत्। न। पक्षविषयकसा
ध्यानुमितित्वेन कार्यता व्याप्यत्वप्रकारकपक्षधर्मताज्ञानत्वेन कारणता तथा च लिंगज्ञानं प्रति स्वरूपायोग्य
त्वात् परामर्षस्य न ततस्तद्विषयानुमितिः। यथा प्रत्यक्षाद्युपस्थितमपि शाब्दबोधे न विषयस्तथा प्रकृतेप्युक्तं वा

धकात्। नच लिंगविषयत्वमपि कार्य्यतावच्छेदकमध्यप्रविष्टं प्रमाणाभावादिति वदन्ति। तन्न। एवं ह्यस्माद
नुमाने कर्त्रैकत्वमपि न विषयः स्यादित्युक्तं। स्वज्ञानदशायामिति। विरुद्धत्वाद्यन्यतमहेत्वाभासतोपाधिविशि
ष्टस्य प्रमादशायामित्यर्थः। अतो न विरुद्धत्वादिभ्रमदशायामसद्धेतावतिव्याप्तिः। सत्प्रतिपक्षस्थले च येन सं
बंधेन यथा तत्प्रमा तथोक्तं हेत्वाभासलक्षणव्याख्यानावसरे। तादृशा च नोपलक्षणं किंतु विशेषणं तेन सत्प्र
तिपक्षतोन्नार्लैसद्धतौ नातिव्याप्तिः। तदा सत्प्रतिपक्षत्वाभावेन तादृशप्रमाविरहात्। न च यदा न तादृशप्र
मा किंतु विरुद्धेऽन्वयव्याप्तिपक्षधर्म्मतापरामर्शमात्रं तत्र तादृशप्रमाविरहेण व्याप्तिरिति वाच्यं। प्रतिपक्षस्व
पदोषस्य पूर्वोक्तसंबंधेन हेतुनिष्ठत्वात्तत्रैव तत्प्रमाया आवश्यकत्वात्। एतेन तद्दशाँ विशेषणत्वपक्षेऽव्या २४॰
या२

ज्ञायमानतादशायां सव्यभिचारादौ अव्याप्तिः। न च तदा तस्य नासाधकत्वमिति वाच्यं तस्य हेत्वाभासत्वसम
नियतत्वादिति निरस्तं। अत एव न घटादि विरुद्धे कंदरादिवृत्तिविशेषेऽस्मदाद्यज्ञायमानेऽव्याप्तिः। न चैवं
लिंगत्वभ्रमदशायां विरुद्धेऽव्याप्तिः। तदा साध्यप्रत्ययजनकत्वादिति वाच्यं। किं त्रिकालीनतज्जनकत्वाभा
वस्यैव विवक्षितत्वात् तथा सति यथाश्रुते न हेतौ व्यर्थविशेषणत्वं तथाग्रे वक्ष्यते। विरुद्धत्वादिज्ञानदशाव
स्थादमिति। ननु चात्र विरुद्धादौ लिंगत्वभ्रमात्यद्गोचरसाध्यप्रत्ययजनकत्वाद्व्यभिचार इति चेत्। अत्र के
चित्। न हि सर्वकालीनतज्जनकत्वाभावः साध्यः। किं तु तज्जनकत्वाभावमात्रं साध्यं। तच्च तत्र किं त्रिकालीनत
ज्जनकत्वविरहसत्त्व एव निःप्रत्यूहं। एवं च यद्यपि वस्तुमात्र एव यथाश्रुतसाध्यसत्त्वाद्विरुद्धत्वादिहेतोः स्व

रूपविवेचने व्यर्थविशेषणत्वदोषप्रसंगस्तथापि हेत्वाभासत्वनियतः पक्षगोचरसाध्यप्रत्ययजनकत्वा
भावः साध्यो व्याप्तिमतः सचन वस्तुमात्र इति न वैयर्थ्यमित्याहुः। तन्न। हेत्वाभासत्वस्य साध्यप्रविष्टत्वेऽधिकस्य
व्यर्थत्वात्। तज्ज्ञप्तिसाधकत्वस्यानिरुक्तत्वाच्च साधने यान्तराद्वा। अन्येत्तु। साध्यप्रत्ययाजनकत्वं साध्यप्रत्य
यजनकतावच्छेदकरूपविरहः। तत्प्रत्ययजनकतावच्छेदकत्वं तु तत्प्रत्ययजनकज्ञानविषयतावच्छेदकत्वं। या
तदवच्छेदकानि च [illegible] पक्षधर्मत्वादीनि अबाधितत्वासत्प्रतिपक्षितत्वपर्यन्तानि। तज्ज्ञानकारणत्वस्य संज्ञ
स लायसिद्धत्वात्। अत एव निगमनमर्थवत्। एवं च व्यभिचारित्वादिरेव पर्यवसितस्तथा सत्यपि यथा न साध्या
विशेषः तथा व्याकर एव स्फुटं· एवमपि सद्धेतौ सत्प्रतिपक्षितत्वरूपतादृशावच्छेदकविरहस्य कदाचित्संभ २५१

विनश्यतिपश्चितोत्तरक्षणेप्यसाधकत्वंमाप्रसांक्षीदितितद्विरहःस्वज्ञानकालीनतयाविशेषितःसयत
द्द्शोनान्यदातद्याज्ञानरूपविशेषणाभावेनविशिष्टाभावात्।एवंचस्वज्ञानविरहकालेविशिष्टाभा
वात्विरुद्धेपिव्यभिचारोमाभूदित्यभिसंधिनासाध्यंनिःकृष्याहःतथाहीति·तथाचस्वज्ञानकालस्यप
द्दूनावच्छेदकतयातत्कालीनत्वंसाध्यस्यनतुतस्यापिसाध्यप्रवेशोयेनव्यभिचारः।नचव्यर्थविशेषणता
विवक्षितस्यासार्वत्रिकत्वादितिवदंति।तच्चिंत्यं।तथाहिस्वज्ञानकालस्यसाध्यप्रवेशेपिनतदभावाधी
नविशिष्टाभावाव्यभिचारः।ईश्वरज्ञानमादायविशेषणस्यसर्वदासत्वात्।नह्यस्मदादिज्ञानघटि
तमेवैतल्लक्षणं।तथासत्यस्मदाद्यज्ञायमानेव्यभिचारिणिविरुद्धेवाव्यक्तिविशेषेऽव्याप्तिप्रसंगात्।अस्म

दावज्ञायमानतादवस्थायां सर्वत्रैव विरुद्धादावव्याप्तिप्रसंगात्। किंच स्वज्ञानविरहकाले विशिष्टाभावस
त्वेपि न व्यभिचारः। प्रतियोग्यसमानाधिकरणसाध्याभावसामानाधिकरण्यस्य व्यभिचारत्वात्॰ अन्यथा
ऽव्यत्वेन गुणानुमानापत्तेः। विरुद्धेव तादवस्थ्ये साध्यासत्त्वस्वीकारे लक्षणाव्याप्तिरेव दोषः स्यात्। तस्मा
त्साध्यप्रत्ययाजनकत्वस्य केवलान्वयित्वे न हेतौ व्यर्थविशेषणत्वाशंकायां स्वप्रमाकालीनत्वमपि साध्यप्र
वेश्यमेव। विशिष्टस्यैवासाधकत्वेन तत्साधनस्योद्देश्यत्वाद्यातश्च हेत्वाभासत्वनियतमिति न विरुद्धत्वादि
हेतौ व्यर्थविशेषणत्वमिति वयमालोचयामः। नन्वेवं विरुद्धत्वाद्यन्यतमविशिष्ट[illegible]प्रमाकालीनत्वमेव
लक्षणमस्तु। साध्यप्रत्ययाजनकत्वस्य विवक्षितस्य केवलान्वयित्वेनाव्यावर्त्तकत्वात्। अपि च॰ अप्रसिद्ध १४२

साध्यकेऽसिद्ध्यादौ प्रतियोग्यप्रसिद्ध्या ऽव्याप्तिरित्यरुचेर्लक्षणान्तरमाह यद्वेति। तद्वत्त्वं वात्र तद्वर्त्तमान
त्वं विवक्षितमिति न प्रतिपत्तितो नीर्णेऽतिव्याप्तिः। इदं च हेत्वाभाससत्त्वसमनियतमेव न सार्वत्रिकमिति न हे
तोर्व्यर्थविशेषणत्वं शंकेति ध्येयं। ननु व्यभिचारित्वादिकं नानुमितिप्रतिबंधकं। तत्सत्त्वेप्यनुमितिप्रतिबंधा
भावादित्यत आह। अनुमितीति। तथा चानुमितिप्रतिबंधकज्ञानविषयतावच्छेदकवत्त्वमसाधकत्वमिति फ
लितार्थः। सत्प्रतिपक्षस्थले यथा तद्वत्त्वं तथोक्तं प्राक्। उक्तसाध्याविशेषपरिहारे येन दूष्यन्ति तेषां म
तमाह। अन्ये त्विति। बाधितेति। पक्षवृत्तिबाधितेत्यर्थः। एतन्मते गंधप्रागभावावच्छिन्नो घटो गंधवानिति
न बाधितं। व्याप्यत्वासिद्ध इति। एतन्मते नीलधूमादौ व्याप्तिरस्त्येव न तत्र व्याप्यत्वासिद्धिरिति मन्तव्यम्॥

स्वरूपासिद्धेति। यद्यपि स्वरूपासिद्धस्य हेत्वाभासत्वं सर्वदापि संभवति तथापि दशाविशेष एव त
स्योक्तरूपासाधकताज्ञानौ न कश्चिद्दोषः। यत्र हेत्वाभासत्वं तत्रावश्यमसाधकत्वमिति नियमः। न तु यद
पक्षे तत्त्वं तदा तत्रासाधकत्वमिति केचिदाहुः। तन्न। एवं हि सर्वत्रैव तदेवासाधकत्वमनुगतमस्तु किम
ननुगतासाधकत्वनिर्वचनेन। नच नैकान्तिकादौ दशाविशेषेऽनुमितिप्रतिबंधज्ञानविषयत्वं नास्ति। त
स्मादिदं सत्प्रतिपक्षादेरेव व्याप्यत्वासिद्ध्याश्रयासिद्धिभिन्नासिद्ध्याश्रयत्वमसाधकत्वं स्वरूपासिद्ध इति
ध्येयं। असाधारणोऽनुपलक्षणं। अनुपसंहार्योऽपि द्रष्टव्यः॥ अनुगतासाधकत्वसंभवेनाननुगतं तत एवं
यासाधकशब्दस्य नानार्थत्वापत्तिरित्यत्रास्वरसबीजमिति॥ एवमियता प्रबंधेन निरूपितस्यानुमान २४३

स्वप्रयोजनं दर्शयति। एवमिति। जगदिति। कार्यमात्रे त्वर्थः। ननु तदप्रसिद्धौ साध्याप्रसिद्धेः कथं तदनु
मानमित्यत आह। इत्यादाविति। तथा च पक्षधर्मताबलात्तत्सिद्धिरिति भावः। मिलितमिति। एकपक्षता
वच्छेदकावच्छिन्नमित्यर्थः। तयोरिति। संशयविषयत्वविवादविषयत्वयोरित्यर्थः। ग्राहकाभावमुक्त्वा ग्रा
ह्याभावमाह। वादिनोरिति। संशयादिति। विशेषादर्शनदशायामिति भावः। तथा च तस्यापि पक्षान्तर्गतत्वे
तदंशतः सिद्धसाधनमिति तात्पर्यं। अभ्युपेत्याह। प्रत्येकमिति। क्षितिः सकर्तृका न वा। अंकुरः सकर्तृको
न वेति प्रत्येकमित्यर्थः। विवादास्पदत्वेनेत्युपलक्षणं तादृशसंशयविषयत्वेनेत्यपि द्रष्टव्यं। अर्थान्तरत्वा
दिति। विचारांगसंशयविषयतावच्छेदकेन रूपेण पक्षे साध्यसाधनस्य तत्संशयनिवर्तकत्वेन प्रकृतता

र्थासंबद्धत्वं। रूपांतरेणाचतत्रतत्साधनस्यलिंगप्रकारकतयातत्संज्ञायानिवर्त्तकत्वेनप्रकृतार्थासंबद्ध
त्वादितिभावः। अन्येति। अन्यात्मविशेषगुणेषु अस्मदादिशरीरस्याकारणत्वात्सर्गाद्यकालीनवेदाद्व
स्मदाद्यदृष्टोपार्जितेश्वरोपग्रहे। तच्छरीरस्याकारणत्वादितिभावः। असिद्धेरिति। अप्रसिद्धेरित्यर्थः॥
अत्र हेतुमाह॰ अदृष्टेति। तथाचसर्वासंग्रह इतिभावः। वाद्यन्तरमतं दूषयति॰ नापाति। द्वितीयलक्षणे दो
षमाह॰ घटादेरिति। चेष्टाद्वाराजन्यत्वेतस्त्वजनकत्वादित्यर्थः। कृतिरेवेति। तथाचनार्थान्तरमितिभावः।
तस्यापक्षत्वेनेति। परार्थानुमाने प्रतिज्ञाविषयस्यैवपक्षत्वंभवतीतिभ्रमवतइदमुत्तरंबोध्यं। पक्षत्वेप्रति
ज्ञाविषयत्वे। सर्गाद्येति। इदानींतनद्व्यणुकमस्मदादिनैवयोगजज्ञानवतासकर्तृकंस्यादित्यर्थान्तरत्वांक २५५

त्व याऽसंगर्थमित्युक्तं। अत्र संदिग्धानैकान्तिकत्वमपि बोध्यं। साध्यं दूषयितुं इच्छति। किं चेति। व्यभिचारादि-
ति। कृतिपूर्वकमस्मदादिघटोपादानज्ञानस्यासंभवादित्यर्थः। घटेति। कुलालकृतेश्चेष्टाद्वारा तज्ज-
नकत्वादित्यर्थः। घटादाविति। उक्तस्य तत्कार्त्तृकत्वप्रयोजकस्य तत्रासत्त्वादिति भावः। चेष्टात्वस्येति। न च
कृतिध्वंसादौ साध्याव्याप्तिः। पक्षधर्मावच्छिन्नसाध्यव्यापकत्वादिति भावः। किं चैवमिति। यदिःशाब्देपि बोध्ये अ
तत्तदुपादानत्वेनैवोपस्थितिर्व्याप्तदेत्यर्थः। न तदुपादानगोचरत्वेन प्रत्यक्षादीनां जनकत्वं विवक्षितं।
तेन च रूपेण तेषां स्वविषयसमवेतकार्यं प्रत्येव जनकत्वं। तथा चान्योपादानप्रत्यक्षस्याजनकत्वादेव
नाप्यान्तरमित्यत आह। अपि चेति। इदं च नैयायिकमते नैवतस्य दूषणं द्रष्टव्यं। तद्वत इति। तदुपलक्षितस्यै

ईश्व॰

चि॰ अ॰ प्र॰ २५५

तात्पर्यः। ननु विशिष्टस्य जनकत्वं विवक्षितमत आह॰ अदृष्टेति। यद्यपि योगजज्ञानस्यादृष्टद्वारकता संभवा
हीनदोषत्वेन योगिनोऽदृष्टासंभवात् तथाप्येतदनुमानबलादेव धार्मिकल्पनात् इति न्यायाद्दोषं विनापि
दृष्ट तस्याजनकत्वं संभवति तात्पर्यान्तरापादनमेवेदमिति ध्येयम्। अथेति। अत्र प्रत्यासत्त्यजन्यत्वं विशेषणं पक्षे पक्षा
सिद्धिवारणार्थं। साध्ये च सिद्धसाधनतावारणार्थं। अदृष्टद्वारा योगजादिज्ञानानामपि जनकत्वस्योक्तत्वात्। एवमग्रेपि।
पक्षधर्मताबलेन विलक्षणज्ञानादिसिद्धेः। अत एव सिद्धान्ते पितृपैत्र्य विप्यति। नत्विति। विवक्षितमित्यनु
षज्यते। साध्यतावच्छेदकप्रविष्टत्वेनेति शेषः। पक्षसाध्ययोरिति। पक्षविशेषणासिद्ध्या आश्रयासिद्धिः
साध्यविशेषणाप्रसिद्ध्या साध्याप्रसिद्धिरिति बोध्यम्। सिद्धो चेति। योगजधर्माद्यजन्योपादानगोचरज्ञा २५५
२ ज्ञानाव्यवहितेति। इदं च वस्तुगतिमनुसृत्योक्तं न त्विदं साध्यतावच्छेदककोटिप्रविष्टं। ज्ञानादिप्रत्येकविशिष्टस्य साधने साध्याप्रसिद्ध्यादेरसंभवात्। ३
जन्यत्व

नादिसिद्धौ वा तस्याप्यदृष्टद्वारादित्वादिजनकत्वसंभवात्पदे तदजन्यत्वस्यासिद्धेरित्यर्थः। सिद्धसाध
नादिति। यत्किंचिदुपादानाज्ञिज्ञायेतेदं। वस्तुतोऽप्रयोजकत्वाद्विशिष्टसाध्येन व्यापकत्वमिति बोध्यं। सा
ध्याप्रसिद्धेरिति। यद्यप्यपरोक्षज्ञानजन्यत्वं स्वत एवाप्रसिद्धं अनुमितेरपरोक्षत्वाभावात् तथा च किंसवि
पि कल्पकजन्यतोपवर्णनेनं तथोघटादेः तादृशाप्रत्यक्षजन्यत्वं नास्ति मानाभावादित्यपरोक्षपदमपास्य
ज्ञानघटितमेव साध्यं कर्तव्यं। एवं च तेन रूपेण साध्याप्रसिद्धिरुक्तेति भावः। वस्तुतस्तु अनुमितित्वेन जन्य
सविकल्पकव्याप्तिग्रहजन्यत्वेन वेत्यर्थः। तथा च विशेषणविशेष्योभयविरहाद्विशिष्टसाध्याप्रसिद्धेरि
त्यर्थः। उक्तमिति। व्ययेतिशेषः। अपसर्गेति। तथा च तत्काले स्पर्शादिज्ञानाभावात्तदाश्रयेश्वरसिद्धिरि

ईश्व·

विं·अ·न· तिभावः। नवब्रह्मांडांतरवर्त्तिज्ञानादिकमादायार्थान्तरं। तत्कालविशेषस्य सकलब्रह्माण्डसाधारणत्वे
२४८ न युगपदेव तन्नाशासंभवेन तच्च मानाभावात्। अत्र च स्वसर्गान्तरज्ञानादिसमानकालीनकालादियत्किंचि
246 त्कारणजन्यत्वेन सिद्धसाधनवारणाय सामग्रीपदं। ननु तथापि तादृशादृष्टजनकसामग्र्या अर्थान्त
रमस्तीत्यत आह अदृष्टेति। न च दृष्टसामग्री अदृष्टप्रागभावादिघटितान्यत्र जनिके त्वर्थः। यत्त्वत्रादृष्ट
सामग्रीध्वंसेऽदृष्टसामग्रीजन्यस्वर्गे व्यभिचार इति। तन्न। सामग्र्या नित्यकारणघटितत्वेन ध्वंसासंभ
वात्। अदृष्टसामग्र्याः स्वर्गप्रत्यजनकत्वाच्च। अदृष्टजनकयागादेरेव स्वर्गजनकतया बोधितत्वात्। यद
सहकृतादृष्ट प्यदृष्टसामग्रीजन्यत्वेन द्व्यणुकस्य नादृष्टत्वापत्तिरिति। तदपि न। लाघवाद् दृष्टसामग्रीजन्यत्वस्यैवा २४८

दृष्टत्वप्रयोजकत्वादिति भावः। ननु मास्तु ज्ञानादीनां द्व्यणुकजनकत्वं तथापि तदाश्रयत्वेनेश्वरसिद्धिः
स्यादेवेत्यत आह उदासीनेति। कार्यकारणभावादितर्कभावान्नोदासीनसिद्धिरिति भावः। उदासीन
सिद्धावपि न तदतिमतप्रयोजकेश्वरसिद्धिरित्यप्याहुः। द्व्यणुकासमवायीति। तद्व्यणुकासमवायीत्य
र्थः। न च द्व्यणुकान्तरे व्यभिचारः। तस्य पक्षसमत्वादिति भावः। असिद्धेरिति। परंप्रलीतिविशेषः। न वा दृष्ट
द्वाराज्ञत्वसर्हत्वं तन्मतेऽपीति वाच्यं। तथापि ध्वंसे न व्यभिचारादिति भावः। पक्षेति। पक्षधर्मताबलान्नित्यज्ञा
दि नोऽसिद्धिः। साध्ये एतत्पदमकिंचित्करं। अप्रयोजकत्वमेव विषदयति अन्यथेति। दृष्यतेतावदिति। अ
नेन वक्ष्यमाणानुमानेन साध्यप्रसिद्धिर्दर्शितेति। तथा च सर्गाद्येति। सर्गाद्यकालीनं यच्छरीरं तज्ज

चिं॰ अ॰ र॰ २४७ 247

न्यं यज्ज्ञानं तद्ध्वंसानाधारो यः कालस्तदाधारं यज्ज्ञानं तज्जनको य आत्ममनःसंयोगः तज्जनिका मनःक्रि
यापद्धः। न च न्यायनये सर्गप्रलययोरनादित्वात् सर्गाद्यकालीनशरीरजन्यज्ञानध्वंसानाधारकालाप्र
ज्ञान सिद्धिः। सर्गपदस्यैतत्सर्गपरत्वात्। तथा चैतत्सर्गाद्यकालीनजनकात्ममनःसंयोगजनकक्रियापद्धः। इ मनः
दानीतनक्रियाणामस्मदादियत्नजन्यत्वान्नांशतः सिद्धसाधनमिति भावः। न च सर्गाद्यकालीनमनः
क्रियेत्येवास्त्विति वाच्यं। सर्गाद्यकालीनत्वस्यान्यविशेषणत्वात्। तन्मन इति। तन्मनोगोचरप्रयत्नानाधा
रः तन्मनोगोचरप्रयत्नवदव्याप्येतरसकलतन्मनःक्रियाकारणाधारो यः कालः तदनंतरकालानाधार
आद्यसत्ताउत्पत्तिर्यस्याः सा तथेत्यर्थः। अत्र कारणीभूततादृशप्रयत्नाधारकालानन्तरकालाधारत्व २४७

सिद्धिप्रसंगवारणाय तन्मनोगोचरप्रयत्नतद्व्याप्येतरैककारणाधारेति विशेषणं। एवंच कारणी स
भूतस्यैव तस्य सिद्धिः। नहि संभवति इतरसकलक्रियाकरणसत्त्वेपि प्रयत्नव्यतिरेकेणान्नरन्धणे क्रि
या न जायते। अपचवनप्रयत्नजन्येति। बाधवारणाय तन्मनोगोचरप्रयत्नानाधारेति विशेषणं। तन्मनो
गोचरप्रयत्नानाधारेश्वरमन्दणे तदुत्पादितक्रियासत्त्वाद्बाध इत्यत उक्तं। आद्येति। आद्यादिति। जकारांत
रेबाधादित्यर्थः। दूषयति तन्नेति। तथाच पक्षासिद्धिरिति भावः। पूर्वेति। प्रलयकालीनक्रिययैवेत्यर्थः। इ
दं चोपलक्षणं। तत्कालीनसंयोगेनापि ज्ञानसंभवात्। पूर्वं सहकारिशरीरविरहेण जननात्। क्रिया
त्वस्येति। अत्रापीश्वरवादिनामित्यनुषंजनीयं। तथाच तत्प्रयत्नमादाय क्रियामात्रे साध्यसत्त्वाद्व्यर्थवि

१.

त्रोषणात्वमित्यर्थः। किंचैवमिति। अनुमितेर्व्याप्यतावच्छेदकप्रकारकत्वनियमादित्यर्थः। अर्थादिति। अ
नुमानांतरादित्यर्थः। तदनुकूलतया तदुपन्यासः प्राप्तकालत्वमिति ध्येयं। अदृष्टाद्वारकेति। अत्रोपादान
पदं स्वोपादानपरं। तथा च स्वोपादानगोचरजन्यकृतिजन्याः घटादयः प्रसिद्धास्तदन्यत्वे सति जन्यत्वं
पक्षतावच्छेदकं। एतेनोपादानपदं यद्यपि किंचिदुपादानपरं तदाऽदृष्टाद्वारकरूपाद्युपादानस्य द
गादिगोचरास्मदादिकृतिजन्यानां च्याद्यानांदीपक्षता न स्यात्। कृत्याद्युपादानपरत्वेऽप्रसिद्धिरिति परा
स्तं। नन्वेवमदृष्टाद्वारकेति व्यर्थं अदृष्टद्वारकत्वमादाय प्रयत्ने दोषासंस्पर्शादिति चेत्। अत्र वदंति
कांस्यादौ अधघलेपादिजनिकया तद्गोचरास्मदादिकृत्या दृष्टद्वारा यज्ज्वलनं जन्यते तस्य चेश्वरमात्र २४८

कर्तृकस्यासंग्रहः स्यादिति तद्विशेषणमिति। तन्न। अथ धर्मेऽपि जनकत्वे तेऽदृष्टजनकत्वे मानाभावा
त्। अथ धर्मसंयोगद्वारैव तस्याश्चलनजनकत्वसंभवात्। न च तत्संयोगध्वंसानंतरमपि चलनोत्पत्तेस्तद्द्वा
रकत्वं नेति वाच्यं। असिद्धेः। तथा सति संयोगध्वंसस्यैव जनकत्वापत्तेश्च। न हि संयोगतद्ध्वंससमययोश्चल
नोत्पत्तौ मानमस्ति। विषचलनादौ मंत्रपाठादिसाध्ये यद्यप्यदृष्टद्वारकत्वं संभवति तत्तथापि नत
दुपानविषादिगोचरत्वं। किंतु कंठताल्वादिगोचरत्वमेवेति तदर्थमपि नैतद्विशेषणमिति। अन्ये तु वि
भुप्रतियोगिकस्यात्माज्ञेदयितनजनकत्वेति जन्यस्वर्गस्य परमेश्वरकर्तृकस्यासंग्रहः स्यादित्यदृष्टद्वार
कत्वं विशेषणं। तस्य स्वोपादानगोचरजन्यत्वेतिजन्यत्वात्। न चैवं तज्जनकादृष्टस्येश्वरकर्तृकस्यासं

दि॰म॰न॰
२५७
२५९

ग्रहःस्यात् । न च स्वादृष्टजननेऽपरादृष्टं व्यापारस्तज्जनतेरिति वाच्यं । अदृष्टाद्वारकपदस्यादृष्टप्रागभाववत्त्वा
व्यवप्रागभावाप्रतियोगित्वपरत्वादित्याहुः । तदपि न । अदृष्टजनकजनतिजन्यगंगास्पर्शादेरस्मदादिकर्तृव
स्यपदार्थांतर्गतत्वापत्तेः । न चेष्टापत्तिः । अंशतःसिद्धसाधनप्रसंगात् । न चोद्देश्यप्रतीतेरसिद्धेर्न तथा· पद
तावच्छेदकतानात्व एव तस्य दोषत्वादिति वाच्यं । एवं सति समवेतजन्यमात्रस्यैव पदार्थत्वापत्तौ घटादिवा
रकविशेषणानुपपत्तेः । तथा च प्राचीनमतेनेदं । न च गंगास्पर्शस्यैवादृष्टजनकत्वं न तु तज्जनकजनतेरि
ति वाच्यं । एवं ह्युद्देश्यचिंतनस्यैव स्वर्गादिजनकत्वं न तु तज्जनकजनतेरिति जल्पता ता अपाचाहुः । कालीशारी
रेयज्ञोरं रूपमुत्पन्नं तत्कालीनशारीरगोचरतपश्चरणादिजन्यत्वाजन्यतेमावजनतिरदृष्टद्वारिका तद्रूपापा २५७

दानकालीनशरीरगोचरत्वेतितद्रूपव्याप्तिवारणायैतद्विशेषणमिति। नचैवमपिनिदिध्यासनादेरसं
ग्रह इतिवाच्यं। तत्रतदुपादानगोचरजन्यकृतेरेवानभ्युपगमात्। अभ्युपगमेवाऽस्मदादिकर्तृकत्वे
नासंग्राहकत्वात्। अदृष्टाद्वारकतदुपादानगोचरकृतेरेवतत्कर्तृतानिर्वाहकत्वात्। नचादृष्टाद्वार
कत्वमात्मगुणाद्वारकत्वमितिवाच्यं। कृतिद्वाराभूतात्मगुणएवाव्याप्तेरिति। एवंचैतन्मते: जेहचितनज
न्यस्वर्गेप्यव्याप्तिवारणायैतद्विशेषणं। तज्जनकादृष्टंत्वस्मदादिकर्तृकमेवेतिसंक्षेपः। ध्वंसेगोत्वादौवा
व्याप्ति लिंवारणायसमवेतपदजन्यपदे। अचादृष्टाजनकेतुक्तेवाधः। ईश्वरकृतेरप्यदृष्टजनकत्वादितितद्वा
रणायतमेवार्थंजन्यंतरेण। ह अदृष्टेति। अत्रव्याप्तिश्चकालिकी। ननूपादानपदंयत्किंचिदुपादान

२५च

तथैवाग्रेग्रंथकृता विभावनात्। तथा च व्याप्तिमादायांशतः सिद्धसाधनता द्वयस्यात्। नान्त्यः॥२

वि॰अ॰ग॰ २५॰ परं॰ प्रतो ऽनुपादानपरं वा॰ नाद्यः॥ शब्दादावं ऽशतः सिद्धसाधनात्। न च तत्र ज्ञानेच्छयोर्न कारणत्वं विजि
250 ज्ञतिमात्रस्यैव मिलितानां तेषां स्वविषयसमवेतकार्यं प्रत्येव जनकत्वादिति वाच्यं। तथापि ज्ञानादिचरितं प्र
त्येकं साध्यत्वयां ऽप्रसिद्धेरिति चेत्। मैवं। उपादानगोचरत्वे न यस्य ज्ञानादेर्जनकत्वं तादृशात ज्ञत्वं सा
ध्यं तेन च रूपेण स्वविषयसमवेतकार्यं प्रत्येव तस्य जनकत्वमिति नांशतः सिद्धसाधनं। नन्वेवमदृष्टप्रा
गभावेत्यादिविशेषणं व्यर्थं जन्यांतरीयज्ञानादीनां तेन रूपेण जनकतया सिद्धसाधनानवकाशादिति चेन्न।
कालीरूपे ऽन्तेदवितनजन्यस्वर्गे वांशतः सिद्धसाधनवारकत्वादिति। अत्रादृष्टपदं स्व [illegible] जनकादृ
ष्टपरं। न चैवं क्वचित्पक्षः क्वचिद्दृष्टांत इति पूर्वोक्तानुगमस्तदवस्थ एवेति वाच्यं। सामान्यव्याप्तेर्गृहे २५॰

तस्यादोषत्वात्। तस्याएव प्रकृतानुमानांगत्वे नातिमतत्वात्। द्वितीयसाध्ये स्वपदोपादाने नतथैवगं
यकत्वज्ञात्पर्य्यन्तियनात्। अन्यथा स्वपदानुपादानेपिजनकत्वगर्भंसाध्यमननुगतमेवस्यादिति। अ
त्र यद्यपि प्रत्यक्षे त्वेवं वक्तुमुचितं घटइतिवाच्येऽनघटइत्यप्रयोगात्। तथापि प्रत्यक्षत्वस्येंद्रियजन्यत्वे
बाधः। साक्षात्त्वज्ञातिपरत्वेपरं प्रत्यसिद्धिरित्युक्तयप्रसिद्धये परोक्षेत्युक्तं। तदर्थस्तु लिंगादिकरणकज्ञा
नान्यज्ञानत्वमुक्तयसाधारणमेवेतिध्येयं। स्वजनकेति। अत्र स्वजनकेत्यादिविशेषणं पूर्वोक्तकालीनोपाद
वंचातःसिद्धसाधनवारणाय। तादृशेव पूर्वोक्तरूपेणांचातःसिद्धसाधनवारणं। अपरोक्षेति। तादृशज्ञान
विषयोपादानसमवेतानीत्यपीति। अर्थलडर्थयोरविवक्षितत्वमत्रेति ध्येयं। ननु कालीनोपेऽभेदवित

नजन्यस्वर्गेच्छांचात:सिद्धसाधनमितिवेत्।स्वजनकादृष्टोन्तरापरोक्षज्ञानादिविषयोपादानसमवे
तत्वस्यविवक्षितत्वात्।नवादृष्टजनकोन्तरकालीनतादृशज्ञानादिविषयत्वस्यापिसंभवात्पुनःसिद्ध
साधनमेवेतिवाच्यं।ज्ञानादेःस्वजनकत्वेनापिविवक्षणीयत्वात्।उपाधिभेदाच्चनपूर्वसाध्याद्वैशिष्ट्यं।स
मवेतत्वइति।ध्वंसव्यभिचारवारणायसत्त्वंतं गोत्वादौव्यभिचारवारणायजागन्नावेत्यादि।पूर्वंनिदिध्या
सनादेरभेदविततनजन्यादृष्टस्यचस्वोपादानगोचरजन्यकृतिजन्यत्वानभ्युपगमात्।अभ्युपगमेवाऽस्मद
दिकर्तृकत्वमेवेतिनदोषइत्युक्तं।[illegible]संप्रतितादृशाजन्यकृतिजन्यत्वेनाभ्युपगमानंतर्गतत्वंमाभ्युपगम वा
दादिकर्तृकत्वंतेषांजन्यात्मविशेषगुणानामीश्वरमात्रकर्तृकत्वस्यपूर्वमुक्तत्वात्।प्रापितमादायपक्षत्वनि २५१

×निदिध्यासनादेरभेदविततनजन्यादृष्टस्यचर

ईश्वरात् न कोपि दोष इत्यभिप्रेत्याह उक्तेति। न च जन्यत्वेति। दोषायेति शेषः। ननु परक्तेति। उभयसिद्ध
प्रयोजनकत्वं तत्त्वं न तु प्रयोजनस्योभयसिद्धिरिति भावः। ननु सकर्तृकत्वे विवादात् साध्यान्तरेऽर्थान्तरमि
त्यत आह उक्तेति। ननु ज्ञतिजन्यत्वमेव सकर्तृकत्वं न तच्च दृष्टप्रागभावादिघटितमित्यत आह अत एवेति।
वत एवं हि भोगकादृष्टद्वारा भोक्तृजनितजन्ये घटे भोक्तृकर्तृकत्वव्यवहारापत्तिरित्यर्थः। ननु यथाश्रुतान्य
तमत्वमेव सकर्तृकत्वं तदा ध्वंसः सकर्तृको न स्यात् तथा चानुमानाज्जगन्निर्माणकर्तृसिद्धिरित्यपि न स्यादि
त्यत आह यद्वेति। ननु पद्रष्टुपादानपदं कारणमात्रपरं यथाश्रुतमेव वा। आद्ये ज्ञानादेरसंग्रहापत्तिः। द्वि
तीये तु ध्वंससंग्रहार्थं जन्यं चेत्यत्र जन्यं विशेषणमनर्थकं। तस्य स्वोपादानाभावेन स्वोपादानगोचरजन्य

जतिजन्यान्यत्वेनैवसंगृहीतत्वात्। न चोपादानमधिकरणं विवक्षितं मृदंगादेश्चन्नाद्यधिकरणत्वं ऽ
किंत्वधिकरणतावच्छेदकत्वमिति वाच्यं। अधिकरणता समवायेन विवक्षिता संबंधमात्रेण वा। नाद्यः। उक्तदो
षात्। नांत्यः। अवच्छेद्यावच्छेदकभावसंबंधेन मृदंगादेरपि शब्दाधिकरणत्वात् अत एव शरीरस्यापि भोगा
धिकरणत्वमत एव च मृदंगादौ शब्द इति प्रतीतिरिति चेत्। मैवं। पदं ह्युपादानपदं कारणमात्रपरमनुपा
देयमेव वा। जन्ये छेत्यत्र जन्यज्ञाने छेत्यर्थः। अन्यथा प्रतियोगितये च्छाजन्ये विरोधिगुणत्वेन च जन्यत्वं ति
जनिते च्छाध्वंसे परूतावच्छेदकाव्याप्त्यापत्तेः। एवं च शब्दादीनां संग्रह एव। मिलितानां ज्ञानादीनां स्वविष
यसमवेतकार्यं प्रत्येव जनकत्वात्। अत एव तत्रास्मदादीनां त्रातः सिद्धसाधनं। न चैवमुक्तस्यसाध्य २५२

स्यध्वंसे बाध एव स्यादसमवेतत्वात् ज्ञानादीनां च स्वविषयसमवेतकार्यं प्रत्येव जनकत्वादिति वाच्यं।
अनित्यानामेव तेषां तथात्वावधारणात् ध्वंसे च नित्यानामेव तेषां अन्यत्वस्य साध्यतापर्य्यवसानात्।
न चैवं ऊर्ध्वापि महाद्रितिध्वंसादौ नास्मदादीनां कर्तृत्वं स्यादिति वाच्यं। एतन्मते इष्टापत्तेः। अत एव ध्वं
समात्रस्यैवेश्वरकर्तृकत्वात् ध्वंसोपि पक्ष इत्येव ग्रंथकृतोक्तं· ननु ध्वंसविशेष इतिदिक्। अत्र च म
ते क्षतिमात्रघटितं न साध्यमतो नांशतः सिद्धसाधनं। द्वितीयसाध्ये उपादानपदं कारणपरं बोध्यं ननु
न देयमेवेति। पक्ष इति। प्रतिज्ञाविषय इत्यर्थः। तयोरिति सम्बन्ध्यं तस्य पक्षपक्षसमयोरित्यर्थः। तस्मादि
ति। यथा च व्यभिचारज्ञानस्य दूषकत्वं तथोक्तं। साधारणानैकान्तिकलक्षणव्याख्यानावसरे ननु

ई·बा·

वि·अ·ग·
२५२
253

सर्वत्रघटादेःपश्चानन्तर्भूतत्वात्तदुपादानगोचरत्वेनईश्वरज्ञानस्यासिद्धेर्न्नसर्वविषयत्वसिद्धिरित्यत·निय
तेति·उपादानगोचरेतिविशेषणान्नाश्रयासिद्धिः।तृतीयकोटेरभावादनियतविषयज्ञानजन्यत्वसिद्धिरित्यर्थः।एतच्चो
पनीतभानवादिमते।ननुसाध्यगतेनोपादानपदेनक्षित्याद्युपादनमेवनविवक्षितं·किंतुघटाद्युपादानम
पि·तथाचघटाद्युपादानगोचरज्ञानादीनांक्षित्याद्यजनकत्वेपितदुपलक्षितास्मदादेर्जनकत्वसंभवाद
र्थान्तरं।नचतेषांनसर्वविषयत्वं।अनादौसंसारेयोगिनस्तादृशज्ञानादेरपिसंभवादित्यतआहसाध्येचे
त्व ति।साधनत्वंजनकत्वं।नन्विति।ननूपादानगोचरत्वेनजनकस्यपूर्वंविवक्षणात्घटोपादानगोचरस्यातथा
त्वान्नेयंशंकेतिचेत·नातेनैवरूपेणजनकत्वमवाप्यायातुइत्यर्थोपादानसंभवात्।नचतेषामसर्वविष २५२

यत्वान्नतेरर्थान्तरमितिवाच्यं।व्यापकतावच्छेदकप्रकारनैयत्यमनुमितौयन्मतेतत्रसर्वविषयत्वसि कत्व
द्धर्थमग्रेप्रकारान्तरमेवऽभिविष्यतीतितन्मतेनैतत्संभवात्।ज्ञानादीनामिति।अस्मदादिज्ञानादीनां।अदृ
ष्टाद्वारकाणामितिशेषः।अतएवेति।बाधेनतत्सिद्धिप्रसंगाभावादित्यर्थः।रूपत्वेनेति।प्रत्यासत्त्येतिशेषः।
तद्विलक्षणमिति।तथाचसामान्यज्ञानप्रत्यासत्तिजन्यप्रत्यक्षयोःस्वरूपायोग्यत्वान्नतज्जन्यत्वेनार्थान्तरम्।
प्रतिसर्गे नचयोगिप्रत्यक्षमादायदोषः।तादृशानांयोगिकल्पनेगौरवाल्लाघवादेकस्यैवसिद्धेरितिभावः।कर्तृत्वमि
ति।एतच्चनयन्मतेज्ञानादीनांस्वविषयसमवेतकार्यप्रत्येवजनकत्वंतत्रेतिध्येयम्।मासकलेति।ज्ञानानुरोधात्स
कलेत्युक्तं।इच्छाकृत्योस्तुस्वंउद्दिश्युपादानैकदेशाविषयत्वमपिनेतिबोध्यं।अतएवेति।घटणुकोपादानपर

माणुगोचरत्वस्यादेरभावादित्यर्थः। सपक्षत्वमेवेति। तत्र सन्दिग्धजलबिन्दुसमुद्रयोरेवावयवत्वेनोपादानगो
चरज्ञानादिसंभवादस्मदादिकर्तृकत्वमित्यर्थः। नन्विति। तथा च घटादौ व्यभिचारोपीति भावः। आत्मेति। आत्मत्वमि
त्वस्येत्यर्थः। यद्वा समवेतत्वपक्षधर्मावच्छिन्नसाध्यव्यापकोयमुपाधिरिति। ज्ञानध्वंसादौ साध्याव्यापकत्वं। नेत्यादि न
ति। विशेषणत्वे बाधकं विना उपलक्षणत्वस्यायुक्तत्वादिति भावः। आत्मेति। तथा चात्मसंयोगस्य क्रियायामेव हेतुत्वं न
क्तं तस्य द्वाराघटेपीत्यर्थः। क्रियेति। कपालरूपजन्यघटरूपे व्यभिचारादाह क्रियेति। स्पंद इत्यर्थः। गुरुत्वजन्यपत
व नक्रियायां वेगजक्रियायां व्यभिचारादाह। व्यधिकरणेति। नन्वाम्रादिपतने व्यभिचारः। स्वव्यधिकरणस्वाश्रया
वयवीयाम्रादिजन्यत्वात् तस्याश्रयावयवसंयोगाजन्यत्वाच्चेत्यत आह। गुणेति। अत्र गुणजन्यत्वं गुणव्यतिरेकप्र २५४

युक्तव्यतिरेकप्रतियोगित्वं। तेनेश्वरज्ञानादिजन्यत्वेपि क्रियायांनेश्वरसंयोगोसमवायिकारणमितिव्यभिचा
रोन भवतीति युक्तितौल्यात्तस्याप्यसमवायिकारणत्वमित्यप्याहुः। एतेन मंत्रपाठजन्यविषचलनेपि व्यभि
चारो निरस्तः। इष्टापत्तेः। अदृष्टद्वारत्वेन विशेषणाद्वा। मंत्रस्याशुविनाशित्वेनादृष्टद्वारकत्वात्। ननु चलायाम
कदिगवस्थिताधिकगुरुत्वजन्यापरदिगवस्थितोन्नमनक्रियायां व्यभिचार इति चेत्। न। तत्राधिकगुरुत्वाश्रयद्र
व्यसंयुक्तसंयोगस्योन्नमनहेतुत्वात्। पंकादौ तस्य तद्धेतुत्वकल्पनात्। गुरुत्वस्य चोन्नमनहेतुत्वाकल्पनात्। तत्कार
णत्वाभ्युपगमेपि प्रत्यक्षपदमपि गुणविशेषणं देयं। न चैवं व्यधिकरणपदवैयर्थ्यं। वेगादिजन्यक्रियायां तथापि
व्यभिचारात्। न चादृष्टवदात्मसंयोगस्यैवं कारणता न स्यादिति वाच्यं। व्याप्यन्तरेणापि तत्संभवात्। तच्चानुपद

मेवं वक्ष्यामः। नन्वेवमपि क्रियायामात्मकारणत्वसिद्धावपि घटेन तत्सिद्धिः तथा च साध्यवैकल्यं तदवस्थमेवेति
चेत्‌। मूर्त्तवृत्तिजन्यत्वात्कार्यं यदाश्रयगुणनिमित्तकारणकं तत्तत्समानाधिकरणगुणजन्यमिति व्याप्त्या तत्सिद्धेः। यदि चात्र
व्यभिचारशंका तदा विशेषणान्तरमपि प्रवेश्यम्। न चात्र विपक्षबाधकाभावः। अप्रत्यासन्नस्य जनकत्वेऽतिप्र
संगात्‌। पूर्वव्याप्तावपि एतदेव विपक्षबाधकमिति संक्षेपः। विशिष्येति। क्रियाया इत्यत्र क्रियापदेन कर्म्मा
ज्ञाभिधाने इत्यर्थः। असमवायीति। असमवायीति प्रकृताभिप्रायेण। कारणसंयोगाश्रयस्येत्यत्र तात्पर्य्यं। वि
शेष्यबाधे सत्येव सविशेषणे हीति न्यायावतार इत्यपरितोषं हृदि निधायाह। अन्यत्वेति। सतीत्युपलक्षणं। ज्ञा
नेछत्यपि द्रष्टव्यम्। अत एवानुपदं तथैव विशावयिष्यति। साध्याप्रसिद्धेर्वेति। यद्युक्तदोषत्रिया दृष्टान्तस्याज्ञ

स्तदासाध्यात्वसिद्धिरेव दोष इत्यर्थः। ननूपादानप्रत्यक्षं विनापि शाब्दाद्यर्थिप्रवृत्तेर्व्यभिचार इत्यत आह प्र
वृत्तिविषयेति। न ह्युपादानप्रत्यक्षत्वेन कारणत्वं ब्रूमः किन्तु प्रवृत्तिविषयप्रत्यक्षत्वेन· प्रवृत्तिविषयश्च न
गगनादि· किन्तु मृदण्डादिकमेव· तच्चास्मदादिप्रत्यक्षमेवेति न व्यभिचार इत्यर्थः। अत्र वायवीयशरीरप्रत्य
क्षाभावेन तज्जीवरप्रयत्नाभावात्तत्र कथं चेष्टेति चिन्त्यम्। अदृष्टेति। न वादृष्टवदात्मसंयोगादेव तत्र क्रियो
त्पत्तिरस्तु किं प्रयत्नेनेति वाच्यं। स्वतन्त्रान्वयव्यतिरेकानुविधायित्वादिति भावः। न च भगवतीति। न चायथार्थैव सा
स्त्विति वाच्यं। विशेषदर्शनवत ईश्वरस्य तदसम्भवादिति भावः। ननु स्वसुखादिसाधनतानुमितित्वेन न
य कारणता किन्तु स्वेष्टसाधनतानुमितित्वेन तच्चं न बाधः सर्वस्यैवेश्वरेच्छाविषयत्वादित्यपरितोषादाह

चि॰ अ॰ म॰
२५६
256

नचेति। तथापि तादृशानुमितित्वेन न कारणता। किंतु तादृशाज्ञानत्वेन। तादृशं च तत्प्रत्यक्षमेव भवतीति प
क्षधर्मताबलात् तदनुमिताविव प्रत्यक्षजन्यत्वमेव सिध्यतीति भावः। रागवत इति। इच्छावत इत्यर्थः। द्वेषस्त्वि
ति। दुःखे तत्साधने वा यतो द्वेष उत्पद्यते ततस्तदभाव इच्छा भवति न त्वन्यथा। द्वेषाविषयघटादावभावेच्छा
विरहात् तथा च दुःखादिद्वेषो दुःखाभावादाविच्छामुत्पादयति ततः कृतिरितीच्छायामेव तदुपक्षय इत्यर्थः। इदं
च प्रवृत्तिप्रयत्नमात्रे प्रत्याय्य निवृत्तिप्रयत्ने तु द्वेषजन्यत्वमेवासमानविषयतया लाघवेन प्रवृत्तिप्रत्येव चिकी
र्षाया हेतुत्वात्। निवृत्तौ तु समानविषयतया द्वेष एव हेतुर्न त्वभिन्नविषया चिकीर्षा। न च प्रवृत्तिविरह एव निवृ
त्तिः वैपरीत्यापत्तेः। तदुक्तं कुसुमांजलौ। प्रवृत्तिप्रयत्नो रागान्निवृत्तिस्तु द्वेषादिति। न चैवं कथं व्याप्तिर्वा रोद्वेषः २५६

निवृत्तेः क्रियाविरहहेतुत्वेन प्रवृत्तिसाध्यतानियमेन च कार्य्याणां चिकीर्षाजन्यत्वनियमात् तन्नैवं कृत इत्या
दिग्रंथः कथं इत्थं कारणान्तरमेव निवृत्तेः कल्प्यतामित्याक्षेपे शत्रुं द्वेष्मीत्यनुव्यवसायसाक्षिको द्वेषसति
तत्र न ततोन्यत्कारणं कल्प्यमिति परीहार इत्येतदभिप्रायकत्वादिति वस्तुतस्तु प्रवृत्तिविरह एव निवृत्तिः न वै
वैपरीत्यं सुषुप्तिदशायामपि निवृत्तिविरहस्य सत्वेन प्रवृत्तिसाध्यचेष्टादिकार्य्यापत्तेः न च तदा निवृत्तिरेवास्ती
ति वाच्यं तत्कारणद्वेषाभावेन तदभावात् द्वेषाभावश्च तत्कारणदुःखतत्साधनत्वज्ञानाभावात् तथाव्यवसायीन
मते ग्रंथकर्तुरनुशयप्रकाश एवायमिति मंतव्यं एवं च यथाश्रुत एवाग्रिमग्रंथः सुकर इति यत्र तु धूमवत्वादौ
व्याप्तिग्रहः सर्वसिद्धस्तत्र साध्यसामान्यव्यतिरेकग्रहोस्त्येवेति न व्याप्तिग्रहस्तत्र व्यभिचारीति दर्शयति वह्नि

मात्रेति। समवायिमात्रस्येति। आकाशात्मादेरपि व्यापकसमवायित्वाभ्युपगमादिति भावः। ननु द्रव्यगुणकारणत्व
वत्समवायिकारणत्वं विशिष्टं न ज्ञातं किं तु समवायित्वसमानाधिकरणं कारणत्वमेव तत्र तथा चोक्तं यद्ग्राहकस
माज्ञाडुत्पययग्रहे आर्थः समाज इत्यपरितोषादाह· यद्वेति। बाधकं विनेति। सामान्यरूपेण व्यभिचारज्ञानाभावेस
तिततो व्याप्तिग्रह इति भावः। सकलधूमगोचर इति मन्मते· प्रसिद्धधूमगोचर इति परमते तत्र सामान्यलक्षणा
नंगीकारादिति ध्येयम्। कार्यत्वस्येति। कार्यत्वस्य हेतोर्विपक्षवृत्तित्वनिवृत्तये सर्वत्र तृणादौ कार्येऽतीन्द्रियः कर्त्ता
येत्स्वीक्रियते। तदा कापि तद्व्यतिरेकनिश्चयो नेति तद्धेतुर्यात्कथं व्याप्तिर्ज्ञायेत। अथ तद्व्यतिरेकसिद्ध्यर्थितया दृ
श्यएव कर्त्ता स्वीक्रियते तदा तद्भिन्नेऽपि तृणादौ कार्यत्वमस्तीति तत्रैव विपक्षे तस्य व्यभिचारमीक्षणमित्यर्थः दृश्यस्येति। २५७

योग्यस्येत्यर्थः। तथा चाविधनवह्नेर्दृश्यमानधूमोत्पत्तिर्नसमर्थिता तस्यायोग्यत्वादिति भावः। व्यर्थविशेषणत्वे
नेति। अखंडाभावानभ्युपगंतृमतेनेदं साध्याभावेति। केवलान्वयी नास्त्येवेति भावः। अत्र केवलान्वयिव्याव
स्थापनाद्व्यतिरेकव्याप्तिविरहेप्यन्वयव्याप्तिसत्तामात्रेणानुमितिविरोधः। न चान्वयव्याप्तेरेव व्यर्थविशेषण
त्वान्न विशिष्टव्यापकत्वग्रहः। विशिष्टकारणत्वेन विपक्षबाधकसंभवात्। अन्यथेंधनविशिष्टवह्नावपि धूम
व्यापकत्वं न गृह्येत। न च तत्र वह्निमात्राद्धूमानुत्पत्तेर्विशिष्टं कारणतावच्छेदकं प्रकृते चात्मत्वमेव तथा लाघवादि
ति वाच्यं। अन्यात्मनिष्ठज्ञानादेऽसत्यप्यात्मनः कार्यस्य परादेरुत्पत्तिप्रसंगभयेन ज्ञानादेरवश्यं कारणतावच्छे
दकत्वात्। न च तेषामपि कारणत्वान्न कारणतावच्छेदकत्वमवच्छेदकत्वे वा न कारणत्वं दंडत्ववदिति वाच्यं। उक्तहेतो

रवच्छेदकत्वेपिज्ञानाद्युत्कर्षेणकार्योत्कर्षदर्शनात्तेषामपिकारणत्वात्। अतएवालोकरूपस्यावच्छेदकत्वे
प्यतिव्यंजकत्वमितिसिद्धांतः इतियद्यपितथाप्यसुपेत्याह-यत इति। अन्येतुसाध्येनव्यर्थविशेषणताहेतुसमा
नाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वाभावस्यगुरुण्यपिसाध्यतावच्छेदकेसुग्रहत्वात्। अवच्छेदकतायां
हिसवतिगौरवंदोषोयथाहेतुनिष्ठनीलधूमत्वादौ। साध्यनिष्ठधर्म्मत्वावच्छेदक [illegible] र्यं
ग्राह्यमेवनः किंतूक्तप्रतियोगितावच्छेदकत्वाभावः सचगुरुण्यपिसुग्रहएवान्यथातादृशाधर्म्मस्योक्तप्रतियोगि
तानवच्छेदकत्वस्यकेनापिप्रमाणेनाग्रहणेप्रतियोगितावच्छेदकत्वमेवासिद्धंस्यादित्याशंक्य अन्योन्याभावग
र्भव्याप्तौसाध्यवत्वावच्छेदेनसाधनसमानाधिकरणान्योन्याभावप्रतियोगित्वस्यग्राह्यतयातत्रकल्पेव्यर्थ २५८

विशेषणत्वमेव। तदानीलधूमत्ववदवच्छेदककोटिप्रवेशादित्याकूतः। योग्येति। शरीराभावस्य योग्यानुप
लंभेन ग्रहाद्धि विशिष्टाभावस्यानुमानादित्यर्थः। ननु तर्हि विशेषविरोधो दूषणमित्यपेक्षायामाह॰ लिंगेति। उपसंहा
रेति। यद्यप्येवं घटत्वपटत्वयोरपि विरोधो न स्यात्तथापि तदुभयाश्रयैकसाधकमानाभावात्तन्न सिद्ध्यति॰ अत्र
ते च न तदभाव इति भावः। अत एव यत्र तत्साधकमानं तत्र विरोधज्ञानमकिंचित्करमित्याह॰ अत एवेति। साध्यसा
धनत्वमिति। तथा च नृतेर्न्न हस्तादिव्यापारोद्धारमिति भावः। तद्द्वारैवेति। यद्यपि सर्गाद्यकालीनं घटादिकं प्रति
शरीराधिष्ठातुरीश्वरस्य न बाधस्तथापि परेण तदनंगीकारादिति भावः। चेष्टेतरेति। यदि वा नेदं चेतनादावप्य
स्मदादिकर्तृकत्वं तदा तदितरत्यपि बोध्यं। तथापि चेष्टाबाधादिति। एवं चेति। चेष्टेतरकार्य्ये इदं बोध्यं। द्वारं विनेति॥

ई·च·

वि·अ·न·
२५९
259

कारणत्वस्य जन्यत्वगर्भत्वादिति भावः। प्रस्तुतानुकूलमित्याह। विशेषयोरिति। अन्यथेति। प्रतिबंधकाभावस्य निमि
त्तत्वादिति भावः। प्रतिबंधकाभावस्येति प्रतिबंधकप्रागभावस्येत्यर्थः। अन्वयव्यतिरेकादिति। अन्यथानिय
तरूपाद्युत्पद्येतेति भावः। तत्रापीति। विनश्यदवस्थेपीत्यर्थः। गौरवमिति। एतच्च वस्तुगतिमनुरुध्योक्तं। वस्तुतः
सहभावगर्भेपि हेतुत्वे यत्र सहभावो नश्यतस्तत्रास्तु हस्तादिव्यापारद्वारा संभवन्ते तु नित्यत्वतः स्यात एव तत्सहभा
व इति किं तदपेक्ष्येति बोध्यं। इष्टापत्तिमाशंक्य प्रागभावहेतुत्वं साधयति· अन्यथेति। विरामादिति। एतेन प्रतियो
गिनः प्रतिबंधकत्वाभ्युपगमेपि न सर्वत्र प्रतिबंधकाभावेपि कार्यसहभूतत्वेन हेतुत्वं· किंतु यत्र तथान्वयाद्यनुवि
धानं तत्रैव तथेति विभावितं। अत एव विशिष्टसिद्धेः प्रतिबंधकत्वेपि तद्विरहरूपायाः पक्षतायाः न तथाकारणत्व २५९

मिति। एकदेति। एकमितिसंपातायातं। एकदेवज्ञनयन्नीत्येवमनुसंगतेरिति। बुद्धिरिति। कर्त्तृत्वनिर्वाहकं हे
तुत्वं बुद्धेरिच्छाद्वारैवेतिभावः। सत्प्रतिपक्षवदिति। एतेनसत्प्रतिपक्षच्छाययैवास्या व्याप्तेः प्रतिबंधकत्वेहत्वाभा
सान्तरत्वचारकानेतिदर्शितं। वक्तायइति। तथा चनसत्प्रतिपक्षत्वं तुल्यबलत्वाभावादितिभावः। विरोधित्वादिति। त
था च पक्षधर्म्मताविनाकृताया अपि तस्या विरोधित्वात्तुल्यबलत्वमस्त्येवेतिभावः। किंचेति। ज्ञानमनित्यमेवेति व्याप्तौ
संसारिज्ञानत्वनित्यज्ञानान्यज्ञानत्वादिकमुपाधिर्वाच्यः। सर्वेश्वरनित्यज्ञानयोरभावान्नसंभवतीत्यर्थ इत्याकूः।
वयंतु ज्ञानमनित्यमेवेति व्याप्तौ अनित्यत्वरूपसाध्यव्यापकस्योपाधेर्ज्ञानत्वरूपसाधनाव्यापकत्वं नास्मदादिज्ञा
नेग्राह्यं। तच्चोपाधिसत्त्वादेव। अनित्यत्वस्यैव तद्व्यापकस्यास्मदादिज्ञानेपिसत्त्वात्। अन्यथा साध्याव्यापकत्वे

नैवानुपाधिता पक्षेः। तथा च नित्यज्ञाने साधनाव्यापकत्वं ग्राह्यं तच्च न संभवति तदसिद्धेः। अतएवाह। तदव्यावर्त्त
कतयेति। तच्च ज्ञानत्वरूपसाधनाव्यापकतया य उपाधिस्तन्निश्चयस्तत्संशयो वा नास्तीत्यर्थ इति विभावयामः।
उपाधेरिति। शरीरव्यापारजन्यत्वरूपस्येत्यर्थः। ननु यथा ज्ञानादिकार्ययोः कार्यकारणभावस्तत्र विपक्षबाधक
स्तथात्रापि निरुपाधित्वस्य व्यवस्थापितत्वात्तदेव विपक्षबाधकमस्त्वित्यपरितोषं हृदि निधायाह। वयं त्विति। य
द्यपि ज्ञानत्वावच्छिन्ने सर्वत्रैवानित्यत्वावगमात्तदवच्छिन्नेन नित्यत्वावगमः। अन्यथा बाधोपि प्रतिबंधको न स्यात्त
थापि सामान्यलक्षणानंगीकर्त्तुरस्मादृशं ज्ञानमेव न भवति। भिन्नविषयकं च ज्ञानं न प्रतिबंधकं। क्वचिन्नास्तीति ज्ञा
नानन्तरं घटः क्वचिदस्तीति ज्ञानस्यानुभवसिद्धत्वात्। अस्मन्मते तु विपक्षबाधकाभावेन तादृशव्याप्तेरेवासिद्धिः। न २६

चैवंबाधोपिप्रतिबंधकोनस्याद्भिन्नविषयत्वादितिवाच्यं।सामान्यलक्षणानंगीकर्त्तुरिदमनिष्टंनास्माक
मित्याशयात्।सामान्यरूपेणकार्यकारणभावेसत्युक्तरूपंज्ञानमप्रामाण्यशंकास्कंदितमितिनप्रतिबंधक
मित्यपिवदंति।व्याप्तीति।व्याप्तोपर्यवसायितयेत्यर्थः।नव्यास्त्विति।ज्ञानमनित्यमेवकार्यंज्ञानऽन्यमेवेत्यनयोः
हेत्वंपतोविरोधाभावाद्द्वितीयव्याप्त्यापक्षधर्मतासहितयानित्यज्ञानोपस्थापनेसतिसंस्यात्तयावविरोधज्ञा
नमकिंचित्करमुपजीव्यविरोधादित्यर्थः।अत्रेदमनभिमतिबीजं।ज्ञानमनित्यमेवेत्यनेनज्ञानत्वावच्छेदेनानि
त्यत्वावगमात्पक्षधर्मताबलादपिनज्ञानेनित्यत्वग्रहः।नित्यत्वानित्यत्वयोर्विरोधस्यपूर्वावधृतत्वादितिहिप
रस्याभिप्रेतंनतुनित्यानित्यज्ञानयोर्विरोधप्रतिसंधानंप्रतिबंधकत्वेनाभिमतंयेनोपजीव्यविरोधःस्यात्तथाव

ईश·

वि·अ·न· पूर्वोक्तमेव समाधानमत्र द्रष्टव्यम्।। साधनेति। यद्यपि समवेतत्वघटितं साधनं तेनैन विशेषितं तथापि सं वैतत्
२६१ ध्वंसाधारणपदत्वे जन्यत्वमात्रस्यैव साधनत्वमिति तदभिप्रायेणेदम्।। साधनविशेषितत्वस्साधनैकदेशावि
२६१ शेषितेनोपिनोपाधिरित्यभिप्रायेणैवेदं बोध्यम्।। आदेधनेति। इदं च पदमात्रव्यावर्त्तकविशेषणस्य सा
धनविशेषितस्योदाहरणं बोध्यम्।। व्याप्यमिति। अभेदव्याप्तिरूपसंबंधाग्रहादिति भावः। विशिष्टेति।
तथा च संबंधितावच्छेदकभेदात्संबंधग्रहो नानुपपन्नः। नीलघटयोरभेदसंबंधग्रहवदिति भावः।। का
८ रणजन्यत्वमिति। यद्यपि पदान्तरसमभिव्याहृतजन्यपदस्य तत्कारणत्वेन नात्र व्याप्यस्य व्यापककोटिप्र कत्वाद्य
वेशस्तथापि कारणजन्यत्वं कारणप्रागभावव्यापकप्रागभावप्रतियोगित्वं। प्रागभावप्रतियोगित्वमा २६१

त्वं जन्यत्वं विवक्षितम् । शरीरजन्यत्वोपाधौ तु शरीरकारणकत्वमेव विवक्षितं । तेन तस्य पूर्वोक्तसा
धनविशेषितो व्यापारो नासंगतः इति भावः । न तु स्वजन्यत्वं न स्वजन्यत्वावच्छेदकमुक्तं । किंतु शरीरं स्व
जन्ये सहकारीति । तथा च स्वजन्यत्वं शरीरजन्यतावच्छेदकं । एवं च शरीरजन्यत्वस्य कर्तृजन्यत्व
व्यापकत्वात् तद्व्याप्यत्वेन जन्यत्वस्यैव सकर्तृकत्वाव्याप्यत्वमनुमेयमित्यपरितोषादाह । हस्तादिना
पीति । साधनेति परमाण्वादीनामीश्वरप्रयत्नसाक्षादधिष्ठितत्वेन तज्जन्यत्वस्य पक्षेऽपि सत्त्वादिति
भावः । न च चेष्टाजन्यत्वमुपाधिश्चेष्टायामेव साध्याव्यापकत्वात् । न च चेष्टाश्रयजन्यत्वं तथा । अदृष्टद्वा
राहित्यादेरपि तज्जन्यत्वात् । यद्यप्यदृष्टाद्वारकचेष्टाश्रयजन्यत्वोपाधौ नोक्तदोषस्तथापि विपक्षबा

धकतर्काभावात्तस्य न साध्यव्यापकत्वमिति भावः। उक्तोपाध्यभिप्रायेणैव साध्यव्यापकताग्राहकं शं
कते। अथेति। शरीरेति। चेष्टाश्रयत्वार्थः। शरीरजन्यत्वेति। ननु शरीरजन्यत्वं शरीरकारणकत्वमुक्तमन्य
था साधनविशेषितत्वापत्तेस्तथा च कथं तद्ग्रहे जन्यत्वग्रह आवश्यक इति चेत्। अत्र केचित्। शरीरजन्यत्व
त स्य गुरुत्वाद्यावत्तस्य व्यापकत्वग्रहस्तावदेव कर्तृजन्यत्वे जन्यत्वमवच्छेदकीकृत्य ग्रहीतुमुपस्थितिला
घवादित्याहुः॥ अन्ये तु सकर्तृकत्वग्रहः प्रथममवश्यं वाच्योऽन्यथा शरीरजन्यत्वस्य तद्व्यापकत्वासिद्धेस्त
प च्चावच्छेदकग्रहः प्रामिक इत्यवच्छेदकं लाघवाज्जन्यत्वमेव न त्वन्यदित्यपत्तिप्रायकोऽयं ग्रन्थ इत्याहुः। उ
क्तोऽस्य रसेनैवाह। तुल्यन्यायत्वेन चेति। नहिरोधेनेति। न हि संभवति शरीरजन्यत्वं सकर्तृकत्वव्याप्य २६२

जन्यत्वाव्यापकं सकर्तृकत्वव्यापकं चेति भावः। अत एवेति। सकर्तृकत्वव्याप्यजन्यत्वाव्यापकत्वेन शरीरज
न्यत्वस्य सकर्तृकत्वाव्यापकतयाऽनुपाधित्वनिर्णयादिति भावः। कर्तृजन्यत्वेपीति। यद्विशेषयोरित्यादिव्याप्तिग्राह
कस्योभयत्रापि सत्वादिति भावः। एवं शरीरेति। जन्यतावच्छेदकस्य व्याप्यत्वनियमादिति भावः। उपजीव्यविरोधा
दिति। ननु चाननुगतस्यापि जन्यतावच्छेदकत्वात् घटत्वाद्यवच्छेदेनैव कर्तृजन्यत्वं गृहीतं शरीरजन्यतावच्छेदकत्वे
न गृह्यतां। अत एव नोपजीव्यविरोधः। न च हस्तादिजन्ये व्यभिचाराच्छरीरजन्यतावच्छेदकं कर्तृजन्यत्वमि
ति वाच्यं। शरीरपदस्य पूर्वोक्तचेष्टाश्रयपरत्वात्। न च शरीरजन्यतावच्छेदकमेव घटत्वादिकमस्तु कर्तृज
न्यतावच्छेदकं जन्यत्वमेवास्तां विनिगमकाभावादिति वाच्यं। तथापि जन्यत्वे सकर्तृकत्वव्याप्यत्वानिश्चया

रम्व॰

वि॰अ॰भ॰ २६३ 263

दितिचेत्तान्नचाहुः। कर्त्तृजन्यत्वे ऽन्यत्वमवच्छेदकं शरीरजन्यत्वे सकर्तृकत्वं वा यद्विशेषयोरित्यादेर्ग्री
हकस्य समानत्वादिति संज्ञाये लाघवाज्जन्यत्वस्यैव कर्तृजन्यतावच्छेदकत्वं कल्प्यते कर्तृजन्यत्वस्य गौरवा
त्तानचैकप्रतियोगिकजन्यतावच्छेदकद्वयोपस्थितौ लाघवावतारो न वात्र तथा ऽजन्यस्याप्युजन्यजन्यतावच्छेद
कत्वसंभवादिति वाच्यं ऽजन्यनिरूपितोजन्यजन्यतावच्छेदकत्वस्य प्रकृते विरुद्धत्वेन एकत्रैवावच्छेदकत्वकल्पना
प्रसक्तौ ऽक्त तत्कल्प्यतामिति लाघवावतारसंभवादिति। शरीरजन्यत्वस्य रूपादावपि सत्वात् तन्मते कर्तृजन्यत्वं न्यू
नवृत्तितया तदवच्छेदकं न संभवतीत्यपाहुः। अस्य प्रसिद्धेति। इदं च सर्वसामान्यलक्षणानभ्युपगमेन परं ज्ञात्वा पाद
दर्ने। तस्य गौरवापेक्षाभावाभावविषयत्वेनत्व यावच्यं वा[illegible]त्वादित्येवमर्थकतया तस्येत्यादिफक्किकापियोज्येति न २६३

स्य·त

स्वसिद्धान्तविरोध इत्याहुः। अप्रतीतेति। यद्यपि परमते प्रतियोगितावच्छेदकप्रकारकज्ञानस्यैवा
भावधीकारणत्वं न तु प्रतियोगिज्ञानस्यावश्यकत्वात्। अन्यथा बाधोपि तन्मते प्रतिबंधको न स्यात्तस्याद्य
घटादिसामान्याभावज्ञाने सामान्यलक्षणानभ्युपगमेन सकलप्रतियोगिज्ञानासंभवात्तथापि स्वमता
वष्टंभेनेदं द्रष्टव्यम्। वस्तुतस्तु स्थापनानुमानस्य तर्कसचिवत्वादस्य च तदभावात् न्यूनबलत्वान्न सत्प्र
तिपक्षत्वमिति भावः। ज्ञानमात्रेति। यद्यत्र जातिपदमपि तदा नित्यमात्रवृत्तीति साध्यार्थो ज्ञानातिरिक्ता
वृत्तित्वं च हेत्वर्थो विवक्षणीयस्तथा चाक्षत्वौ व्यभिचारवारणाय तदिष्टव्यं। केचित्तु कालादिवर्त्तमानत्वे
नाप्रसिद्धिः स्याज्जातिपदोपादाने च जातित्वनिर्वाहकसंबंधेन ज्ञानमात्रवृत्तित्वहेतुलाभ इत्याहुः। वतनेति।

रूपादौ संख्यादौ व्यभिचारवारणाय चेतन विशेषपदं। यद्यपि यथाश्रुतं भावनायां व्यभिचारि पर
माणुवृत्ति नित्यास्थितस्थापकवृत्तिसंस्कारत्वजातिमत्त्वात्तस्याः तथापि हेतौ गुणपदं प्रत्यक्षेण विशेष्यं।
एवं चात्मैकत्वप्रत्यक्षत्वपक्षे विशेषपदं। आत्मेति। यद्यपि न नित्यविशेषगुणाधार इत्येव साध्यमुचितं।
तथापि तन्मते शब्दस्य नित्यतया आकाश एव व्यभिचारः स्यात्। अस्मन्मते चेश्वरात्मनः सिद्धासिद्धिव्याघा
तेनापक्षतयाऽस्मदाद्यात्ममात्रपक्षत्वे सिद्धसाधनं मा भूदिति नाशकजातिगर्भं साध्यमुपात्तमिति बो
ध्यं। न च दृष्टाजनकशरीराजन्यत्वं हेतुः। न च हस्तादिजन्ये तथापि व्यभिचारः शरीरपदस्य चेष्टाश्र
यपरत्वादित्यपरितोषादाह। अपि चेति। निर्विशेषण इति। व्यभिचारवारकविशेषणशून्य इत्यर्थः। आ

अन्यथासिद्धमेयत्ववतीत्येव ब्रूयात् ४

न्यथेति। यदि ज्ञातिर्निरूपिता व्याप्तिर्न किं तु व्यक्तिव्यावर्त्तनीयातदा व्याप्तत्वपरस्परव्यावर्त्तनीयत्वेनप
रस्परस्यान्योन्याश्रयापत्तिरित्यर्थः। व्यभिचारावारकविशेषणज्ञानं व्याप्तिग्रहप्रतिबंधकमित्यभिप्रेत्य
शंकते। व्यभिचारेति। विशेषणशून्ये विशेषणज्ञानशून्ये इत्यर्थः। अतएवोत्तरत्र प्रमेयत्वेन ज्ञायमानत्व
पर्यन्तमुपात्तमितिः। व्यभिचारादिति। आकाशादिपक्षके ज्ञेयत्वविषयकतयैवानुमितिजनकत्वादित्यर्थः।
अतएवान्यथासिद्धिरपीति भावः। धूमस्यापीति। आलोकविषयतयापि तस्य तज्जनकत्वादित्यर्थः। अत्रय
द्यपि व्याप्यत्वावृत्तिर्व्याप्तिर्यत्र विशेष्यबाधस्तत्र वाच्या। यथार्द्रेंधनप्रभववह्निमत्त्वादौ तज्जनसंभवतिधू
मादिसामानाधिकरण्यस्य संयोगविशेषस्य वह्निधूममात्रनिष्ठत्वात्। अपि चार्द्रेंधनादौ विशेषणव्याप्य

चि॰अनु॰
२६५
265

भावनिश्चयेपितदवच्छिन्नवह्निविशेषव्याप्तिग्रहादनुमितिस्तथापिपक्षधर्मोक्तविशिष्टव्याप्त्यभिप्रा
येण दूषयति। नेति। ननु नीलधूमहेतौ साधनावच्छिन्नसाध्यव्यापकं धूमवत्त्वमुपाधिः तथा च नोपाधि
कत्वाभावसाधनेन बाध इति शंकते। नवेति। साधनेति। नीलधूमवति सर्वत्र धूमवत्त्वसत्त्वादित्यर्थः।
केचित्तु उभयत्रोपाधिमाशंकते। नवेति। अदृष्टद्वारा शरीरस्य हिंसादावपि जनकत्वमिति शरीर
जन्यत्वं नित्यमात्मवृत्तीत्य जन्यत्वोपाधेः साधनव्यापकत्वमित्याहुः। तन्न। एवं हि व्याप्यत्वासिद्धि
मुद्धरतः स्वरूपासिद्ध्यापत्तेः। तथा च शरीराजन्यत्वस्य पूर्वोक्ततात्पर्यं। तच्च हिंसादिवृत्तीति न
साधनव्यापकत्वमिति। ईदृशव्यर्थविशेषणतयात्वदभ्युपगतमप्यनुमानं न स्यादित्याह। किंवेति। २६५

उन्नयत्र वह्निरहितत्वमात्रस्यैव गमकत्वसंभवादिति भावः। वह्निरहितेति। यदि वास्याप्ययोगोलके साध्या
व्यापकत्वान्नोपाधित्वं तदा धूमवत्त्वोपाधेः साधनव्यापकत्वमिति तुल्यमिति भावः। ननु गंधादिषु मध्य इति
व्यभिचारवारकतापर्य्यवसन्नमेव। गंधमात्रव्यंजकत्वं हि द्रव्यविशेषितं हेतुकार्य्यं। अन्यथा सन्निकर्षव्य त्व
भिचारः स्यात्। तस्य च तेन व्यभिचारवारणं तदा यदि व्यभिचारः स्यात्। स च तदा यदि गंधमात्रव्यंजक
त्वं प्रसिद्धं स्यात्। तथा च गंधादिषु मध्य इति विशेषणं प्रसिद्धिसंपादकसन्निकर्षपरंपरया व्यभिचारवार
णप्रयोजनकमित्यरुचेराह। अपि चेति॥ यत्त्विति। शरीरजन्यघटाद्यपेक्षया जन्याः द्वित्वादयोऽपि तद्व
हवः प्रतियोगिबाहुल्यप्रयुक्तं च अभावबाहुल्यमिति भावः। अन्यथेति। तथा चावच्छेदकलाघवं प्रयोजकं न

त्रव्यक्तिलाघवमिति भावः। प्रयोजनेति। प्रकृतेपक्षधर्मतायामुपयोगः शरीरपदस्येति भावः। अथेति
न च यदि तत्र व्याप्तिरस्ति तदा न प्रथमं व्याप्तिग्रहो जातस्ततः किं पश्चादपि तद्ग्रहेणानुमितिसंभवादि
ति वाच्यं। यत्र प्रथमं व्याप्तिग्रहस्तत्रैव व्याप्तिरित्यत्तिमानादिति। यत्रेति। निर्धूमोयमार्द्रेंधनप्रभववव
ह्निरहितत्वादित्यत्रार्द्रेंधनरूपविशेषणाभाववति विशेष्यवति तप्तायःपिंडे साध्यं निर्धूमत्वं तथा वह्नि
रूपविशेष्याभाववति केवलार्द्रेंधनवति वनादौ निर्धूमत्वं। एवं च प्रत्येकस्य धर्माप्रयोजकतया विशि
ष्टस्य तत्प्रयोजकतया तदभावे विशिष्टाभावो हेतुः। न चैवं प्रकृते सिद्धं। जन्यत्वरूपविशेष्यवति शरीर
रूपविशेषणव्यतिरेकेणाकर्तृकत्वरूपसाध्यसंबंधानिश्चयात्तद्धितादौ पक्षे तस्य संदिग्धत्वात्। २६६

तथा च विशिष्टाभावो न हेतुरित्यर्थः। यत्तु न साध्यमिति पाठस्तथा च यत्र विशेषणविशेष्यान्यतराभा
व वति साध्याभावः विशेषणाद्यन्यतराभावो व्यभिचारीति यावत्। तत्र विशिष्टाभावो हेतुरन्यत्र न तथेति
न स हेतुरिति। तन्न। विशेषणाद्यन्यतराभावस्य व्यभिचारित्वे विशिष्टाभावव्यभिचारस्यापि वज्रलेप
त्वात्। अखंड एवेति। तथा च शरीरजन्यत्वाभावे जन्यत्वप्रतियोगिकत्वाभावात्तदवच्छेदेन तत्र व्याप्यग्र
य हविशिष्टावच्छेदेनैव तद्ग्रह इति न वैयर्थ्यमिति भावः। अधिकमिति। अनुपयुक्तनीलांशोपादानादि
ति भावः। हेत्विति। हेतूदाहरणाधिकमधिकमिति तद्ग्रहणादिति भावः। तर्हि नीलधूमस्य कथं न हेतु
त्वमत आह· नीलत्वमपाति। विशेष्यतावच्छेदकस्य संबंधितानवच्छेदकत्व एव विशेषणस्यापि तदव

वि·अ·म·
२६७

च्छेदकत्वादित्यर्थः। अत्र दृष्टान्तमाह· दंडत्वेनेति। ननु नैल्यं व्याप्यतावच्छेदकत्वेन हेतौ मा प्रविशतु
तु व्याप्यत्वेनैव प्रविशत्विति तत्राह। धूमत्वं चेति। व्याप्यतावच्छेदकावच्छिन्नस्यैव व्याप्यत्वं· प्रकृते च धू
मत्वं तथा तदवच्छिन्नत्वं च न नैल्य इति व्याप्यतयापि न तस्य प्रवेश इत्याशयः। इदं च वस्तुगतिमनुरुध्योक्तं।
वस्तुतो धूमत्वस्य नैल्यवृत्तित्वेपि धूमवत् व्यक्तिस्थानीयं तदिति धूममात्रमेव हेतुर्न नीलधूमो नीलधूम
त्वस्य [illegible] नवच्छेदकत्वात्। नैल्यस्यापि धूमत्वावच्छिन्नत्वेनैव हेतुत्वादिति नैल्यं धूमत्वामत्वोपव
र्णनमप्रकृतमेव· प्रकृतं तु गौरवमेवेति ध्येयं। ननु नालिम्नि धूमत्वासत्त्वेपि नीलधूमे धूमत्वमस्त्येव तद
वच्छिन्नत्वेन च तस्य हेतुप्रवेशः स्यादित्यत आह· नीलधूम इति। तथा च नीलोपलक्षित धूममात्रस्यैव धूम २६७

त्वावच्छिन्नत्वान्तकेनापि प्रकारेण हेतौ नैल्यप्रवेशाद् इति भावः। ननु व्याप्यतावच्छेदकमस्तु धूमत्वमात्रं
किंतु नीलधूमस्यापि व्याप्यत्वान्नत्वेनापि तस्य हेतुत्वघटकत्वेन निर्देशः क्रियतामित्यत आह· किंचेति व्याप्यता
नवच्छेदकेन हेतुनिर्देशेऽतिप्रसंगादिति भावः। ननु धूममात्रनिष्ठव्याप्तौ नीलधूमत्वं न्यूनवृत्तित्वादेव वना
च्छेदकं नन्तु गौरवात् नीलधूममात्रनिष्ठव्याप्तौ नीलधूमत्वमेवावच्छेदकं नन्तु धूमत्वमतिप्रसक्तत्वादिति
चेत् न न्यूनवृत्तेरपि व्याप्यतावच्छेदकत्वात् अन्यथा आलोकाद्यवृत्तित्वेन धूमत्वस्याप्यतत्वापत्तेः। ननु
गौरवेण नीलधूमत्वावच्छेदेन व्याप्त्यग्रहे ज्ञानरूपासिद्धिरस्तु ननु हेत्वाभासीभूतासाज्ञायमानप्रतिबं
धकत्वाभावात् न च यतो गौरवान्नीलधूमत्वस्यानवच्छेदकत्वं तदेव व्याप्यतासिद्धित्वेन विवक्षितं। तस्यज्ञा

ईश्व॰

वि॰अ॰म॰ यमानतयेवप्रतिबंधकत्वादितिवाच्यं परामर्शविषयाभावस्यैवासिद्धित्वेन ग्रंथकृदभिमतत्वात् गौरव
२६८ स्यचातथात्वात्तथाच व्याप्यत्वासिद्धिर्व्यर्थविशेषणादावित्यसंगतमिति चेत्। अत्र केचित्। तावत्संबंधिताव
च्छेदकरूपवत्वलक्षणा व्याप्तिर्लाघवादनुमितिहेतुः सकलसाधनवति साध्यवत्त्वं दर्शयता उदाहरणेन
सादर्शनइति तदभावो व्याप्यत्वासिद्धिरवच्छेदकत्वाभावे पर्यवसन्नो नीलधूमादौ। नीलधूमे धूमत्वरूपा
वच्छेदकान्तरसत्वेन नीलधूमत्वस्य तद्घटितशरीरस्यानवच्छेदकत्वात्। एवं च परामर्शविषयाभावत्वमपि
समर्पितं भवतीत्याहुः। अत्र वदन्ति। संबंधितावच्छेदकलक्षणायां व्याप्तावच्छेदकत्वं यद्यनतिरिक्त
ते देशावृत्तित्वं तदा तन्नीलधूमेप्यस्ति। अथ तादृशधर्मान्तराघटितत्वमपि तत्र विशेषणं तदा सवेवा २६८

प्तित्वलक्षणे तो गौरवादनुमितिरेव नेति। तदभाववज्ज्ञानस्य प्रतिबंधकतातादृशधर्माघटितत्वादे
क्रे रुदाहरणे नाशंकैव नास्तीति न किंचिदेतदिति। तस्मादिदमत्र तत्त्वं। नीलधूमे धूमत्वावच्छिन्नव्याप्ति
सत्त्वेपि नीलधूमत्वावच्छिन्नव्याप्तिविरहाद्व्याप्यत्वासिद्धिः सर्वविशेषणावच्छिन्नव्याप्तिविरहो वा संबंध
विरहो वेत्यन्यदेतत्। एवं च ज्ञाने गर्भे हेत्वाभासलक्षणं परामर्शविषयाभाववत्त्वं वसंगच्छते। नीलधूम नय
त्वावच्छिन्नव्याप्यप्रसिद्धेः कथमेवमिति वाच्यं। कस्तूरिकादहनादिप्रतियोगिकविशेषव्याप्तेरे
स्ति· वतादृश्याः प्रसिद्धेः। नच तादृशी व्याप्तिर्नीलधूमे पर्ववह्नित्वावच्छिन्नप्रतियोगिकनीलधूमत्वावच्छिन्नव्या
प्यताचस्य व्याप्यसिद्धित्वेन तु पुनः सैवाप्रसिद्धिरिति वाच्यं। नीलधूमत्वावच्छिन्नव्याप्तिप्रतियोगित्वलक्ष

 त्व

णव्यापकत्वाभावस्य वह्नित्वावच्छिन्ने व्याप्यत्वासिद्धिपदार्थत्वान्न ज्ञानस्यापि प्रतिबंधकत्वात् समान
वित्तिवेद्यतया व्याप्यत्वव्यापकस्यापि परामर्शविषयत्वेनोक्तव्यापकत्वाभावे परामर्शविषयाभावत्व
स्यापि सत्त्वाद्यद्वा धूमत्वावच्छिन्ने नीलधूमत्वावच्छिन्नव्याप्यत्वाभाव एव व्याप्यत्वासिद्धिः। तस्या नीलधू
मत्वावच्छिन्ने सत्त्वेनान्यधर्मावच्छिन्ने विरहादिति। वस्तुतो वह्निनिरूपितधूमनिष्ठव्याप्तौ नीलधूमत्वं ना
वच्छेदकं किंतु धूमत्वमित्युभयवादिसिद्धं। अवच्छेदकत्वं च स्वरूपसंबंधविशेषोन्यदेतदुभयवादिनिर्वचनी
यं। अन्यथा गौरवेण नीलधूमत्वावच्छेदेन व्याप्यग्रहे ज्ञानरूपासिद्धिरिष्टापि न स्यात्। गौरवज्ञानस्याव
च्छेदकत्वग्रह एव प्रतिबंधकत्वात्। एवं च यत्समानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकावच्छि २६९

न्नसाध्यसामानाधिकरण्यावच्छेदकावच्छिन्नत्वं व्याप्तिस्तथा च नीलधूमत्वे तादृशावच्छेदकत्वाभावः
परामर्शविषयाभावतया भवत्यसिद्धिः। न च व्याप्तेस्तादृगवच्छेदकत्वगर्भत्वे मानाभाव इति वाच्यं। व्यर्थविशे
षणे व्याप्तिग्रहप्रतिबंधस्यैव तत्र मानत्वात्। गौरवज्ञानस्यावच्छेदकत्वातिरिक्तव्याप्तिघटकपदार्थग्रहाप्रति
बंधकत्वात्। यथा व्यभिचरिते व्याप्तिग्रहप्रतिबंध एवाव्यभिचारगर्भत्वे तस्या मानं। न च तत्र व्याप्तिग्रहप्रति
बंधो न सत्वस्यैवेति वाच्यं। एवं ह्यज्ञानरूपाप्यसिद्धिर्न स्यात्। तथा चैकामसिद्धिं परिहरतो द्वितीयापत्तिरि
ति सिद्धान्तोपि भज्यते। तस्मात्परिहरवा तत्राज्ञानरूपासिद्धिस्वीकारो वा व्याप्तेरवच्छेदकत्वगर्भत्वमिति दिक्।
न्नमत्वेनेति। न तु ज्ञायमानतया प्रतिबंधकत्वाभावात्तथाप्यस्य कथं हेत्वाभासत्वं। किं च तत्स्वयुक्तत्वं तद्धेतुकत्वे

तद्व्याप्यत्वं वा न च लिंगोपहितभानपक्षेपि तत्राभासतोऽपस्थापकाभावात्तत्त्वेऽथं तद्विषयत्वेनानुमितेर्भ्र
मत्वमिति वेत्। अत्राहुः। अनुमित्याभासताप्रयोजकत्वं हेत्वाभासत्वमिति संप्रदायमतेनास्याभिधानं।
तत्प्रयुक्तत्वं च तद्विशिष्टत्वं तथा च लिंगोपहितभानपक्षे व्याप्यत्वासिद्धो नीलधूमो व्याप्यत्वेनानुमितौ
भासत इति तस्याभ्रमत्वं केचित्तु वह्निव्याप्यनीलधूमवान् वह्निमानित्यनुमितौ व्याप्यज्ञापकभावस्य सं
सर्गविधया भानान्नीलधूमे च तत्त्वेन रूपेण तदभावात्तद्विषयत्वेन तस्याभ्रमत्वमित्याहुः। वस्तुतोऽन्यथा
सिद्धधूमज्ञानादनुमितिसत्वेपि नीलधूमस्योद्देश्यानुमितिप्रतिबंधकत्वेनैव हेत्वाभासत्वं। ज्ञारीमाऽन्यत्वा
दोषविशेष्यस्यासिद्धतयाऽविशिष्टस्य व्याप्यत्वासिद्धतयाऽनुमितिसामान्यप्रतिबंधकत्वमेव। एतदेवस २७॰

र्वमत्रिसंधायाहदिगिति।अत्रन्त ते.योऽयतिएवमिति।शरीरजन्यत्वेपीति।शरीरजन्यत्वाश्रयमात्रप्र
तियोगिकयावदन्योन्याभावेपीत्यर्थः।पूर्वोक्तदोषंनिरस्यति।सुरभीति।ननुसुरभिधूमत्वंनकार्यता
वच्छेदकं।प्रत्येकसामग्रीद्वयसमाजमहिम्नेवविशिष्टकार्य्यसिद्धेर्नीलघटवत्त्वेदितिचेत्।विशिष्ट
कार्यतानवच्छेदकत्वेपिप्रत्येककारणतायाएतद्व्याप्यत्वनिश्चयमूलत्वसंभवात्।तस्यापनानुमानेपूर्वो
क्तं।व्यापकेव्यर्थविशेषणत्वमुद्धरति।व्यापकेचेति।विशिष्टस्येति।यद्यप्यदृष्टप्रागभावेत्यादिन्नतित्यादि
नाप्रत्येकमेवकारणत्वंनतुतादृशकृत्यादिविशिष्टात्मत्वेनकारणत्वं।कृत्यादीनांसहकारितयापरस्परं
दंडचक्रवदवच्छेदकत्वाभावात्।तथापिवस्तुगतिमनुरुध्येनदुक्तं।ननुतत्त्वेनजनकत्वंविवक्षितं।नचैवंन

चिं॰अ॰न॰ २७१ विशिष्टस्यव्यापकत्वमितिवाच्यं।प्रत्येककारणतायाएवैतन्मूलत्वसंभवात्।वस्तुतःप्रत्येकमेवतद्व्यापक
त्वमपि।आर्थसमाजमहिम्नाविशिष्टसिद्धिः।अतएवग्रंथकृतापितथैवविभावितं।धूमंप्रतितृआर्द्रेंधनप्रभ
ववह्नित्वेनैवकारणत्वाद्विशिष्टस्यव्यापकत्वं।नचवह्निसंयोगआर्द्रेंधनसहकारीतिवाच्यं।तत्संयोगस्यत्व
पितत्प्रभववह्न्युत्पादंविनाततोधूमानुत्पत्तिरितिवदंति।अखंडइति।तथाचप्रतियोगिविशेषणत्वान्नचेय
र्थमितिभावः।अजन्यत्वमिति।एवंचात्रयोजकत्वमपातिध्येयं।सत्प्रतिपक्षोच्छेदादिति।समीचीनप्रतिपक्षोच्छेदा
दित्यर्थः।यथाचैतद्व्याख्यानंतथोक्तंप्राक्।किंचेति।एषामन्यतमःस्थापनाहेतुरपरस्यचविरहःप्रकृतानुमा
नोपाधिरित्यर्थः।अतएवेति।यतःसमवेतत्वादिघटितजन्यत्वस्याभावउपाधिरतस्तस्यध्वंसावृत्तित्वात् २७१

नसाध्याव्याप्तिरित्यर्थः। भावांमनन्माह। अन्ये त्विति। यन्निष्ठेति। यद्विशेष्यतावच्छेदकविशिष्टेत्यर्थः। अष्टनि
ष्ठावनिष्ठव्याप्तौ अभाववत्त्वरूपविशेष्यतावच्छेदकविशिष्ट निष्ठव्याप्ताविन्यर्थः। नशरीरेति। अभाववत्त्वाव
च्छिन्ने जन्यत्वाभावे शरीरं विनैवाकर्तृकत्वनिरूपितव्याप्तिग्रहान्न तद्विशिष्टे व्याप्तिरिति भावः। अयत्नेदमन
भिमतिबीजं। यन्निष्ठेत्यत्र लाघवेन व्यक्तिपरत्वं न तु विशेष्यतावच्छेदकावच्छिन्नपरत्वं गौरवात्। एवं शरी
रजन्यत्वाभावनिष्ठव्याप्तिः शरीरपदं विना न गृह्यते प्रतियोगितावच्छेदकग्रहं विना भावस्यैवाग्रहात्। तान
थाच कथं न विशिष्टस्य व्याप्यतावच्छेदकत्वं। अन्यथा जन्यत्वाभावोपि व्याप्यो न स्यात्। तासकारणकत्वाभावादौ
जन्यत्वविशेषणं विनापि अभाववत्त्वावच्छिन्ननिष्ठव्याप्तेर्ग्रहादिति। केवलव्यतिरेकिणि उभयसिद्धसाध्यवत्त्वे·

दैस्व·

वि·अ·त· २७२ केवलान्वयिनि उभयसिद्धसाध्यवत्त्विन्नत्वं वा उभयसिद्धमित्यन्वयव्यतिरेकी न्युक्तं। अन्योन्याश्रयादिति। लाघ
वज्ञानजन्यानुमितित्वस्यैव लघ्वनुमितित्वादित्यर्थः। यत्र प्रमाण इति। नन्वेवं सति अवच्छेद्य लघुविषयताकानुमितित्वं
लाघवज्ञानकार्य्यतावच्छेदकमिति पर्य्यवसन्नं। तथा च यत्र लाघवप्रकारकं ज्ञानं न जातं वस्तुतो लघौ रेवानु
मितिस्तत्र व्यभिचारः। न च लाघवज्ञानजन्यानुमितित्वमेव तथा। अन्योन्याश्रयादिति चेत् न। लाघवगौरवोपस्थि
तिकालीन लघुविषयताकानुमितित्वस्य कार्य्यतावच्छेदकत्वात्। ननु तथापि लाघवज्ञानोपनीतमेकत्वं प्रका
राः तया नुमितौ कथं भासतां। व्याप्त्याद्युपनीतादन्यस्यानुमितौ भाने मानाभावादिति पूर्वोक्तविरोधात्। न च व
स्तुगत्यैकः सिध्यति न त्वेकत्वमपीति वाच्यं। एकत्वानेकत्वसंशयतादवस्थ्यादिति चेत्। अत्राहुः। व्याप्त्याद्यनुपनीत २७२

272

मपिलाघवज्ञानोपनीतमनुमितौ।भासतेनान्यदतिप्रसंगात्।लाघवज्ञानस्यप्रमाणमात्रसहकारित्व
कल्पनात्।तदिदमुक्तं।तथाविधप्रमाणमात्रइति।अत्रचलाघवोपनीतत्वस्यैवनियामकत्वान्नातिप्रसंगः।
क व्याघ्राद्यौइत्यादिग्रंथश्चलाघवानुपनीतविषयः।नचैकविषयत्वेप्यनेकविषयत्वसंभवात्संशयतादव
स्थ्यमितिचेत्।न।एकमात्रकर्तृकत्वएवलाघवावतारात्तस्यैवानुमितिविषयत्वात्।अतएवनानाकर्तृकघ
टेष्वपिपश्चादेककर्तृकताज्ञानंबाध्यतइत्यग्रेवक्ष्यति।अन्यथानानाकर्तृके [illegible] घटेघैककर्तृकता
बाधा ज्ञानस्यप्रमात्वेनसंभवादिति।अन्येत्विति।तत्रास्वरसबीजमुद्भावयति।अत्रापीति।किंचोक्तानुमानेनक्षितिकर्त्तु
ङ्कुरकर्त्रोर्भेदानुमितावपिरागादिकर्त्तुरेतद्भिन्नत्वसंशयादीश्वरनानात्वसंशयतादवस्थ्यमेवेति।अनादि

अनादित्वाभावस्य नित्यत्वनियमादिति भावः। लाघवादिति।

वि॰ अ॰ भ॰ २७३ 273

भावत्वादिति। यद्यप्यनुमितौ नानादित्वं विषयः तथाप्यनादिकार्यप्रवाहविषयत्वेन तत्सिद्धिरिति भावः। नव्या
स्त्वित्यस्वरसोद्भावनं। तद्बीजं तूपनीतभानानङ्गीकारात् नित्यज्ञानजन्यत्वं पक्षधर्मताबलादपि न सिध्यती
ति। ननु तथापि कथं सर्वविषयत्वसिद्धिरित्यत आह। नियतेति। एवं च पक्षतदुपादानाद्यतिरिक्तविषयत्वम
पि सिध्यति। एतेन प्रथमकल्पेऽप्यस्वरसो दर्शितः। पक्षादिविषयकत्वेऽपि न त्वसर्वविषयत्वासिद्धेरिति। नत्वि
ति। तथा च न जगन्निर्मातृत्वमिति भावः। नत्वान्त इति। न ह्यसद्वि[illegible]षयत्वेन भ्रमत्वं किन्तु व्यधिकरणप्रकारकत्वेने
ति भावः। स्वेष्टसाधनेति। तथा च प्रयत्नस्य प्रयोजनज्ञानव्याप्यत्वमव्याहतं प्रयोजनज्ञानजन्यत्वनियमस्य ज
ना न्यत्वोपाधिदूषित इति भावः। प्रयत्नोत्पत्तौ प्रयोजनज्ञानापेक्षा न तु तत्स्थितावपीत्याह वस्तुत इति। करोतीति॥ २७३

ईश्वर इति शेषः। ननु तदिच्छायाः सिसृक्षारूपत्वे प्रलयो न स्यात् संजिहीर्षारूपत्वे च सर्गो न स्यादित्य
त आह। सर्गेति। सुखादाविति। भावकार्य्यस्य समवायिकारणजन्यत्वनियमाद्घटादिजन्यत्वमिति भावः।
मीनशरीरेति। तच्छरीरं नेश्वरस्य तददृष्टोपगृहीतत्वाभावात्। किंतु संसारिण एवेति ध्येयम्। अत ए
वाह। सोयं मूर्त्तावेशेति। न चैवं संसार्यात्मा न सिध्येत् तद्व्यापाराणां मूर्त्तावेशन्यायेन परमेश्वरादेव
सिद्धिरिति वाच्यं तथा सत्यदृष्टाभावेन शरीरासिद्धौ मूर्त्तावेशन्यायस्याप्यभावात्। भगवत्यदृष्टाभा
वात्। ईश्वरानुमानाच्चेति। यद्यपि मन्वादिशरीरारंभकद्व्यणुकादिकर्तृत्वेनेश्वरानुमानं स्यादेव त
थापीश्वरस्यावश्यकत्वात् किं मन्वादिनेति भावः। विश्वतश्चक्षुः विश्वविषयकसाक्षात्कारवानित्यर्थः। वि

मुखः विश्वविषयकवचनवानित्यर्थः। विश्वतो

शि॰ अ॰ न॰
२७४
२७४

श्चतो बाहुः विश्वविषयकप्रयत्नवानित्यर्थः। विश्वतःस्पात् विश्वव्यापीत्यर्थः। बाहुभ्यां धर्म्माधर्म्माभ्यां प
तत्रैः परमाणुभिः संधमति संयोजयति। किमर्थमित्यत आह। द्यावाभूमी जनयन् इति। द्यावेत्यूर्द्ध्वलोकस
प्तकं भूमीत्यधोलोकसप्तकमुपलक्षितं। संपदद्वयं व्यवहितान्वेति छांदसत्वेन धमनजननाभ्याम
न्वीयते। स्मृतिविरोधेन श्रुतेरन्यपरत्वशंकां तदविरोधप्रदर्शनेन निरस्यति। उत्तमइति। प्रसंगाद
ह। स्यादेतदिति। कार्य्येणेति। यथाक्षित्यादिलक्षणकार्य्यानुपपत्तिरीश्वरेमानं तथा कार्य्यानुपपत्तिः श्रु
तौ मानमित्यर्थः। अनुमीयत इति नैयायिकदिशा। उपदर्शितार्थापत्तेः स्वयं दृष्टत्वेन स्वीकारादिति
ध्येयम्। नन्वेवं न कार्य्येण तदुन्नयनं किंतु कार्य्याभावेनेत्यत आह। व्यतिरेकेति। व्यतिरेकनिरूपकतया २७४

तत्प्रयोजकत्वमितिभावः। तस्य। अदृष्टस्य। तदर्थत्वात्। दृष्टसाद्गुण्यार्थत्वात्। तथा च दृष्टसाद्गुण्यमेवा
दृष्टसाद्गुण्ये तच्च मानमित्यर्थः। परमाण्विति। एवं च प्रलये परमाणुकर्म्मणोसत्यपि यथा न द्व्यणुकारंभकः
संयोग इत्यर्थः। पूर्वादृष्टस्य नाशादग्रिमस्योत्पादकाभावाद्वा हेतोर्न स्यादित्याह। मण्यपसारणेति। नन्वम
ण्यपसारणेनैव तदाऽदृष्टमुत्पाद्यत इति वाच्यं। तस्य विहितनिषिद्धत्वेन तदजनकत्वादिति भावः। म
ण्याद्यभाव एवेति। इदं चादृष्टकारणतानिरासमात्राभिप्रायेणोपात्तं ततः। वस्तुतोऽस्यापि न कारणत्वमि
त्यग्रे वक्ष्यति। तदभावादिति। अदृष्टाभावादित्यर्थः। बंधे तूपलक्षणं। परमाणुकर्मण्यपि दृष्टं वाच्यं। नन्व
दृष्टं दृष्टोपहारद्वारैव सर्व्वजनकं न तु साक्षादित्यत आह। अदृष्टं चेति। अन्यथेति। द्वारेपि साक्षाज्जनक

त्वं तस्यस्वीकार्य्यमेव। तत्रापि द्वारान्तरापेक्षायामनवस्थानादिति भावः। न चेति। तथा च दाहेपि न तदे
वजनकमिति भावः। रूपेनेति। देशानालक्षणोर्थो धर्म्मः इत्यत्रार्थपदेन श्रेयस्करार्थकेन रूपेनापूर्वमनर्थ
रूपं व्यावृत्तं। तस्य निषिद्धत्वानुबंधजनकत्वेनाश्रेयस्करत्वात् तदुदयमपि न धर्म्मः इत्यर्थः। दाहप्रतिकूलेति।
नियतान्निसाध्यदाहप्रतिकूलमेवादृष्टमुत्पाद्यत इति नाग्न्यन्तरजन्यदाहप्रतिबंध इति भावः। दोषान्त
रमाह। अदृष्टेति। अमुत्रेति। वामागमादेतथादर्शनादिति भावः। उत्तयसत्वे उत्तेजकाप्रतिबंधकसत्वे।
तद्धेति। कारणत्वमित्यर्थः। मणिसत्त्व इति। उत्तेजकाभावविशिष्टमणिसद्भाव इत्यर्थः। प्रतियोगीति। य
द्यपि प्रतियोगिभेदस्य तत्प्रतियोगितावच्छेदकभेदस्यावच्छेदकत्वान्मणेदादेव भेदस्तथापि यथा प्रतियो २७५

क गिभेदोऽभावभेदव्याप्यस्तथा च प्रतियोगितावच्छेदकाभेदोऽपीत्यर्थः। केवलदंडसत्त्वे तु उभयाभावाद्दं
डपुरुषसत्त्वेव विशेषणाभावाद्दंडपुरुषोभयाभावे च विशेष्याभावाद्दंडाभाववविशिष्टपुरुषाभाव इत्य
र्थः। प्रयुक्त इति। विशेषणादिविरहान्यतमव्याप्य इत्यर्थः। अनुगतेति। यद्यपि शब्दप्रयोगरूपव्यवहारव्यभि
चारो नानार्थशब्दानुगमेऽपि विषयाननुगमात्. तथापि व्यवहारशब्देन ज्ञानमेव विवक्षितं। न चैवमनन्व
यः। ज्ञानेन विषयिणा विषयस्योपलक्षणात्। तथा चानुगतज्ञानस्यानुगतविषयसाध्यत्वादित्यर्थो द्रष्टव्यः॥
ननु शक्तिरेवानुगता तद्विषयोऽस्त्वित्यत आह. शक्तेश्चेति। श्यामघं सप्रयुक्तस्तन्नियतानन्नु तज्जन्यः समस
मयत्वादिति ध्येयम्। ननु घटत्वेनेति। घट आसीदिति प्रत्ययाभावादिति भावः। सोऽयमिति। उत्पादविनाशाव

वि॰अ॰भ॰
२७६
276

नतुरीयसंसर्गाभावोस्तुध्वंसएववास्तु।नोभयथापिशक्तिसिद्धिरितिभावः।ननुतुरीयसंसर्गाभावस्वीका
रेविभागव्याघातइत्यतउपपन्नाह।अस्तुवेति।ननुविनाशिनिध्वंसपरिभाषैवसंदिग्धेत्यरुचेराह॰पठेति
यदिह्यत्तीतेति।यद्यपिविशेष्यतावच्छेदकघटत्वावच्छिन्नघटादिप्रतियोगिकप्रतिरूपणध्वंसोनेष्यतेतादृ
शरूपेणसंगापातएवदोषावहः।तथापिविशेष्यस्यप्रात्यभिज्ञायमानत्वात्समवाय्यसमवायिनाशाभाव
श्चनघटादेर्विनाशः।किंतुविशेषणस्यैवानवविशेषणनाशमात्रस्यैवविशेष्यनाशिका।नियमाचापत्ता
पापत्तेः।अतएवश्यामोयमासीदितिप्रत्ययोयोनत्वयमासीदितिप्रत्ययइतिभावः।ध्वंसस्येति।तथाचोत्तेजका
पनयेपिदाहापत्तिः।उत्तेजककालोत्पन्नस्यप्रतिबंधकध्वंसस्यतदापनाशादिति।ध्वस्तस्येतिक्वचित्पाठः। २७६

सचसुगम एव। उत्पादविनाशशीलस्तुरीयः संसर्गाभाव एव विशिष्टाभाव इति निरस्यति। न चेति। अ
त्यन्ताभाव एव। असावितिपदं परिहरति। नापीति। अत्यन्ताभावस्य नित्यत्वात् सदैव दाहापत्तिरिति प्रत्यास
त्तिसहितस्य तस्य हेतुत्वं वाच्यं। प्रत्यासत्तिश्च विशेषणाभावादिरित्यननुगम इत्याह। स एवेति। अथ चेति। उ
त्तेजककालविद्यमानो योऽत्यन्ताभावस्तदनुवृत्ताभावपीत्यर्थः। उत्तेजकाभावत्वेनेति। तर्ह्युत्तेजकाभावविशिष्ट
मण्यभावत्वेन हेतुत्वं। तथा च पूर्वानुवर्त्तमानतादृशाभावादुत्तेजकापनयकालेपि दाहापत्तिः। कारण
तावच्छेदकावच्छिन्नयत्किंचित्सत्त्व एव कार्योत्पत्तेरित्यर्थः। न हीति। पूर्वोक्तेऽइष्टापत्तिमाशंकते। अथ चेति॥
विशेषणविशेष्याभावस्येति। अतिरिक्तविशिष्टानभ्युपगमादिति भावः। संबंधाभावादिति। ननु विशेषण

वि·अ·ग·
२७७
२७७

विशेषणसंबंधस्य तदुभयमात्रवृत्तित्वान्न तत्कालादौ तत्संबंधाभावाद्दंडिनि सत्यपि दंडी नास्तीति व्यवहारा
पत्तिरिति चेत् न। यादृशेन हि संबंधेन यत्र यद्विशिष्टव्यवहारस्तादृशसंबंधाभावस्यैव तदभावव्यवहार
हेतुत्वात्। दंडपुरुषसंयोगस्तु न तद्व्यवहारहेतुस्तस्य तत्कालावृत्तित्वेन तत्र दंडोऽस्तीति व्यवहारानापत्तिः
किंतु परंपरासंबंधविशेषस्तथा। तथा च तदभाव एव विशिष्टाभावव्यवहारहेतुरिति फलबलेन तथा कल्प
नादिति संबंधांतरं विनेति। संयोगादावतिव्याप्तेराह-संबंधेति। असंभववारणायान्तरेति। ननु स्वात्मवि
षयकज्ञानेन स्वात्मना समं विषयविषयिभावः संबंधः स्वरूपसंबंध एव वाच्यः। तत्र चेदमव्यापकं। तत्र समवा
यस्यैव संबंधान्तरस्य सत्वादिति चेत् न। उद्देश्यव्यवहारप्रयोजकसंबंधांतरं विनेत्यर्थात्। न च समवायो २७७

विषयत्वव्यवहारप्रयोजकः। घटादिविषयकज्ञानस्य स्वात्मविषयकव्यवहारप्रयोजकत्वप्रसंगात्। तान
नुघटाभावत्वमानुपपत्तिः। योग्यतायाः फलबलकल्प्यतया तत्र विशिष्टज्ञानोत्पत्त्या योग्यतावत्त्वं भावा
त्। न च प्रत्ययपदं प्रमापरं। संबंधसत्त्वे तस्यापि प्रमात्वात्। अन्यथा संबंधाभावे तस्याप्रमात्वं तदप्रमात्वे
च तत्र संबंधाभाववृत्तिपरस्पराश्रयात्। किं चातींद्रियाभावस्वरूपसंबंधाव्याप्तिः। तत्र स्वरूपद्वयस्य विशि
ष्टप्रत्ययाजनकत्वात्। ततः प्रत्ययस्यानुमित्यादिरूपत्वेन विषयाजन्यत्वादिति चेत्। न। विशिष्टप्रत्ययज
ननयोग्यतावच्छेदकरूपावच्छिन्नस्वरूपस्य संबंधत्वात्। योग्यतावच्छेदकाभावे योग्यत्वस्याप्यभावात्। यो
ग्यतावच्छेदकं चात्यन्ताभावे प्रतियोगिदेशान्यदेशत्वं प्रागभावादौ प्रतियोगिदेशत्वे सति प्रतियोगिकाला

बि·अ·न· २७८ 278

न्यकालत्वं। अन्योन्याभावप्रतियोगितावच्छेदकदेशान्यदेशात्वं। न चान्यत्वमन्योन्याभाववत्वं। तत्र च
मत्वर्थायोग इति वाच्यं। तत्रापि तद्देशान्यत्वस्य सत्वात्। न चैवमनवस्था। वस्त्वनवस्थायाः प्रामाणिकत्वे
नादोषत्वात्। प्रत्ययानवस्थायाश्चासत्वात्। उक्तावच्छेदकोपलक्षितस्वरूपस्यैव प्रत्ययविषयत्वे तस्य तद्
विषयत्वात्। एवं चोक्तावच्छेदकावच्छिन्नस्वरूपाभावे यत्राभावधीस्तत्र भ्रमः। एतेनातीन्द्रियस्वरूपसं
बंधव्याप्तिरप्यपास्ता। न चोक्तावच्छेदकस्य प्रत्ययाविषयत्वे विषयविशेषाभावात्कथं भ्रमत्वप्रमात्वे इति वा
च्यं। एकत्रोक्तावच्छेदकावच्छिन्नस्य संबंधत्वेन विद्यमानसंबंधविषयत्वादन्यत्र तदनवच्छिन्नत्वेन तस्या
विद्यमानसंबंधविषयत्वात्। ननु यत्किंचित्संबंधाभावो न विशिष्टाभावो तिप्रसंगादिति विशेषणविशेषा २७८

भयप्रतियोगिसंबंधाभावस्तथावाच्यः। तदभावश्च क्वचिद्विशेषणविशेष्योभयप्रतियोगित्वरूपविशेष
णाभावात् क्वचिद्विशेष्यसंबंधाभावादित्यननुगमस्तदवस्थ एव। इयानेव विशेषो यत्पुरुषादौ विशेष्ये
दंडादिविशेषणसंबंधेन विशेषणविशेष्योभयप्रतियोगिकत्वं। ननु दंडपुरुषोभयप्रतियोगिकसंबंध
त्वमेकं तदवच्छिन्नाभाव एक एवेति नाननुगम इति चेत्। तर्हि दंडावच्छिन्नपुरुषत्वमेकं प्रतियोगितावच्छे
दकं तदवच्छिन्नाभावोऽप्यनुगत एवेति किं संबंधाभावस्य विशिष्टाभावत्वोपवर्णनेन। न च विशेष्ये वि
द्यमानेन तदभाव इति वाच्यं। विशेषणावच्छिन्नानामन्येषामेवाभावाभ्युपगमेन दोषाभावात्। अत एवानु
पदमेव वक्ष्यति। न हि दंडिनि सत्ताभावादिधीः। किं चान्यत्र यथा तथास्तु। प्रकृते तत्रेऊकाभावमणिसंबंधस्य तदुभ

यस्वरूपतयातद्भावोऽननुगतएवानचतदुभयंनस्वरूपसंबंधः किंतुतादृशविशिष्टप्रत्ययजनकता
योग्यत्वमतिरिक्तमेवतथेतिवाच्यं। विशिष्टबुद्धिविषयस्यसंबंधत्वाद्विशिष्टप्रत्ययघटितस्यचतस्यविशिष्ट
बुद्ध्यविषयत्वात्। अतएवसंबंधस्यसंबंधिभिन्नत्वनियमेनस्वरूपसंबंधः परैर्नांगीक्रियते। अतएवसमवा-
यसिद्धिः। नतत्स्वरूपाणामनंतत्वेनस्वरूपसंबंधेनार्थान्तराभावात्। अन्यथातेनैवार्थान्तरंस्यात्। नचसं
बंधत्वस्यमिलितवृत्तित्वेनसंबंधत्वावच्छिन्नाभावस्यानुगतत्वमितिवाच्यं। एवंविशेषणावच्छिन्नविशेष्या
भावस्यापिविशिष्टाभावत्वेदोषप्रभावादित्युक्तं। अपिचयदिसंबंधाभावोविशिष्टाभावस्तदाइहदंडीपुरु
षोनास्तीत्यत्रनअर्थप्रतियोगित्वेनसंबंधएवभासतेनचैवंदंडावच्छिन्नपुरुषस्यैवतत्वेनप्रतीतेः। अन्य २७९

थाघटाभावोप्यतिरिक्तो न सिध्येत्। घटत्वतदधिकरणसंबंधाभावादेव तद्व्यवहारसंभवात्। यदि
च संबंधस्य तत्र प्रतियोगित्वेनानुल्लेखात् तज्ज्ञानं विनापि घटत्वावच्छिन्नघटज्ञानादेव तदभावज्ञानाच्च न त
दभावेनान्यथासिद्धिः। तदा तत्रापि तुल्यमित्यपरितोषं हृदि निधायाह - यद्वेति। एवं च विशेषणावच्छिन्नवि
शेष्यप्रतियोगिकोऽत्यन्ताभावो न तु ध्वंसो न वा विद्यमानप्रतियोगिक इति न क्षणिकत्वशंका। तस्य नित्यत्वे
नन प्रागपि कार्यापत्तिः। समयविशेषावच्छेदेन संसर्गिकत्वादिति ग्रंथस्यन्नैवाभिधानादिति। दंडी पुरुष
इति। तत्काले दंडवानित्यर्थः। अन्यथेति। यदि दंडिनि सति दंडाभावावच्छिन्नविशेष्याणां नाभावः किंतु दं
डाभावमात्रस्य तदान्येषामिति पदवैयर्थ्यापत्तिरित्यर्थः। यद्वा। यदि तत्कालीनदंडाभाववानेव न प्रतियो

चिं·अ·म
२८·
280

गीतु दाऽन्यकालीनदंडाभावमादाय तत्रास्थितदंडिनोप्यदंडित्वेनाभावप्रतियोगित्वादन्येषामिति
व्यर्थमित्यर्थः। ननु कार्य्यानुत्पादप्रयोजकत्वं प्रतिबंधकत्वं प्रयोजकत्वं यस्मिन्नसतीत्यादिगर्भं नत्तु पूर्वव
र्त्तित्यादिगर्भमिति नान्योन्याश्रय इत्यत आह। तत्वेपि वर्त्तिनान्येवमन्योन्याश्रयाभावे तत्सामान्याभाव एक एव लाघ
वाद्धेतुरस्तु नतु यावद्विशेषाभावा इत्यपरितोषात्तदेव सिद्धान्तयति। यद्वेति। संसर्गाभाव इति। अत्रापि यत्रोत्ते
जकमस्ति तत्रोत्तेजकाभाववच्छिन्नात्यन्ताभावमात्रं हेतुरन्यत्र ध्वंसादिसाधारणसंसर्गाभावमात्रं। यथाविघ्नसं
सर्गाभावः समाप्ताविति ध्येयम्। अन्वयेति। अन्यथानुपपत्त्यात्वयापि तम्यास्पुपेयत्वादिति भावः। यानिषूधोज्ञा
यत इति शेषः। ननु चैवं दारोपादिस्थले तादात्म्यमपि संसर्ग एव तस्य न्योन्याभावेऽतिव्याप्तिः। किंच संसर्गस्यारोप २८·

त्वेरजतत्वादेरिवतत्संसर्गाभासेतानचैवंमित्यपरिष्कृष्यन्नाह।वयंत्विति।प्रतियोगिनमिति।अधिकर
णविषयकप्रतियोग्यारोपजन्यज्ञानविषयाभावइत्यर्थः।सनिषेधइत्यर्थः।अन्योन्याभावेतिव्याख्य
भावमन्योन्याभावभिन्नत्वंलक्षणान्तरंचदर्शयितुमन्योन्याभावलक्षणमप्याह।यत्रवेति।अधिकरणवि
षयकप्रतियोगितावच्छेदकारोपजन्यनिषेधधीविषयइत्यर्थः।नन्विदमुभयलक्षणमतीन्द्रियसंसर्गा
भावान्योन्याभावयोरव्याप्तं।तद्विषयकज्ञानस्यानुमित्यादिरूपतयारोपाजन्यत्वात्।नचयोग्यतापुर
स्कारान्नथात्वं।ताहृशारोपजननयोग्यतावच्छेदकंहिनाभावप्रतीतित्वमतिप्रसंगादितिसंसर्गाभाववि
षयत्वादिकंतथावाच्यं।तथाचात्माश्रयः।नचप्रागभावादिविषयत्वमेवतथा।प्रागभावत्वादेरपिसंसर्गा

भावत्वघटितत्वात्। एवंचउन्त्यत्वस्यापि प्रागभावगर्भतया तस्य च संसर्गाभावगर्भत्वादन्योन्याश्रयोपि
किंच योग्यताया अनिर्वचनेऽप्रत्यक्षयोग्यध्वंसेऽव्याप्तिरिति॥ अत्र वदन्ति। प्रतियोग्यारोपपूर्वकनिषेधा
वगमविषयतावच्छेदकं संसर्गाभावत्वं। एवमग्रेपीत्यनतुगमयं लक्षणं। स्वरूपं च विषयतावच्छेदकं संसर्गा
भावत्वादि तत्र स्वाभावाभावत्वमस्वाभावाभावत्वं तेन नोक्तसर्वदोषावकाशः। अस्ति च घटस्य योऽभा
वस्तदभावो घटो घटान्योन्याभावस्याभावो घटत्वमिति। न च संसर्गाभावस्यान्योन्याभावस्तत्तदभावो
न संसर्गाभाव इति स्वसंसर्गाभावाभावो लक्षणार्थो वाच्य इति पुनरन्योन्याश्रयत्वमिति वाच्यं। स्वाभावा
भावत्वमित्यत्र वस्तुतो यद्यपि स्वसंसर्गाभावाभाव एव पर्य्यवसितस्तथापि संसर्गाभावत्वं तत्र न प्रविष्टं स्वा २८१

भावत्वेनैवसंसर्गाभावत्वउपस्थितइति नकाचिदनुपपत्तिः। अन्योन्याभावस्य प्रतियोगिकाभावा
भावत्वादितिसर्वं सुस्थमिति। अत्रेदं चिन्त्यम्। स्वाभावाभावत्वं न संसर्गाभावत्वं। अन्योन्याभावेऽतिव्याप्तेः।
तथाहि· स्वं घटान्योन्याभावस्तदभावो घटस्तदभावश्च तदन्योन्याभावः। न तु घटान्योन्याभावान्योन्याभावो वि
षयीक्रियते स च घटस्वरूप एव। अभावप्रतियोगिकस्याभावस्याधिकरणानतिरेकात्। तानवत्वसंसर्गाभावा
भावत्वं तत्त्वमिति वाच्यं। आत्माश्रयात्॥ केचित्तु· अखण्डयोः संसर्गाभावत्वान्योन्याभावत्वयोरभावस्यालक्षणस्यानु
पलक्षणं। न च तयोः पदार्थान्तरतापत्तिः। सामान्यान्तर्भावात्। सामान्यं हि द्विविधं जातिरुपाधिश्च। तत्रोपाधि
र्द्विविधः सखण्डोऽखण्डश्च। तत्सुपाधावन्तर्भावात्। तत्तेदन्तेइवेति। तथा चरत्वे कोपि तरणिमिश्रैरुक्तमेव मभा

वि·अ·भ·
२८२
२८२

वत्वध्वंसत्वादिकं बाध्यमित्याहुः। नेदमिहेतिनानुसंसर्गाभावान्योन्याभावरूपविषयवैलक्षण्येन ज्ञानवै
लक्षण्यं तस्माच्च व्यवहारवैलक्षण्यमित्यन्यथासिद्धं नन्वारोपहेतुतां व्यवस्थापयतीति चेत्। मैवं। यदिना
रोपो हेतुस्तदा भूतले घटसंसर्गाभावान्योन्याभावसत्वे कदाचिन्नेदमिह कदाचिन्नेदमिदमिति व्यवहा
रवैलक्षण्यानुपपत्तेरित्यर्थात्। प्रतियोगिज्ञानानुपलब्ध्यादीनां कारणानां तौल्ये कार्यवैचित्र्यस्याकस्मि
कतापत्त्या कारणवैचित्र्यस्य कल्पनीयत्वे पारिशेष्यादारोप्यारोपहेतुतायामेव विश्रामादिति भावः। इत्या
हुः। गुणेति। उक्तप्रतिबंधकाभावस्य तत्रासत्वे तत्र प्रतिबंधको न स्यात्। तत्रैव कदा प्रतिबंधकाभाव
स्तत्रैवान्यदा प्रतिबंधकसत्वादिति भावः। प्रतिबंधकत्वानापत्तेरिति पाठेऽन्यस्यतिरोषः। तथा च २८२

गुणादेःप्रतिबंधकत्वमन्यस्यनस्यादिति।गुणादेःप्रतिबध्यत्वंनस्यादित्येवार्थःपर्य्यवस्यतीतिध्येयम्।
संसर्गेति।यद्यपिसंसर्गस्याव्याप्यवृत्तित्वात्तदवच्छिन्नाभावोपिनत्वेवातथाप्युभयोपितन्नास्त्येवातथापिव्या
प्यवृत्तितादृशाभावस्यहेतुत्वमितिभावः।एवंविद्यमानत्वविरोधित्वेनेत्यर्थः।अन्यत्रविद्यमानेपिघटे
तथाप्रतीतिदर्शनादितिभावः।योग्यइति।एतत्त्वस्यापियोग्यवृत्तेर्योग्यत्वमेवपदविशेषवाच्यत्वज्ञाना
र्थंतत्रोपदेशापेक्षेतिभावः।मंत्रिविनाश्यइति।मंत्रस्याशुविनाशितयाकुहराद्यन्तरेपिदाहःस्या
दित्यर्थः।संकल्पस्यविशेषणत्वमालंब्यदूषयति।संकल्पनाश्यइति।तथाचसंकल्पस्येच्छात्मकत्वात्त
दभावविशिष्टाभावोऽक्षतएवेतिभावः।विगीतत्वेनेति।यद्यपिविगीतत्वंनिषिद्धत्वमेवत्वनिषिद्धत्वे

नप्रागुक्तेनविरोधः।तथापिशिष्टप्रवृत्तविषयत्वंतदित्यभिप्रेत्यैवतदुक्तं।यद्यप्येवंसतिश्रुत्यनुमाप
कस्यानिषिद्धत्वरूपाविगीतत्वस्यनक्षतिस्तथापिशिष्टाऽनाद्याचारव्यभिचारवारणायालौकिकत्वमपित
त्रविशेषणमिदंडमणिमहौषध्यादिवल्लौकिकमेवेतिभावः।यद्वा।शिष्टाचारत्वस्यैतदनुमानान्तर्ग
तस्यैवक्षतिरितिभावः।तदुद्देश्यत्वेति।ज्ञानमास्थिरमितितद्धिशिष्टाभावः।प्रहराद्यनन्तरेपिस्यादिति।सं
स्कारस्तूक्तं।यत्किंचित्संस्कारविषयत्वंचप्रहरान्तरमपीत्यतउक्तमुद्देश्यत्वज्ञानाहितेति।संस्कारस्तू
क्तम्।यत्किंचित्संस्कारविषयत्वंचप्रहरान्तरमपीत्यत तथाचज्ञानविषयमात्रंसंस्कारविषयइतिनो
क्तदोषः।ननुरोगादिनासंस्कारनाशेविशिष्टाभावसंभवात्प्रहराद्यनन्तरेपिदाहःस्यात्।तायच्चवनसं

स्कारोदयः तत्र वाकागतिरिति चेन्ना।तत्र दाहप्रतिबंधइत्यस्यैवासिद्धेः। यत्र च दाहप्रतिबंधस्तत्रा
नन्यगतिककार्य्यदर्शनात्संस्कारोपि कल्प्यत एव। कार्य्योन्नेयधर्म्माणां यथा कार्य्यमुन्नयनादिति सं
प्रदायिकाः॥ वयं तु ब्रूमः। संकल्पविषयकाल एव प्रतिबंधकः संकल्पस्य च न विशेषणत्वं किंतु स्वविष
यीभूतकालोपलक्षकत्वं। यथा मंगलस्यासन्नसमयसमाप्तिफलकत्वे आसन्नसमयस्य स्ववृत्तिस
माप्त्युपलक्षकत्वं। इयानेव विशेषो यत्तस्याधाराधेयभावसंबंधेन तथात्वमस्य च विषयविषयिभा
वसंबंधेनेति न कश्चिद्विशेषः इति। प्रतिबंधकत्वान्यथानुपपत्त्या तत्सिद्धिं निराकर्त्तुमुल्लापयति। नन्वि
ति। कर्त्तरि ण्वुलो विधानादिति भावः। तस्येति। यद्यपि योगक्षेमसाधारणं जन्यत्वमात्रमपि संभवत्येव।

वि·अ·न·
२८४
284

तथाप्यसत्त्वघटितत्वं न्यायात्तिमायेणोदमितिध्येयम। स्याचार्थिकेति। स्याचार्थिकाह्निकविद्धिंगवचनान्य
तिवर्त्तितपातिवचनादोषधंप्रतिबंधकमितिनपुंसकलिंगत्वमितिभावः। ननु तन्वेदेवंयदिमंत्रादीनां
प्रतिबंधकत्वं न वेदित्यत आह प्रतिबंधकस्येति। सामग्र्याविरहः सामग्रीघटककारणविरह इत्यर्थः।
मुरारिमिश्रमतमाह। न व्याप्तिरिति। नेय्यादेरिति। इदं च समाधिमोकयादुक्तं। वस्तुतस्तत्कालप्रतिब
द्धेतरवह्निरिव तत्त्वदेशप्रतिबध्यतराकाशस्य जनकत्वं संभवत्येव। अन्योन्याभावस्याव्याप्यवृत्तित्व
वादिमतेनैवास्योक्तत्वात्। प्रतिबंधकाभावत्वं ताभावस्यैवावच्छेदकत्वस्वीकाराद्वा। तस्याव्याप्यवृत्तित्वा
त्। अन्यथा वह्निनेय्यादेरपि कालान्तरकार्यानुत्पत्त्यापत्तिः प्रतिबद्धेतरत्वाभावादिति यद्वा तत्र २८४

कालप्रतिबद्धा अन्ये वह्न्यादयः प्रसिद्धाः तत्रेदन्यवह्नित्वं तज्जनकतावच्छेदकं प्रसिद्धं आकाशेऽनन्तथै
त्यनेनैवाभिप्रायेणैतदुक्तमिति। उन्नयस्यापीति। नन्वेवमन्वयव्यतिरेकतौल्येन दंड दृष्टत्वयोर्द्वयोरपि
जनकत्वापत्तिः न च दंडस्य चक्रादिसमवधानं साक्षात्संबंधेन दृष्टत्वस्य च परंपरासंबंधेन तदिति वि
निगमकमिति वाच्यं। वह्निप्रतिबंधकाभावयोरपि तुल्यत्वात्। किं चैवं विनिगमनया परंपरासंबद्धस्यालो
करूपादेरपि भूत्पद्वादिहेतुत्वं न स्यात्। किं चावच्छेदकत्वमेव स्यात्। दृष्टत्ववत्। अपि च यस्मिन्सत्यपीति नि
यमादपि दार्व्यस्य हेतुत्वमेव दंडे सत्यपि दार्व्याभावेन कार्याभावात्। न चादृष्टेनाप्यनेकदंडेन रज्जु
बद्धेन घटोत्पत्तिदर्शनाद्विवक्षितविवेकेन तन्मिजनकत्वमेव दार्व्यतस्य च घटजनकत्वाजनकजन

चि.अ.स.
२८५

कस्याजनकत्वादिति वाच्यं। भ्रमिजनकत्वस्य घटजनकत्वे विरोधाभावात्। तज्जनकत्वस्य तज्जनकत्वविरोधः आ
त्माश्रयात्। किं च भ्रमिजनकतायामेव दंडस्य किमवच्छेदकं न तावद्दंडत्वमेव। अदृष्टादपि भ्रम्युत्पत्त्यापत्तेः। न
च दृष्टदंडत्वं तथा। अवच्छेदकभ्रमिजनकत्वातिरिक्तस्य दृष्टत्वस्याभावात्। भावे वा तदेव घटजनकतावच्छेद
कमस्तु। अपि चानन्यथाप्रतीतिन्यायेन दंडस्यान्यथासिद्धतापत्तिः। कुंभकारपितृवत्। न चानन्यमुदासीनं प्रतीतिवि
वक्षितं भ्रमिस्तु जनिकैवेति वाच्यं। एवं कुंभकारपितुरपि जनकत्वं स्यात्। कुंभकारस्यापि जनकत्वेनोदासीन
त्वाभावात्। तस्मादत्र समाधानं चिन्त्यम्॥ विपक्षबाधकमाह नहीति। तस्य स्वप्रवृत्तिपूर्वमनिश्चयकारणका
र्योऽपि नोऽप्रवृत्त्यापातादिति भावः। अन्यथेति। कार्यायोगव्यवच्छेदस्यैव कारणत्व इत्यर्थः। ननु तथापि प्रतिबं २८५

धकाभावो न कारणं प्रतिबंधकसमानकालीनकार्य्यप्रत्युत्तेजकरूपविशेषसामग्रीकल्पनेनैव सामं
जस्ये तद्धेतुतायाः कान्वयादेरन्यथासिद्धेरिति चेत् न। यत्र प्रतिबंधके नोत्तेजकं तत्र प्रतिबंधकाभा
वस्य कारणत्वकल्पनादन्यत्रापि तस्य हेतुत्वेन तत्तावच्छेदकान्तरकल्पनौचित्यात् तादृशविशेषसाम
ग्र्यंतरं कल्प्यते गौरवात्। किंचोत्तेजकमननुगतमिति न दाहादिहेतुः। तत्तदुत्तेजकयावदभावविशिष्टम
ण्याद्यभाव एव अनुगत इति स एव हेतुः। अत एव पक्षताया अनुमितिहेतुत्वं। अन्यथा सिद्ध्युत्तरानुमिति
त्वावच्छिन्नं सिसाधयिषारूपविशेषसामग्र्या एव हेतुत्वापत्त्या तस्याऽहेतुत्वापातात्। नन्वेवं संशयोत्तरप्र
त्यक्षत्वावच्छिन्नविशेषदर्शनरूपसामग्र्यंतरं कल्प्यते इति चेत् न। इष्टत्वात्। विशेषादर्शनसहकृतसंशय

भावस्यैवहेतुत्वादितिकेचिदितिदिक्।ननुवह्निरूपसाध्याप्रसिद्धेर्नानुमानंस्यादित्यतआह॰तथाही
ति।अवयवीप्रत्यक्षइत्यर्थः।अन्यथावह्नित्वस्यपरमाण्ववृत्तित्वेनाव्यावर्त्तकत्वापत्तिः।अत्रचप्रतिबंधक
समवधानदशायांयादृशदाहसंयोगवान्वह्निःप्रतिबंधकाभावकालेपितादृशदाहसंयोगवाने
ववह्निःस्थिरपदेनविवक्षितइतिदाहसंयोगादिनानार्थान्तरम्।ननुयावदजनकदशाव्यावृत्तत्वंशक्ते
र्नास्ति।यत्किंचिदजनकदशाव्यावृत्तत्वंशक्तेर्नास्ति।यत्किंचिदजनकदशाव्यावृत्तत्वाद्दाहसंयोगादेर
पीत्यर्थान्तरमित्यपरितोषादाहायद्वेति।नचैवंभावत्वपदंव्यर्थंदुरदृष्टाभावादेरतींद्रियस्यवारणा
यतदुपगमात्।नहदनयेऽनुपलब्धिगम्यतयाभावमात्रस्यैवातींद्रियत्वाद्दाहसंयोगाद्यन्यतमप्रत्यासत्ति २८६

जन्यसाक्षात्कारविषयत्वमतींद्रियत्वं अभावमात्र एवेत्यनुपदमेव स्फुटं। ननु लोहविशेषस्यैव साति
शयच्छिद्राजनकत्वादतींद्रियत्वे दृश्यमानाभावः। अतिरिक्तपदार्थापत्तेश्चेत्यस्वरसादाह। अथवेति॥
कार्य्यानुकूलत्वंच स्वकार्यानुकूलत्वं॰ तदपि स्वनिमित्तकारणकानुकूलत्वं विवक्षितं। तेन कर्म्मानुकू
लस्थितिस्थापकेन नार्थान्तरं। कर्म्मणि च वन्हिः समवायिकारणमिति नोक्तदोषः। वन्हौ स्थितिस्थापका
भावपक्षे कार्य्यानुकूलपदमुद्देश्यसिद्ध्यर्थं। अदृष्टवदात्मसंयोगोक्तस्पर्शप्रतिबंधकाभावादिना
र्थान्तरवारणायादृष्टादिविशेषं। यद्यपि गुरुमतेऽभावोऽधिको नास्त्येवेति समवायपदं व्यर्थं। तथापि
परस्यार्थान्तरं स्यादेवेति तद्वारणाय तदुपात्तं। ऐंद्रियकाणामपीति। वस्तुतस्तु संयोगादिपंचकजन्यज्ञा

वि·अ·म·
२८७
३८१

नस्याप्रसिद्धेः साध्याप्रसिद्धिर्दृष्टव्या। तथापीति। यद्यपि जन्यात्वं व्यर्थं तदजन्यसाक्षात्कारस्य व्यावर्त्या
प्रसिद्धेः। तदुक्तिं तु परमते प्रसिद्धं तथापि विशिष्टाभावेन वैयर्थ्यमिति ध्येयम्। अत्र संयोगादीत्यत्र नि
यतसंयोगादीत्यर्थः। तेनात्ममनोयोगस्य योगिप्रत्यक्षादावपि जनकत्वान्न परं प्रत्यसिद्धिरिति मंतव्यं॥
न चाभावेति। उक्तातींद्रियत्वस्य तत्राप्यभावादिति भावः। तस्येति। गुरुमतेऽतिरिक्तस्य तस्यासिद्धेरित्यर्थः।
नैयायिकमते च पारिभाषिकस्य निरुक्तस्यादतींद्रियत्वस्याभावे वृत्त्यभावेऽपि न काचित्क्षतिः। तमादायार्थान्त
रशंकायाः समवायपदेनैव वारणादिति भावः। परमाणोः साध्याव्याप्तेराह। नित्यत्वं चेति। वक्तोऽस्थिति
व्यापकस्वीकारेऽपि यादृशानुमानेन तेन नार्थान्तरत्वशंका तादृशं तदाहायेति। अदृष्टत्वस्य धर्मत्वात् २८७

रित्यर्थः। अनुकूलत्वेनेति। कारणतदवच्छेदकसाधारणस्य तस्याग्रे निरुक्तत्वादिति भावः। यद्यपि तन्मते ध-
र्मत्वादिकं न कारणतावच्छेदकं किंतु जातिरेव तथापि न्यायमते धर्मत्वादिकमादाय तन्मते जातिमादा-
य साध्यमस्त्येवेत्यदृष्टेनुपाधिश्चेनेत्युभयसिद्धं साध्याव्यापकत्वमिति भावः। अदृष्टपदानुपादानात्साध्येता-
घवं स्थितिस्थापकेन यत्नेनार्थान्तरत्वदर्शकापीति मनसि कृत्वाह। अथवेति। कार्यानुकूलत्वस्य कार्यानुकूलत्वे।
तदप्युद्देश्यसिद्धये संयोगत्वेनार्थान्तरवारणायाह अतीन्द्रियेति। उक्तातीन्द्रियत्वस्य प्रतिबंधकाभावेऽपि स-
त्त्वात् परमतेऽर्थान्तरमाभूदित्यत उक्तं समवायीति। जनकत्वादिति। न चाभावे व्यभिचारः समवायगर्भसाध्यस्य त-
त्राभावादिति वाच्यं। परैरभावानंगीकारात् न तु तथापि समवायेन व्यभिचारः न च तत्रापि जातिसमवायो-

स्येवेतिवाच्यं।अनवस्थानादितिचेत्।न।निमित्तकारणतातिरिक्तकारणताश्रयत्वस्य हेत्वर्थत्वात्।तच्चयत्किं
चित्कार्यंप्रत्येवविवक्षितंनतुदाहलक्षणंकार्यंप्रतीतिनासिद्धिरितिध्येयम्।अत्रसाध्येहेतौचदाहपदप्रक्षे
पेणवह्निपक्षकानुमानइवानुमानान्तरमपिग्रंथकृदभिमतंलेखकप्रमादाच्चनप्रवर्ततइतिप्रतिभाति
अतएवैतदंतर्भावेणैववक्ष्यति।अग्रिमचतुर्षुबहिरिंद्रियाप्रत्यक्षत्वमुपाधिरिति।अन्यथातदसंगतत्वा
पातादितिवक्ष्यते।नयावत्सत्त्वमिति।नचद्व्यणुकादौसाध्याव्याप्तिरितिवाच्यंदाहजनकत्वरूपपक्षधर्मावि
च्छिन्नसाध्यव्यापकत्वादितिभावः।शुद्धसाध्यव्यापकमाह·ऽव्यत्वमिति।द्व्यणुकेति।नन्वेकत्वत्वस्पर्शत्वजाति
नातींद्रियेद्व्यणुकेकत्वत्वद्व्यणुकस्पर्शत्वोपाधौचनसमवेतो·तएवतत्रसाध्यासत्त्वान्नसाध्याव्याप्तिरि २८८

तिचेत्। अत्र वेचित्। अतन्तुगुणसंविज्ञानबहुव्रीहिणा गुरुत्वधर्म्मादिकमुक्तं तत्र साध्याव्यापकत्वमस्त्ये
वेत्याहुः॥ अन्ये तु धर्म्मांशस्याविवक्षितत्वेन तत्समवायित्वस्य च तन्निरूप्यसमवायाश्रयार्थकतया सम
वायिद्रव्यगुणकर्मान्यायेव तत्र साध्यसत्त्वमिति वदन्ति। शान्तिवदुपाधिरपि समवेति। अन्यथा उपाधिरसंब
द्ध एव स्यात्तन्मते विशेषणतया। अनभ्युपगमादित्यप्याहुः। नन्वनुकूलत्वं यदि जनकत्वं तदा शान्तौ तदभ्युप
गमेऽपसिद्धान्तः। अथावच्छेदकत्वं तदा दृष्टान्तासिद्धिः। आत्मन्यदृष्टरूपतादृशधर्म्मस्य जनकत्वादिमनय
साधारणं तदाह। अनुकूलत्वं चेति। उभयसिद्धेति। तथा च प्रतिबंधकाभावस्येव दाहादिप्रयोजकत्वं कल्प्यते।
धर्म्मिकल्पनातो धर्म्मकल्पनाया लघुत्वादिति तात्पर्य्यार्थः। घटे त्वार्थःसमाउ इति। ईश्वरकर्तृकत्वस्यान्यायत्र

चिं॰ अ॰ त॰
२८९

289

सत्त्वात् । अकुलालकर्तृत्वस्य च घटत्वावच्छेदेनान्वयस्य व्यतिरेकसिद्धत्वादिति भावः । समवायिकारण इति य
द्यपि निमित्तकारणेपि शक्तिरस्त्येवेति तद्द्वाराप्यनवस्था भवत्येव तथाप्येकाधिकरणानंतशक्तिरूपा
निष्टप्रसंजनाय समवायिकारणेत्युक्तं । यद्यपि भावमात्रस्य समवायिकारणजन्यत्वं परैर्न मन्यते । तन्मते भाव
कार्यस्यापि समवायस्य तथाभावाभावात् । तथापि समवेतकार्यं प्रति तथात्वं स्वीकार्यमेवेति भावः । न चैवम
नवस्था प्रामाणिकी प्रमाणाभावात् । न च कार्यान्यथानुपपत्तिरेव प्रमाणं । तस्योभयसिद्धप्रतिबंधकाभावे
नैवोपपत्तेः । न चाभावो न कारणं भाववद्ग्राहकतौल्यात् । एवं च गुणादिनिष्ठशक्तौ गुणादीनां समवायिकार
णत्वापत्तौ द्रव्यत्वापत्तिरित्यपि दूषणं द्रष्टव्यं । न च नित्येव शक्तिर्न कार्येति वाच्यं । अनित्ये भावहेतुजेतित २८९

त्सिद्धान्तात्। किं चैवं प्रतिबन्धकवह्नेरपि दाहापत्तिः। नचोद्भूता शक्तिस्तदा नास्तीति वाच्यं। उद्भूतत्वमपि य
दि नित्यं तदा स एव दोषः। अथानित्यं तदा तज्जननानुकूलाद्याशक्तिः शक्तावपि स्वीकार्या। एवं च तत्राप्युद्भूतत
त्वजननानुकूलशक्त्यन्तरमित्यनवस्थापत्तेः। उद्भूतत्वस्यैव शक्तिस्थानाभिषेचनीतया नित्यशक्तौ मानाभा
वश्चेति साधवः। प्रथमानुमानमित्युपलक्षणं। अजनकत्वगर्भे द्वितीयानुमानेपीति द्रष्टव्यं। ननु चोद्भूतविशि
ष्टा शक्तिरजनकदशायामप्यास्त एवेति पूर्वपक्ष एवोक्तमिति न बाध इति चेत्। न। नित्यानित्यविकल्पेन पूर्वोक्तो
नोद्भूतत्वे मानाभावः इत्येतदवष्टंभेन तथोक्तत्वात्। वस्तुतः प्रतिबंधककाल एव परं शक्तौ नोद्भूतत्वं। त
था च सहकार्यन्तरविरहप्रयुक्तं यदा वह्नेः कार्यानुपधानं तदा उद्भूतत्वविशिष्टायास्तस्याः सत्वाद्बाध

वि॰अ॰र॰
२९॰
290

एवेतिभावः। अतीन्द्रियत्वगर्भे साध्ये प्रागुक्तं दृष्टान्तासिद्ध्युद्धारं दूषयति। लोहेति। अग्निमेति। यद्वा धर्मेतीं
द्रियत्वं विशेषणमित्यादिष्वित्यर्थ इति केचित्। तन्न। कुठारे साध्याव्यापकत्वापत्तेः। तदनुमाने कुठारस्यैव दृ
ष्टान्तत्वेन तत्र साध्यसत्त्वात्। न च लोहविशेषाणामित्यनेन तत्र साध्याभावव्यवस्थितिर्नैवमिति वाच्यं। एवं हि
साध्याव्यापकताग्रहस्यलाभावादेव नोपाधिः स्यात्। न चात्मैव तथेति वाच्यं। अदृष्टादेरजनकद्रव्याच
र्त्तित्वेन तत्र साध्यासत्त्वात्। न च जनकद्रव्यमात्रवृत्तिपरमाण्वादिसंयोगमादाय तत्रापि साध्यसत्त्वमिति वाच्यं।
एवं हि तादृशसंयोगमादाय घटादावपि साध्यसत्त्वेनोपाधेः साध्याव्यापकत्वात्। न च गुरुत्वाभावरूपप
क्षधर्मावच्छिन्नसाध्यव्यापकत्वमिति वाच्यं। सौरालोकादावपि तादृशपरमाणुसंयोगादिसत्त्वेन साध्या २९॰

व्यापकत्वात्। तस्मात्पूर्वोक्तसंयोगपक्षकदाहघटितसाध्यकानुमानेनसहयज्जष्ट्रमन्निमतमितिनव्या
नापिस्थितिस्थापकवत्तिवृत्त्वादौसाध्याव्याप्तिरितिवाच्यं। कार्य्यानुकूलत्वस्यस्वनिमित्तकारणकानुकू
लेतिविवक्षया। स्थितिस्थापकस्यातथात्वेनवृत्त्वादौतथासत्वात्। कार्य्यपदस्यवह्निकार्यपरत्वाद्वातथा
त्वतादृक्त्वासाध्यमात्मन्येवतत्रचोपाधिरस्त्येवेतिनसाध्याव्याप्तिरितिभावः। अपरेतुयत्त्वर्षुमध्येकार्यानुकू
लेत्यादिघटितानुमानत्रयेऽयमुपाधिरित्यर्थइत्याहुः। अपिचेति। चन्मतेचान्वयव्यतिरेक्यवगमकइतिभा
वः। तत्सिद्धिरिति। शान्तिसिद्धिरित्यर्थः। तथाचनैतदनुमानेनैवशान्तिसिद्धिर्येनान्योन्याश्रयइतिभावः। परार्ध
संख्यायामित्युपलक्षणं। परममहत्त्वपरमाणुपरिमाणादावपिऽष्टव्यं। अप्रत्यक्षायाइति। ननुप्रत्यक्षंएव

वि·अ·भ· २९१ 291

न व्याप्तिग्राहकं। अतीन्द्रियानुमानस्थले तदभावात्। तथाच मानान्तरेण साध्यहेतुव्यतिरेकग्रहोस्त्विति चे
त्। अत्र कस्यचिदाशंकाभिप्रायेणेदमुक्तं। वस्तुतस्त्वन्यथोपपन्नतया सर्वमेवानुमानमप्रयोजकमिति भाव इति के
चिदाहुः। वस्तुतो मानान्तरं न ग्राहकं। सिद्धार्थत्वात्। तेनाप्यनुमानं। कार्यानुकूलातीन्द्रियधर्माभावानुमानं सि
ज। नकत्वाभावेनैव लिंगेन वाच्यं। जनकत्वसत्वे तादृशधर्माभावो न तादृशधर्मस्य जनकतावच्छेदकस्य स
त्वे जनकत्वस्याप्यावश्यकत्वात्। एवं च हेत्वभावेन साध्याभावः साध्याभावेन हेत्वभावोनुमेय इति व्यान्तःम
न्योन्याश्रय इति भावः। यद्वा तदनुमानमपि साध्यसाधनाभावव्याप्तिग्रहमन्तरेण नस्यात्तद्ग्रहश्च न तदुभ
यव्यतिरेकग्रहसिद्धिं विना तदुभयव्यतिरेकश्च साध्यसाधने एवेति साध्यसाधनव्याप्तिग्रहे तदुभयाभाव २९१

व्याप्तिधीस्तस्यां च सत्यां तदुत्तरया व्याप्तिधीरित्यन्योन्याश्रय इति भावः। न चान्वयव्याप्तिधीर्व्यतिरेक
व्याप्तिधीहेतुरिति नान्योन्याश्रय इति वाच्यं। तथाप्यन्वयव्याप्त्यग्रहादेव तदनुपपत्तेरिति भावः। एतेन पंडेति।
न च पंडापूर्वादौ स्वध्वंससाक्षात्कारजनकत्वेन जनकत्वाभाव एव नेति वाच्यं। अतींद्रियत्वेन योगिज्ञानस्य
विषयात जन्यतया साक्षात्कारजनकत्वात्। तन्मते ध्वंसस्याधिकरणादिरूपतया तदसाध्यत्वाच्चेति भावः।
तृणारणीति। तथा च वह्नित्वप्रयोजकतया तृणादीनामेकानुगतशक्तिसिद्धावन्यत्रापि तदनुमानमिति भा
वः। ननु वह्निनिष्ठजातिः प्रमाणसिद्धा तथा च धर्म्मिकल्पनादिति न्यायान्तस्या एवावच्छेदकत्वं कल्प्यते न
शक्तिरित्यत आह। तृणारणीति। तथा च जातित्रयमपि कल्प्यमेवेति तदपेक्षयैकशक्तिकल्पनमेव लघि

वि॰अ॰म॰ २७२

२९२

तिभावः। यत्त्वेति। नञोक्तन्यायावतारादिति भावः। शंकते। यदीति। वैजात्ये वैजात्यपदं इत्याशंक्येतत्पर्थी।
नन्वेवं तृणनिर्म्मथनाभ्यामपि वह्न्युत्पत्त्यापत्तिः। कारणतावच्छेदकावच्छिन्नघटितसामग्र्यासत्त्वादित्यत आ
ह। यथाचेति। नत्वेवतच्छन्नयोरपाति। नन्वेवं कार्यवैजात्यमावश्यकं। एकजातीयकार्य्ये सहकारिनियमा
नुपपत्तेः। सहि फलविरोधेनपरं स्यात्‌। सत्त्वकार्य्यतावच्छेदकभेदेन सत्त्वप्रसक्ततेन कार्यवैजात्यं विना। एवं
चानेकशक्तिमत्त्वेन जनकत्वमिति चेतात्राहुः। तृणादीनां वह्नित्वावच्छिन्नं प्रत्येकशक्तिमत्त्वेन फूत्कारादीनां
च तृणजन्यवह्नित्वावच्छिन्नं प्रतिजनकत्वेनैव शक्तिसिद्धिः सहकारिनियमयोरप्युपपत्तिरिति। केचित्तु य
था प्रागभावत्वेन कार्य्यमात्रं प्रतिकारणत्वेपि घटप्रागभावेन घटं प्रतियोग्यः यथा वाऽन्यविशिष्टज्ञानविशे २७२

घटज्ञानत्वेन कारणत्वेपि घटत्वज्ञानं घटत्वविशिष्टज्ञानं प्रति न स्वरूपयोग्यं। तथा फूत्कारादीनामेकश
क्तिमत्त्वेन कारणत्वेपि न तृणमंथनादिस्थो वह्न्युत्पत्तिरित्याहुः। तृणफूत्कारसंबंधजनने रणिकिरणमणि
संबंधादिष्वेकजातीयशक्तिमत्त्वं कारणतावच्छेदकं। तथा च तदन्यतमसंबंधाभावे तृणनिर्मथनस
मवधानेपि न वह्न्युत्पत्तिरित्याहुः। स्वैकदेशिमतं दूषयति। यच्चेति। तृणत्वेनेति। यद्यपि परमते तृणत्वेन
न कारणता किंत्वेकशक्तिमत्त्वेन अन्यथा तद्दार्थं कार्यवैजात्यकल्पनापत्तेः। तथापि तृणादिनिष्ठशक्तेर्न
व्यासज्यवृत्तित्वं लाघवात्। कारणतापदेन शक्तिरेवात्र विवक्षिता। तथा च तृणत्वावच्छेदेन गृहीतशक्ति
भंगप्रसंगादित्यर्थः। तृणादिशक्तेः स्वैकजातीयत्वेनानुगमः। एकजातिप्रयोजकं च तत्रादृष्टादिकं। न च गौ

वि॰ अ॰ म॰
२९३
293

रवं प्रामाणिकत्वादिति भावः। प्रतिव्यक्तीति। एतच्चानित्यभावहेतुजेति सिद्धान्तात् अनित्यत्वाभ्युपगमेव
पूर्वोक्त एव दोषो द्रष्टव्यः। जातीति। न च मण्यादेः कारणए वैका जातिः कल्प्यतां लाघवादिति वाच्यं। प्रस्तरत्वा
दिना संकरापत्तेरिति भावः। प्रत्यक्षसिद्धत्वादिति। तथा च धर्म्मिकल्पनात इति न्यायेन तस्या एव जातेरवच्छे
दकत्वं कल्प्यते न तु शक्तिः कल्पयित्वा तदवच्छेदकत्वमिति भावः। एतदपि जातेः प्रामाणिकतया तदवच्छेदकत्व
स्यैव लाघवादौ चिन्त्यमित्यभिप्रेत्योक्तं वस्तुतः कार्यतावच्छेदकाननुगमस्यादोषत्वाज्जात्यभावेऽपि तत्तद्व्यक्ति
त्वस्यैवावच्छेदकत्वसंभवान्न शक्तिसिद्धिरित्यवधेयम्। तन्मते जातेः संस्थानमात्रव्यंग्यतया शक्तौ जात्यभा
वे कथमनुगम इत्यपि दूषणं बोध्यम्। वह्नित्वजातौ योग्यानुपलब्धिं निराकरोति। तृणजन्येति। अन्यथा २९३

विशुद्धमातापितृजन्यत्वेनैव ब्राह्मणानुगतबुद्धेस्तत्रापि जात्यसिद्धिः स्यादिति भावः। वैजात्यानंत्यमुद्धर

ति। गोमयेति। यद्यपि गोमयवृश्चिकप्रभवयोर्वृश्चिकयोर्वैजात्यद्वयमस्ति तथापि वृश्चिकप्रजनवत्वजयोज्य

जातिमत्वमिति नानंत्यमिति भावः। वह्निजातीयस्याकस्मिकत्वप्रसंगं प्रागुक्तमुद्धरति। वह्निमात्र इति। य

द्यप्युदर्य्यवह्नेरनुद्भूतः स्पर्शइति लीलावत्यादौ व्यवस्थापनात्तत्र कथं वह्नित्वं प्रयोजकाभावात्तथापि

भौमवह्निमात्रएवतत्प्रयोजकत्वमुक्तमिति भावः॥ केचित्तु लीलावतीग्रंथस्थापातनो वस्तुतस्तत्रोद्भूतए

वस्पर्शइत्याहुः। पवनेति। एतदुत्कर्षेण वह्न्युत्कर्षदर्शनादिति भावः। तदस्यः तत्पवतिष्ठते। नन्विति। ननु तृ

णजन्यत्वं तृणरूपादौ प्रसिद्धं तदभावश्च मणिजन्यवह्नौ सुग्रह इति तदवच्छेदेन मणिजन्यत्वं सुग्राह्यमि

चिं॰अ॰म॰
२९४
२९५

त्पत आह॰ वह्निमात्रस्येति। व्यभिचारेण तृणस्याजनकत्वाद्वह्निमात्रस्यैव तदजन्यत्वादित्यर्थः। एवं च स ए
व व्यभिचार इति भावः। उक्तमाह केरिति। अन्वयव्यतिरेकाभ्यां नियतेनान्वयेन चेति त्रित्वाद्बहुवचनोपप
त्तिः। अकार्य्याकारणेति। ननु कारणत्वसंशये कथं तदवच्छेदकरूपवत्त्वनिश्चयः तयोरेकनिश्चायकनि
श्चयत्वात्। किं च॰ वह्निनिष्ठकार्यतायास्तृणनिष्ठकारणतायाश्चाग्रहे कथं तदवच्छेदकत्वेन ज्ञानं विशेष
णज्ञानसाध्यत्वाद्विशिष्टज्ञानस्य। अपि च कार्यताद्यवच्छेदकत्वं कार्यताद्याश्रयमात्रवृत्तित्वं तद्ग्रहे च का
र्यताद्याश्रयत्वमवश्यं विषयः। न च कार्यताद्यपि गृह्यत एवेति वाच्यं। व्यभिचारेण तद्ग्रहस्याशक्यत्वादि
ति चेत्। अत्र वदन्ति। कार्यतादिकमप्यत्र गृह्यत एवेतेन नोक्तसर्वदोषावकाशः। न चोक्तव्यभिचारनिश्चये २९४

कथमव्यभिचाररूपनियमगर्भहेतुग्रह इति वाच्यं। समानप्रकारकविरोधिज्ञानस्यैव प्रतिबंधकत्
यात्तद्रूपत्वावच्छिन्नस्य वह्नित्वावच्छिन्ने व्यभिचारग्रहे तदवच्छिन्नस्य तदवच्छिन्ने हेतुत्वाग्रहेऽपि तदाश्रययो
र्हेतुहेतुमद्भावग्रहस्याविरोधात्। अत एव यागं विनापि दानात्स्वर्ग इति ज्ञानेऽपि स्वर्गजनको याग इति धीः
स्वर्गत्वसामानाधिकरण्येन यागजन्यत्वं विषयीकरोति। तदिदमाह। न तद्रूपत्वेन हेतुत्वं वह्नित्वेन कार्य
त्वं चेति। यदि च कार्यकारणतावएवन गृह्यते तदा न हेतुत्वं कार्यत्वं चेत्येव ब्रूयात्। न चैवं वह्नित्वावच्छेदेन
व्यभिचारग्रहेऽपि वह्नित्वसामानाधिकरण्येन तृणजन्यत्वं गृह्यतामिति वाच्यम्। ग्राहकाभावात्। अत्र वा
रणिमण्यन्तावयवनीत्यादिना ग्राहकस्योक्तत्वात्। न चैवं तृणनिष्ठकारणताप्रतियोगिककार्यताश्रयत्वं गृ

स्यत इत्येवास्तु किं तदवच्छेदकरूपपर्यन्तेनेति वाच्यम्। अग्रिमविनिगमकविशेषस्य सामान्यतोऽवच्छेद
कग्रहं विनाऽनुपपत्तेः। सामान्यतो दृष्टावतारं विना परिशेषानुदयादिति। यत्तु ससंबंधिकप्रत्यक्षज्ञाने सं
बंधितावच्छेदकरूपवत्त्वज्ञानमावश्यकमिति तद्धियं विना न कार्यकारणभावग्रहः प्रत्यक्षेण। अत एव न
शाब्दस्वर्गजनकत्वज्ञानप्रतिबंधातिप्रसंगाऽयं वह्निव्यक्तिस्तृणजन्येति प्रत्यक्षे एतद्वह्नित्वादेरवच्छेदंभा
नात्। न च तस्यानवच्छेदकतया तदवच्छेदेन कार्यताबुद्धेर्भ्रमत्वापत्तिरिति वाच्यं। कार्यताबुद्धावच्छेद
कत्वस्याप्यभानात्। भाने वा तदंशे भ्रमत्वेऽपि कार्यतांशेऽप्रमात्वादिति भावः। अन्य एवेति। अभावत्वप्रति
योगिकोऽभ्यासज्यप्रतियोगिक इत्यर्थः। अभावस्येति। तथा च हृणोत्कर्षे गवन्युत्कर्षो न स्यादिति भावः। २९५

एतेनेति। लक्षणस्य तदुभयत्वापत्त्येत्यर्थः। पूर्वं मिलितानां तृणादीनामभावत्रयाभाववत्त्वेन हेतुत्वमात्रं
कितमिदानीं तु प्रत्येकस्येति न पौनरुक्त्यमित्यर्थः। तत्त्रयसिद्धत्वमेव स्थापयति। कथमिति। तटस्थ आ
ह। नन्विति। अवघातेन व्रीहेर्न्नष्टत्वात्तदन्वयः पुरोडाशेनसंभवतीत्यत आह। अवयवेति। नन्विति। त
था च न तद्व्यापारत्वेनातिशयः कल्प्यत इति भावः। तटस्थाशंकां परिहरति। मैवमिति। क्रमेणोपाद
यमानेऽवघातजनके व्यभिचारादाह। प्रमाणत इति। नन्व कारणे कारणकारणे व्यभिचारः। न्वकार
णाकारणसाधारणमनुकूलत्वमात्रं साध्यं तदपि मध्यवर्त्तिघटितमित्यतिशयसिद्धिरिति वाच्यं। ए
वं हि जनकीभूतध्वंसजनकत्वेनापि साध्यस्य चरितार्थत्वे प्रतियोगिनो हेतुत्वापत्तेर्व्वक्ष्यमाणविरो

ध्यादितिचेत्तान।वेदमूलकावघातोद्देश्यकोपादानविषयत्वादितिविशेषव्याप्त्यैवसाधनादिति॥
वस्तुतोव्यक्तिवचनान्यायेनावघातेप्रोक्षितव्रीहेरन्वयेप्रोक्षणस्यबाधकंविनाविशेषणत्वंनोपलक्ष
णत्वमिति।प्रतियोगिनइति।प्रतियोग्यनुयोगिनोरेकत्वाजनकत्वादित्यर्थः।व्यापारंविनैवप्रोक्षणस्यावघा
तजनकत्वमस्त्वितिशंकते।नचेति।अहेतुत्वादिति।प्रोक्षणस्यहेतुत्वंसाधितमितिभावः।ननुयद्युपलक्षण
मतीतमजनकंतदानततोव्यावृत्तबुद्ध्यादिकंस्यादित्यतआह।कुरुणेति।तन्निर्मितेत्युपलक्षणं।तद्भोग
साधनत्वपिदृष्टत्वम्।अन्यथासाधनवैकल्यापत्तेरित्यवधेयम्।जन्मान्तरीयैरिति।अतीतोपलक्षण
स्यापिजनकत्वादितिभावः।एतावताध्वंसातिरिक्तव्यापारंसिद्धमुपसंहरति।तस्मादिति।प्रमाणतइति।२७६

कार्यपदृया विरहस्तत्वे सतीति विशेषणं तेन साक्षाज्जनकेन व्यभिचारः। अतिशयस्य भावत्वं च
पदृधर्म्मतावलम्ब्यं न तु साध्यतावच्छेदकप्रविष्टं तेन विघ्नध्वंसद्वारा समाप्तिसाधने मंगले मिथ्याज्ञा
नध्वंसद्वारा मुक्तिसाधने तत्वज्ञाने वा न व्यभिचारः। न चातिशयः पुरुषसमवेत एव तथा च नाधेयत्वाति
सिद्धिरित्यत आह। सचेति। संस्कारत्वेनेति। न चैवमनेकव्रीह्युपादानं न स्यादिति वाच्यं। होमादिनिर्वाहार्थं
तदुपगमात्। ननु यत्र किंचिदवयवनाशात्सकलव्रीहिनाशो न स्वं तु व्रीहीणामुत्पत्तिस्तत्र का गतिरि
त्यस्वरसादाह। अस्तु वेति। किंचिदिति। यावत्प्रत्यभिज्ञं वस्तुस्थितिरिति च मतावष्टंभेनेदम्। यद्यप्यति
शयस्यैकत्वेनैव पुरुषनिष्ठत्वं सिध्यति। अन्यथा लाघवेनाश्रयनाशमात्रस्यैव कार्यनाशप्रयोज

वि॰ अ॰ न॰
२८७
२९७

कत्वेनैकव्रीहिनाशे तन्नाशाद्भीष्यन्तराणामुपयोगेन स्यात्तथापि प्रकारान्तरमाह। तथाहीति। दृ
ष्टद्वारेति। अत्र धर्म्मजनकत्वं साध्यं तथा च निषिद्धकर्म्मणि व्यभिचारवारणाय विहितत्वादित्युक्तमाश्रा
यश्चित्ते व्यभिचारवारणाय कालान्तरेत्यादि। ननु दृष्टद्वाराभावे सतीत्यस्याऽदृष्टान्यद्वाराभावे सती
त्यर्थः। तथा चासिद्धिः परमते शाक्तेरेव द्वारत्वात्। न च प्रत्यक्षद्वाराभावे सतीति तदर्थः। औषधपानादौ व्य
भिचारात्। न च तत्र विहितत्वाभावादेव न व्यभिचार इति वाच्यं। आयुर्वेदेन तस्यापि विहितत्वादिति चेन्न।
शक्तेरुपजीव्यमाणमात्रप्रयोज्यधीविषयद्वारेतरद्वारस्य दृष्टद्वारपदेन विवक्षितत्वात्। न चौष
धादौ व्यभिचारः तदीयधातुसाम्यादिरूपातिशयद्वारविशेषशक्त्यानुपजीव्यमाणसत्वादिति २८७

वाच्यं। अन्वयव्यतिरेकादिमूलकप्रमाणस्यापि कदाचित्त्वसंभवादिति भावः। तुष्यादविति। नच
विहितत्वाभावादेव न तत्र व्यभिचार इति वाच्यं। प्रत्येकवर्गोपायविभागविधिना वैश्यपत्तषिद्धिधाना
दिति भावः। नानुबन्धमिति। एतच्च परमते अस्मन्मते श्येनापूर्वस्य शत्रुनिष्ठत्वमेव फलोपपादकापूर्वं
फलाश्रये कल्प्यत इति वक्ष्यमाणत्वात् युक्तात्तथा व्यवस्थितेः। अत एव गयाश्राद्धापूर्वस्यापि पितृनिष्ठत्वं पं
चमटीकायां तथा विभावनाच्च स्वमते न दोषमाह। विपक्षेति। न च फलसामानाधिकरण्यलाघवमेव विप
क्षबाधकमिति वाच्यम्। नानात्वगौरवेण तल्लाघवानादरादिति भावः। हविस्त्यागेति। वस्तुदेश्येन हवि
स्त्यज्यते न च तत्त्वातिशययोजन्यत इत्यर्थः। न च वह्नेः दाहानुकूलः संयोगोऽजन्यत इवेति वाच्यम्। एवं सोद

वि·अ·म·
२५८

णेनापि व्रीहेर्जलसंयोगस्य जननात्सिद्धसाधनादिति भावः। पुरुषसमवेतातिशयस्य परंपरासंबं
धेन स्वरूपसंबंधेन साक्षादेव व्रीहिनिष्ठत्वस्याप्युपपत्तेर्नातिरिक्तपदार्थकल्पनमिति तत्त्वं। अथोत्प
न्नतत्त्वज्ञानवत्पुरुषकृतप्रोक्षणेन दोषाभावाद्दृष्टानुत्पादेऽशक्तिसिद्धिरिति चेत्। न। तत्र फलानुत्पाद
ध्यावासंग्रहार्थं तदावरणादिति भावः। बर्हिष इति। बर्हिषो यागस्येत्यर्थः। यथा तस्य जनिता दृष्टस्य न पुन
रुपयोगान्तरं तथा व्रीहेरदृष्टजननोपगमे तत्त्वस्यादित्यर्थः। यद्वा। व्यतिरेकदृष्टान्तोऽयं यथा बर्हिस्त्व
णतीत्यादिविधिबलात्तस्य पुनरुपयोगस्तथा च न स्यादित्यर्थः। उक्तन्यायेनेति। व्यक्तिवचनन्यायेनावघा
तेऽप्रोक्षितस्यैवान्वये सर्वमिदमविरुद्धमिति भावः। ननु रुरेपुंषेपातीत्यादिदोषेण दृष्टं नोत्पद्यत इत्यत न २५८

न्यगत्या व्रीहिनिष्ठातिशयः स्वीकार्य्य इत्यत आह। कर्त्तृकर्म्मेति। एवं व्रीहिनिष्ठोपि स न स्यादित्यर्थः। पु
रुषनिष्ठत्वे साधकमुक्त्वा व्रीहिनिष्ठत्वे बाधकमाह। किंचेति। कार्येति। भावकार्यस्यार्थः। स्वाश्रयेति। स्वसम
वायिकारणेत्यर्थः। एवं च किंचिदाश्रयनाशे वृक्षादिनाशेपि प्रत्यभिज्ञानस्य तज्जातीयत्वं विषय इति भा
वः। संयोगस्येति। ननु फलस्योपलक्षणत्वे तत्र व्यापारमात्रस्यैव धात्वर्थत्वे त्यजगत्योः पर्यायतापत्तिः। अव
च्छेदकीभूतयोः फलयोर्विभागसंयोगयोर्धात्वर्थाप्रवेशे स्पंदमात्रस्यैवोभयधात्वर्थत्वात्। कर्म्ममात्रस्यैवो
भयजनकत्वे पतनादिवदवान्तरजातिमादायाप्यर्थभेदस्य दुरुपपादत्वादिति। अत्र वदन्ति। व्यापारे
उपलक्षणीभूतस्यापि फलस्य प्रतीतौ विशेषणत्वमेवा इष्टसाधनतापविधिपदे क्रियोपलक्षणस्यापि

वि·अ·म· ष्टस्यज्ञानेविशेषणतावत्।तदत्रफलविशिष्टोव्यापारोयदिवाच्यस्तदाशब्दात्फलविशिष्टव्यापारधीर
२९९ परस्याफलोपहितव्यापारधीरित्युभययाफलांशेपिशक्तेःक्वप्रतीत्यविशेषोयेनपर्य्यायताविशेषणत्वे
299 प्रकृतेकर्म्मत्वानुपपत्तिरिति।अस्तुवाप्रोक्षणजन्यापूर्वस्यसाक्षात्स्वरूपसंबंधेनैवव्रीहिकर्म्मत्वंसाक्षा
द्वीजन्यसंस्कारविषयतयाघटादीनामिव।एवंचप्राप्यसंस्कार्य्यकर्म्मणोर्नदोषुपपद्यतइत्यभिप्रेत्याह।
किंचेति।वह्निमिति।नह्यत्रकर्म्मणिद्वितीया।अनुमितौवह्नेरकारणत्वात्।कर्म्मणश्चकारकविशेषत्वा
त्।किंतुसाधुविभक्तिस्तथात्रापीत्यर्थः।नचेति।प्रतिष्ठितंप्रडयेदितिनिष्ठास्वरसादितिभावः।ततएवातस्
त्वेपिचांडालादिस्पर्शेनापूज्यत्वादेवेत्यर्थः।देवताचेतन्यपक्षमालंब्यपरिहरति।प्रतिष्ठाविधिनेति।अपि २९९

कारेति। अहमियं प्रतिमा ममेदं शरीरमित्यादिज्ञानरूपमित्यर्थः। नन्विदं ज्ञानं विषयबाधाभ्रान्तं स्यात्। नन्वू
नत्संभवति विशेषदर्शनादित्यत आह। स्वरसादत्रपेति। तथा च विशेषदर्शने सत्यप्याहार्य्यभ्रमोयमित्यर्थः।
ननु देवतायाः सर्वदेहत्वाभावेन व्यासंगदशायां व्यवहितनानादेशे तत्र तत्र प्रतिष्ठा कथमहंकारममकारा
त्मिका· संस्कारनाशो वा कथं पूज्यत्वं· कथं वा ज्ञानसंस्कारयोरननुगतयोः पूजाप्रयोजकत्वमिति प्रथमकल्प
नानुपपत्तिः। यत्र च व्यासंगवशान्न प्रत्यभिज्ञानं तत्र प्रतिष्ठितप्रतिमापूजापि निःफला स्यात्। प्रतिष्ठितं पूज
येदित्यादिना च प्रतिष्ठायास्तदंशस्य वा हेतुत्वं बोध्यते। न तु प्रत्यभिज्ञानस्यापीति द्वितीयकल्पनानुपपत्तिः।
दृष्टेनैवोपपत्तावदृष्टकल्पनानुपपत्तिरिति तृतीयकल्पनानुपपत्तिरित्यस्वरसादाह। वयं त्विति। ननु

वि॰अ॰प॰ ३००

300

यत्रप्रतिमायांप्रतिष्ठाजातादैवात्किंचिदवयवनाशादन्याप्रतिमाजातातत्रप्रतिष्ठारूपप्रतियोगिनोऽप्र
वृत्तेस्तद्ध्वंसस्यापिनवृत्तिः।प्रतियोग्यधिकरणएवध्वंसस्यवृत्तेः।तथाचतत्कृतानिःफलास्यात्।नचेष्टापत्ति
राचारविरोधादन्यथैतत्छंकयाकस्यापिनप्रवृत्तिःस्यात्।नचतत्प्रतिमावृत्तित्वेनध्वंसस्यनप्रयोजकत्वंकिं
तुस्वरूपेणतच्चास्त्येवेतिवाच्यं।एवंहितद्ध्वंसस्यप्रतिमान्तरवृत्त्यत्वप्रयोजकतापिस्यादविशेषादितिचेत्॥
अत्राहुः।इयंप्रतिष्ठितेतिबुद्धेःखंडप्रतिमायामपिप्रमात्वव्यवहारात्तद्ध्वंसस्यतत्रापिवृत्तिरेव।प्रतिमान्त
रेयत्तदभावात्तदभावः।अतएवप्रोक्षितव्रीहीणांयत्किंचिदवयवनाशान्नाशोपिखंडव्रीहाणामुपयो
गः।संस्कृताएतेव्रीहयइतिप्रतीत्यातत्रापिपुरुषसमवेतसंस्कारसंबंधसिद्धेः।अन्यथासर्वमिदंतत्रापि ३००

तुल्यमिति। प्रतिष्ठाकालीनेति। अत्र स्वसमानाधिकरणेत्यपि विशेषणं। तेन तत्प्रतिष्ठाकालीनप्रतिमा
न्तरास्पृष्टस्पर्शप्रागभावाभावेन यावदर्थाभावान्नापूज्यतापत्तिः। ननु प्रतिष्ठोत्तरमपि पूज्यता न स्यात्
प्रतिष्ठापूर्वकालीनास्पृष्टस्पर्शाणां ज्ञाततया तत्प्रागभावाभावादित्यत आह प्रतिष्ठाकालीनेत्यभाववि
शेषणं। नन्वेकस्पर्शानंतरमग्रिमस्पर्शप्रागभावसत्वात् पूज्यता स्यादित्यत आह यावदिति। आदिपद
मवयवविभागादिपरं स्फुटितप्रतिमाया अपूज्यत्वात्। नन्वनादिसंसर्गपदमत्र किंचित्करमिति चे
त्। अत्राहुः। तावदभावसहितप्रतिष्ठाध्वंसहेतुत्वे तावंतोपि हेतव इति ध्रुवं। तथा चानादित्वानंतर्भावे
साधनाभावानामपि जनकत्वमिति बहूनां जनकत्वे गौरवमित्यल्पजनकत्वलाघवेन सादिव्यावर्तनार्थं

वि·अ·भ·
३०१
301

मनादिपदोपादानं। एवमन्योन्याभावव्यावर्त्तनार्थं संसर्गपदम्॥ अन्ये तु प्रतिष्ठाकालीनत्वेन प्रतिष्ठो
त्तरकालीनत्वं विवक्षितं। तदपि स्पर्शादिविशेषणं न त्वभावविशेषणं· एवं च प्रतिमायामस्पृश्यस्पर्श
ज्ञानेपि तद्ध्वंसान्योन्याभावाभावादस्पृश्यतापत्तिः। प्रतिष्ठोत्तरकालीनानां यावदस्पृश्यस्पर्शानामभावस्य
तत्र सत्वादनादिपदसंसर्गपदोपादाने तु नोक्तदोषः। तत्र त्वस्पृश्यस्पर्शव्यक्तेः सत्वेनादिसंसर्गाभावस्य
तत्रासत्वात्। अत्यन्ताभावस्य प्रतियोग्यसमानाधिकरणत्वात्। प्रागभावस्य प्रतियोगितद्ध्वंसासमानका
लीनत्वादित्याहुः। समयविशेषेति। सर्वविशेषः कार्योन्नेयोयदनन्तरं पुष्पमित्यर्थः। नन्वेवं चरणसंयोग
स्य कारणीभूताभावप्रतियोगित्वेन प्रतिबंधकत्वापत्तिः। न चेष्टापत्तिः। चिरसमयव्यापिसंयोगे सति पुष्पा ३०१

नुतयन्त्यापत्तेरित्यपरितोषादाह। वरणेति। तत्संयोगेति। अत एवाम्लादिसंयोगोऽलक्तालनेनापनीयत
इत्यर्थः। संस्कार एवेति। धर्म्मविशेष इत्यर्थः। अन्ये त्वित्यस्य स्वरसोद्भावनं। तद्बीजं तु दृष्टद्वारेणैवोपपत्त्या
वदृष्टकल्पनानुपपत्तिरिति। समयविशेषेति। नचैवं यागेप्यदृष्टं न कल्प्यमिति वाच्यं। तत्र विधिना कार्य
कारणभावबोधनादत्र तु न तथेति भावः। पाकजविशेषमानमाह। कार्येति। ननु बीजपूरादौ लाक्षाघव
सेकात्कुसुमारुण्यं दृश्यते तत्र लाक्षादिरसस्य गलितत्वात्कालान्तरीयकुसुमारुणिमहेतुत्वं न वा
स्वल्पात्तस्मात्तादृगुत्कर्षः तथा च तत्प्रयोजकत्वेनाधेयशक्तिस्तत्र स्वीकार्येत्यत आह। एतेनेति। इत्यादी
ति। दशाराशोषितं कांस्ये घृतं चापि विषायतइत्यादिपदग्राह्यं। कठिनत्वं तोयेप्रतिबद्धद्रवत्वमित्यर्थः। तु

वि॰ अ॰ स॰
३२

लादौ तुलाविधिजन्यामाधेयशक्तिं जयादिप्रयोजिकामात्मीयां कथं परिहरति । तुलादाविति । तुल्यस्य तुलनी
यस्येत्यर्थः । ननु तुलादिसामग्र्याः क्षणिकतया कालान्तरभाविजयादिजनकत्वानुपपत्तिः । पापिनोपि स
नादर्शनादिना पापवत्वज्ञानाभावे निःपापत्वभ्रमे वा भंगानुपपत्तिश्चेत्यरुचेराह । अथ वेति । तयेति । तु
लाधिरोहणसामग्र्येत्यर्थः । ननु दृष्टद्वारेणैवोपपन्नावदृष्टकल्पनानुपपत्तिः । लौकिकक्रियाया अपी
ष्टानिष्टफलकत्वेन तादृशतुलारोहेण न स्तुत्युन्नयनासंभवश्चेत्यपरितोषादाह । यद्वेति । अयं पापी निः
पापो वा तुलारूढ इति ज्ञानमेव तज्जन्यसंस्कारो वा तत्सन्निधिरित्यर्थः । तांश्चेति । देवता इत्यर्थः । लिंगमिति ।
मंत्रेनोन्नमनादिकमित्यर्थः । स्वेति । यत्र यत्र कार्यस्य घटादेरभावस्तत्र दंडादेरभाव इति व्यतिरेकीव्याप ३२

कता। कालिकीं सामग्री काल एव व्यभिचारात्। एवं च दंडसत्वेपि चक्राद्यभावेन व्यभिचार इति तत्कारण
यकार्याभावं विशिनष्टि समवधानाविरुद्धं तेन स्वेतरसकलसंपन्नाविशिष्टचक्रते। प्रसिद्धिर्दंडेतरसकलमध्यप
तितानां चक्रभ्रम्यादीनां संपन्नो घटाभावाप्रसिद्धेरत उक्तं स्वव्याप्येति चक्रभ्रम्यादीनां च दंडसमवधान
नियतत्वेन दंडव्याप्यतया तदितरसकलसम्पत्तिकालीनकार्याभावाप्रसिद्धेर्नोक्तदोषः एतेन यत्र स्वमौसि। प्य
तत्रापि तत्संपत्तिरस्तीति। तत्र कार्याभावाप्रसिद्धेरेवेत्यपास्तं। कथितेनातादृशाभावप्रसिद्ध्यैव। व्यापकत्व
निर्वाहात्। ननु तदितरेतिसकलपदं तदितरकारणपरं। तदितरकारणमात्रपरं वा। आद्ये आत्माश्रयः
अन्त्ये असंभवः घटाद्युत्पत्तौ चेमादिसमवधानाभावादिति चेत् न। कार्यप्रागभाव व्याप्यप्रागभाव

चि·अ·म·
३·३
३६३

प्रतियोगिसकलस्यविवक्षितत्वात्। कार्यनियतपूर्ववर्त्तिसकलस्यविवक्षितत्वाद्वा कार्यत्वं च प्रागभावाभा
वेनोक्तरूपाभावात्। वस्तुतोऽनन्यथासिद्धत्वमत्रापिदेयमतोनोक्तदोषः अन्यथा कुलालपित्रादौ प्रसंग
तादवस्थ्यात्। तावत्कालत्रम्यादीनांदंडव्याप्यत्ववत्कुलालादीनामपितद्व्याप्यत्वात्। यत्तु· इदंकारणसामा
न्यलक्षणंतथा च कुलालपितृत्वेनजनकत्वापत्तिः यस्य तादृशकार्याभावव्यापकाभावप्रतियोगित्वं त
स्यहेतुत्वमित्यवलक्षणार्थत्वादितितन्न। दंडत्वचक्रादिजनकेतथाप्यतिव्याप्त्यपरीहारात्। नहितज्जनकेदं
डावयवादौ दंडत्वादिसंभवः कुलालमातामहादौप्रसङ्गतादवस्थ्यात्। ननुस्वस्वव्याप्येतरसकलसम
न्वौ स्वस्वव्याप्याभावप्रयुक्तकार्याभावव्यापकत्वायोगाभावस्यायुक्तमितिचेत्। न। तत्संपत्तिकालीनकार्याभा ३·३

वव्यापकाभावप्रतियोगित्वस्य व्याप्यान्यतरकत्वस्य विवक्षितत्वात् तायत्तुः स्वसमवधानकालीनत्वमपि
कार्याभावविशेषणमतो नोक्तदोष इति तन्न । आत्मादिहेताववसेः । नन्वेवमप्यात्मादिहेताववव्याप्तिरेव का
र्याभाववत्तिदेशे काले वा तदभावाभावादिति चेत्न । तत्समवधानसत्त्वेपि तदभावस्य केवलान्वयित्वे तत्रापि
तत्सत्त्वात् स्वव्याप्यस्याभावप्रतियोगित्वेनान्यतरगर्भलक्षणस्य तत्रापि सत्त्वाच्च । न चैवमाकाशस्यापि घट
हेतुतापत्तिरन्यथासिद्धत्वेनैव वारणात् । तत्र व्याप्येतरसकलसमय्यत्वेपि घटाभावाप्रसिद्ध्या । आत्मादे
वस्य व्याप्यहेत्वन्तरप्रत्यासत्तिव्यतिरेकप्रयुक्तकार्याभावप्रतियोगितावच्छेदकावच्छिन्नहेतुत्वरूपत्वमस्ति
यात्मत्वावच्छिन्नाभावस्य ज्ञानाभावव्यापकत्वेपि गुणत्वावच्छिन्नाभावप्रतिसमवायित्वावच्छिन्नाभाववद

त्मरूपसमवायिसत्वेसमवायित्वावच्छिन्नाभावासंभवात्।यदिचकेवलान्वयितयातदभावस्तादात्म्यत्वाव
च्छिन्नाभावापिसुलभएव।केचित्तु·जन्यगुणमात्रंप्रतिसमवायितयाकारणत्वेपिनत्रापितज्जातीयतयोक्तल
क्षणसत्वमित्याहुः।तदपिचिन्त्यं।उक्तरीत्यासमवायित्वस्यकार्याभावव्यापकाभावप्रतियोगितावच्छेदकतया
समवायित्वेनहेतुरित्येवनस्यात्।अन्यथाप्रमेयत्वेनैवहेतुत्वापत्तौतज्जातीयतयागुणादावतिव्याप्त्यापत्तेः
अतएवप्रमेयत्वादेःसामान्यप्रत्यासत्तिरूपकारणेऽव्याप्तिर्व्यतिरेकासिद्धेरित्यपास्तं।तत्रापिस्वव्याप्यव्यति
रेकप्रयुक्तकार्याभावप्रसिद्धिसंभवेनान्यतरत्वगर्भलक्षणसत्वात्।अन्यथास्यव्याप्याप्रसिद्ध्यैवलक्षणासिद्धेः
स्यात्।यत्तुजन्यसाक्षात्कारंप्रतिप्रत्यासत्तितयाकारणत्वेइंद्रियप्रत्यासत्तितद्व्याप्येतरसकलसत्वेइंद्रिय ३·४

त्व

प्रत्यासत्तिव्यतिरेकेसतिघटादिसाक्षात्कारसत्वात्तज्जातीयतयातत्सत्वान्नाव्याप्तिरतएवेश्वरज्ञानादौ
नाव्याप्तिरिति।तन्न।पूर्वोक्तरीत्याप्रत्यासत्तित्वस्यकार्याभावव्यापकाभावप्रतियोगितावच्छेदकतयात
न्रूपेणहेतुत्वस्यैवासिद्धिप्रसंगात्।भावत्वाइंद्रियसंयोगस्यजन्यद्रव्यसाक्षात्काराभावव्यापकाभावप्रतियो
गितावच्छेदकत्वेनरूपेणहेतुत्वप्राप्तेश्चनहियेनकेनापिरूपेणतज्जातीयत्वंवाच्यमतिप्रसंगात्।किंत्वन्वय
व्यतिरेकितावच्छेदकेनैवनचप्रत्यासत्तित्वंतथातदवच्छिन्नस्यव्यतिरेकाप्रसिद्धेरितियद्यपिप्रागभावेऽव्या
प्तिःतदितरसकलसंपन्नोकार्याभावप्रसिद्धेःउत्पन्नपुनरनुत्पादेपिकार्यसत्वात्तथाप्युत्पन्नेरितिविशि
ष्टकार्याभावेपिविवक्षितःसत्वंतत्रास्ति।नचैवंगंधंप्रतिस्वप्रागभावीवरूपादिप्रागभावानामपिहेतुत्वाप

चि॰ अ॰ भ॰ ३०५ 305

त्तिरितिवाच्यं। अनन्यथासिद्धत्वेनैववारणात्। नचसव्येतरविषाणयोः परस्परंकार्यकारणभावापत्तिस्तद्
तरसंपत्तिकालस्यतत्सामग्रीकालस्यपर्यवसानेतत्कालीनपरस्पराभावव्यापकत्वात्परस्परस्येतिवाच्यं। अग्नि
मद्रूणइतिविशेषणात्। तत्सम्यत्वग्निमद्रूणेचकार्यभावाभावात्। यत्तुकार्यपदंतदायकार्यपरमतोनोक्तः
सर्गइतिनञात्मान्वयात्। संपत्तावित्यत्रवैयर्थ्यात्तेः। नचदंडावयवेघटाभावाद्व्याप्तिवारणेनव्यापकत्वमितिवाच्यं।
तत्रतदितरसंघत्यवच्छिन्नकार्याभावाभावादित्येके। कार्यभाववत्तियत्संसर्गाभावस्तत्संसर्गावच्छिन्नस्यस्तद्रूप
त्वमस्तिच। घटाभावव्यापकोयोदंडसमभिव्याहाराभावः सदंडावयवेपीत्यन्ये। केचित्तु·कार्याभावव्यापकाभा
वप्रतियोगित्वमित्यत्रबहुव्रीहिसमासेनकार्याभावव्याप्याभावप्रतियोगित्वमित्यर्थः। कारणस्यकार्यव्यापक ३०५

त्वेन तदभावव्याप्यत्वोचित्यात्। एवं च चंद्रोदयसमुद्रवृद्ध्योः परस्परं कार्यकारणभावापत्तिरतस्तद्धारणा
य संपन्नावित्यपास्तं। नचैवं दोषतादवस्थ्यमितिवाच्यं। अग्निमत्क्षणाद्यस्य विवक्षितत्वात्। नहि तत्र तादृशा
ग्निमत्क्षणे समुद्रवृद्धिव्यतिरेकस्य चंद्रोदयव्यतिरेकेवासंभवति। आत्मादिहेतौ प्रमेयत्वप्रत्यासत्त्यादेव तज्ज्ञा
नीयत्वमादाय लक्षणगमनमन्यत्र पूर्ववद्रूपत्वमित्याहुः। नन्विदं कारणत्वमतीन्द्रियघटितसकलप्रत्यास
त्तिगर्भतया दुर्ग्रहं। प्रत्यक्षस्याप्रवृत्त्या साध्याप्रसिद्ध्याऽनुमानान्तरस्याप्रवृत्तेः। किंचानन्यथासिद्धत्वनियतपूर्वव
र्तित्वग्रहे आवश्यके तावन्मात्रमेव लक्षणमस्तु लाघवात्। अधिकांशस्य गुरवादित एवाग्रे तथैव लक्षणमित्यस
वेराह। अथवेति। यत्र कार्याभावव्याप्यताऽतरासहकारिविच्छिन्नात्तदवच्छिन्नं। कारणं तदवच्छिन्नत्वं कारणऽ

चिं०अ०म
२९
306

तियावत्। तेन यत्र दंडाभावत्वं घटाभाव इति दंडाभावत्वनिष्ठव्याप्तौ दंडाभावस्यैवावच्छेदकतयाऽजनक
दंडाभावादौ नातिव्याप्तिः। न वा बीजत्वस्य कार्याभावव्याप्यस्य जनकत्वाभावादसंभवस्तत्र दंडावसहकृत
त्वस्यानवच्छेदकत्वात् बीजत्वाद्यवच्छिन्नस्य जनकत्वाच्च। एवं चाग्रे बीजवीजत्वपदे बीजत्वत्वपरे इतराभावेन
इतराभावसहकृतत्वेनेत्यर्थः। शिलायां त्विति। शिलात्वेन शिलात्वत्वेनेत्यर्थः। ननु कार्याभावः तज्जनकत्वाभावो
वा तदभावमात्रं वा। आद्ये आत्माश्रयः। अन्त्ये शिलायामप्यंकुरस्य संयोगवृत्त्यायत्वेन तत्रापीतराभावावस
हकृतशिलात्वस्य कार्याभावव्याप्यत्वात्। किंच। घटकारणज्ञानादौ कार्याभावव्याप्यत्वं ज्ञानत्वादिनेवावच्छिन्न
भेद दंडाद्यभावसाहित्यस्य तत्र नीलधूमादिवदव्यर्थत्वादिति। अत्र वदन्ति। उत्पत्तिकालीनसंबंधावच्छिन्नकार्या २९

भावव्याप्यत्वं विवक्षितम्।संयोगादिवसंबंधस्योत्पत्त्यनन्तरकालीनसंबंधावच्छिन्नाकार्याभावव्याप्यतया
भावव्याप्यत्वं विवक्षितम्।संयोगादिवसंबंधस्योत्पत्त्यनन्तरकालीनसंबंधावच्छिन्नाकार्याभावव्याप्यतया तदवच्छिन्नां
तदवच्छिन्नाभावमादाय न शिलादौ व्याप्त्या।उत्पत्तिकालीनसंबंधो द्वयमेव कारणसमवायस्य तदवच्छिन्नां
राभावस्येतराभावावच्छिन्नः समवायिनि बीजादौ च द्वयं च कारणमेवा न चैवं कारणगर्भत्वेनात्माश्रयः संबंधत्वेन
वतत्रानादिति।अत्रेदं चिन्त्यम्।विषयविषयिभावसंबंधस्याप्युत्पत्तिकालीनतदवच्छिन्नकार्याभावव्याप्यत्व
स्येतराभावावच्छेद्यतया वह्न्यादेरनुमितिजनकत्वापत्तिः।चरमकारणे कार्याभावाभावादव्याप्तिश्चेति।वस्तुत
स्तु बीजादंकुर इति प्रतीतिबलादवध्यवधिमत्त्वा वलक्षणः स्वरूपसंबंधविशेष एव विलक्षणः कार्यकार
णयोस्तत्संबंधावच्छिन्नकार्याभावः कारणाभावेतराभावावच्छेदेन स्वरूपायोग्यवृत्तितादृशसंबंधत्वाभा

चि·अ·न·
३०७
३०१

वात्तद्वच्छिन्नकार्याभावस्यस्यासाधारणत्विलात्वादिधर्म्मावच्छेघः·एवंवतादृशसंबंधावच्छिन्नकार्याभा
वव्याप्यत्त्वंसाधारणधर्म्मेतरावच्छिन्नंतदवच्छिन्नंकारणमित्यत्रतात्पर्यमितिचरमकारणेवययपीतराभा
वानावच्छेदकः तथाप्युत्पादकालएवतथाउत्पादानन्तरमेवकार्योत्पादनतथाकार्याभावात्‌यद्वा·परामर्षा
देश्चरमकारणेपिप्रतिबंधकाभावविलंबेनकार्योत्पत्तिविलंबादितराभावोच्छिन्नत्वमेवायदिवक्तविन्नतथाव
त्वात्‌दातज्जातीयत्त्वंलक्षणंबोध्यमानन्वारणस्यदंडेतद्‌डत्वेनैवतदवच्छेदादिनैवतद्‌वच्छेदाव्याप्तिरितिबो
च्यांदंडत्वमादायलक्षणसत्त्वात्‌एवंचघटकारणज्ञानादावपितत्संबंधावच्छिन्नकार्याभावव्याप्यत्वंदंडाघभा
वावच्छेघमेवेतिनतत्राव्याप्तिरितिध्येयांननुदंडरूपादावतिप्रसंगइतिचेत्‌ानादंडात्वघटइतिवत्‌दंडरूपा ३०७

तद्घट इति प्रतीत्यस्वरेणतादृशसंबंधावच्छिन्नकार्याभावसंबंधस्य दंडरूपत्वेनैवावच्छेदात्। अतएव
न व्योमादावपि न घटकारणत्वप्रसंगः। अत्र च स्वभाव एव शरणं। एवं चानन्यथासिद्धत्वविशेषणीयमतो नोक्त
दोष इति कस्य विद्याख्यानमनादेयं। उक्तं वोपपन्नेरिति। अन्यासमवधानावच्छिन्नेति। अन्यासमवधाना
वच्छिन्नेति। अन्यासमवधानावच्छिन्नं कार्यानुत्पत्तिव्याप्यत्वं यस्य तदवच्छिन्नत्वं कारणत्वमित्यर्थः। उत्पत्तिनिग
र्भतया पूर्वस्मादभेदः। अत्रापि पूर्ववदुक्तसंबंधविशेषमादाय उत्पत्त्यभावव्याप्यत्वं बोध्यम्। उत्पत्तिश्च स्वस
मानकालीनपराचप्रतियोगिकध्वंसानाधारसमयसंबंधः ध्वंसत्वं च प्रागभावप्रतियोग्यभावत्वं प्रागभाव
त्वं च न प्रतियोगिजनकाभावत्वं येनान्योन्याश्रयः स्यात्। किं तु गंधानाधारसमयानाधारत्वं शेषं पूर्ववत्। अ

सि·अ·न·
३·८
३०४

नन्यथासिद्धेति। घटजातीयंप्रतिरासभजातीयमनन्यथासिद्धमितितत्रातिव्याप्तिरितिवारणाय नियतपू
र्वंनचनियतत्वंकालमपेक्ष्यदेशमपेक्ष्यरासभोपिगतत्वात्। घटादिपूर्वकालेरासभजातीयस्यनियम
नसत्वात्। नान्यःसाक्षात्संबंधेनादृष्टादेर्घटादिदेशमपेक्ष्यनियमात्। साक्षात्परंपरासाधारणसंबंध
मात्रापेक्षयारासभेपिघटादिदेशनियतत्वेनातिप्रसंगादिति। मैवं। साक्षात्परंपरासाधारणैकजातीयसं
बंधेनदेशनियतत्वस्यविवक्षितत्वात्। रासभादेरेकजातीयसंबंधेनघटादिदेशनियतत्वाभावात्। घ
टादावेकजातीयसंबंधेनादृष्टादेर्नियतत्वादितिवदन्ति। अत्रेदंचिंत्यं। कियत्सुघटेषुरासभस्याप्येकजाती
यसंबंधेनदेशनियतत्वादतिप्रसंगः। कार्यतावच्छेदकावच्छेदेनादृष्टाद्यपेक्षयात्वौ। ऽन्यगुणाघनेककार्येष ३·८

कज्जातीयमेवसंबंधाभावादिति। अङ्कुरितबीजसंग्रहायजातीयेतिजातिपदं च कार्यपूर्ववर्त्तितावच्छेदक
धर्म्मपरमतो नाकारणाद्येकवृत्तिकारणेऽव्याप्तिः पूर्ववृत्तित्वं च प्रागभावावच्छिन्नसमयवृत्तित्वं प्रागभाव
च्छिन्नविशेषणं। येन प्रागभावेऽव्याप्तिः स्यात् किन्तु तदुपलक्षितकालविशेषवृत्तित्वं तच्च तत्राप्यस्ति। कालस्य
स्थूलस्यैवाधिकरणतया हेतुत्वं तस्य च पूर्वक्षणवृत्तित्वमस्त्येवानन्यधिकरणालक्षणस्येति। न त्वव्याप्तिर्दोषः।
प्रागभावत्वं च न प्रतियोगिजनकाभावत्वं विनाश्यप्रागभावगर्भतयान्योन्याश्रयात्। उत्पत्तिगर्भतया च तन्नि
र्वचने उत्पत्तेः स्वसमानकालीनपदार्थप्रतियोगिकध्वंसानाधारसमयसंबंधरूपत्वे अन्योन्याश्रयात्।
किंतुगंधानाधारसमयानामाधाराभावत्वं। ननु ध्वंसमप्रागभावात्मनिघटादावव्याप्तिः। न च तदलक्ष्यमेवे

तिवाच्यं। न हि प्रागभावलक्षणमिह प्रकृतं। किन्तु कारणत्वलक्षणं तच्च सामान्यत एव लक्ष्यं। तथैवोपक्रमान्त
तथा च ध्वंसप्रागभावस्यालक्ष्यत्वे ध्वंसकारणसाधारणलक्षणं न स्यादिति चेत् न। अभावपदस्य भावाभावसा
धारणविरोधिपरत्वात्। यद्यप्येवं तद्वैयर्थ्यं न्यायवर्त्याभावात्। तथापि तत्प्रतियोगिकाभावलाभार्थमभाव
पदं न हि प्रागभावसामान्यगर्भं कारणत्वं· किन्तु तत्प्रतियोगिकप्रागभावावच्छिन्नसमयवृत्तित्वं तत्कारणत्वं
तथा च तादृशकालावृत्तितदभाववत्त्वप्रागभाव इति पर्यवस्यति। न चैतादृशसमयप्रसिद्धिः गंधध्वंसस्याधिक-
रणसमयवृत्तिकाद्यविलक्षमात्रवृत्तिजातित्वात्। न चैतत्त्वदित्यनुमानान्तरासिद्धेः। ननु सिद्धान्तगंधानाधा
रसमयः तथापि प्रागभावस्य तदनधिकरणत्वं कथं ग्राह्यं न हि तत्र प्रत्यक्षमागमो वा संभवति· अनुमानं च

संभवेत्तद्धीप्रसिद्ध्यन्तरं॰ तथा चानुमानप्रवृत्तौ प्रागभावत्वधीस्तस्यां चानुमानप्रवृत्तिरित्यन्योन्याश्रय
इति चेत्। न। तादृशसमयो नास्तीति निर्णयवतो मीमांसकस्य तद्विषयतातिबुद्धेर्निरुक्तातिरूपेण प्रागभावस्या
वच्छ्यं तद्बुद्धिविषयत्वात्तेन रूपेण तद्बुद्धिविषयत्वेनच्चोपस्थितस्य प्रागभावस्य लिंगाभासादिनापि तादृशस
मयवृत्तिनाधारानुमितिसंभवात्। गंधस्येव दृष्टान्तत्वात्। कदाचित्काभाववत्त्वेनैवोपस्थितस्य प्रागभावस्य त
दनुमानं ध्वंसांशे बाधादेवाननुमानात्। तादृशवतारे तदंशे भ्रमत्वेपि तु न्यत्रा वाद्येति। ननु गंधानाधारसम
यो नास्तीति निर्णयतो मीमांसकस्य पक्षसाधनालिंगककार्यताज्ञानादेव प्रवृत्तिदर्शनापत्तेस्तत्प्रागभाव
त्वगर्भकारणत्वं। किं चाकारणत्वबोधकत्वाद्यादिरवैवं महाप्रलयकाले प्रमाणं स्यात्तस्य तद्घटितत्वात्।

चि॰अ॰म॰
३१

310

तथाचतदनभ्युपगमोपिव्याहन्येतेतिचेत्।नागंधानाधारेत्यादिनानविपद्यतीतिनिर्व्वाहप्रयोजकत्वप्रा
गभावत्वस्योपलक्षणत्वात्।तएवमीमांसकंप्रतिजनकघटितस्यलिंगस्यनैयायिकेनोक्तावपिनान्यतरा
दसिद्ध्यादिदोषइतिवदन्ति।तच्चिंत्यम्।तस्यैवानुगतस्यानिर्वक्तुमशक्यत्वात्।नचाखंडत्वमेवप्रागभाव
त्वंतेनोपलक्षितमितिवाच्यम्।उपाधेरखंडायायाजात्यपलापापत्तेरिति।ज्ञातेभ्यानभ्युपगमात्।वस्तुतस्तु
नेदंकारणत्वंप्रवृत्त्यनुकूलत्वं।तथावच्चमतेनल[illegible]तावच्छेदकतयाकारणपदप्रवृत्तितयावानिरुक्तमाय
स्मिन्सतीत्यादिनानिरुक्तम्।इदमसाधारणंतत्साध्यकेज्ञानमेवप्रवर्त्तकं।तदेवचविधेयार्थः।अन्यथाप्रागभा
वस्यप्रागभावाभावेनतत्सर्वविर्नित्याभावेनतच्छेदितजनकत्वाभावात्।दुष्प्रागभावाख्यितयाप्रायश्चित्ता ३१

दोषवृत्त्यभावापत्तेरित्यादि विधौ वक्ष्यते। नोक्तदोषः एतेन गंधानाधारगर्भवन्नीलानाधारगर्भतयापि त
न्निर्वचनाघटकज्ञगर्भकारणत्वमपि तन्निघ्ने तद्विनिगमकाभावादुभयगर्भेणज्ञानप्रवर्त्तकतायां प्रवृत्तेनानुग
मत्वापास्तम्। निरुक्तस्य प्रवर्त्तकत्वात्तेनाभ्युपगमात्। यत्तु आकाशपदात्कदाचिच्छब्दाश्रयत्वेन कदाचिद्दृष्टद्र
व्यातिरिक्तद्रव्यत्वेनेतिवत्। कदाचिन्नीलाघनाधारत्वेपि समयविशेषोपलक्षणान्नकापिक्षतिः। समयवि
शेषवत्त्वस्याभावावच्छिन्नसमयवत्त्वस्यैव हेतुतया न प्रवृत्तेरननुगम इति निरुक्तमेव। प्रवृत्त्यनुमितिरूपत्वमि
तितच्छिन्नसमयानभ्युपगमच्चेत ज्ञानं विनैवान्यज्ञानादेव प्रवृत्त्यननुगमस्यैवमप्यपरिहाराच्चाय
च्छिन्नप्रवृत्त्यनुपपत्तेश्च। अत एव तत्समयाघटितस्यानुगतस्य भागमात्रतस्य निर्वक्तुं शक्यत्वेपि नाश्यप्रवृत्त्य

नुकूलत्वमिति ध्येयम्। यत्तु गंधानाधारसमयस्य महाप्रलयकालत्वे मानाभावः युगपन्नाशे मानाभा
वः तथा च याऽवधिनाशानन्तरमपि वस्त्वन्तरसंभावनया तत्प्रागभावस्य गंधानाधारसमयानाधारत्वासंभवेन
तत्कारणेतरभिन्नकारणलक्षणव्याप्तिसंदेहः एवं च व्यर्थविशेषतासंदेहात्तत्कारणाय विशेषणमपादेय
मिति। तन्ना। याऽवधिनाशोस्य दृष्टाभावात्। अन्यथा संयोगविभागयोरन्योन्यनाश्यतयान्यतरावस्थितौ स
र्वमुक्त्यनुपपत्तेः। तथा च सर्वादृष्टाभावादेव कार्याभावो वाच्य इति युगपदेव सर्वनाश इत्याहुः। न चाकाशा
दरवृत्तितया पूर्वकालवृत्तित्वाभावाद्व्याप्तिरिति वाच्यं। वर्त्तिपदेन समवधानस्योक्तत्वात्। वस्तुतः कालस्य ज
गदाधारतया तत्रापि तद्वृत्तिः। ननु द्रव्यत्वेन रूपेण दंडरासभादेर्नियतपूर्ववर्त्तित्वसत्त्वात्कारणत्वं स्यादिति

चतानातेनरूपेणतस्यान्यथासिद्धर्वाच्यत्वात्। सामग्रीवनकारणंदृणविशेषत्वात्कालोपाधेश्चाधिक
रणत्वेनैवहेतुत्वात्। नचकारणमेकरूपायांतस्यामतिप्रसंगः। दंडादीनांकारणत्वस्येष्टत्वान्मूलकस्याति
रिक्तस्यानभ्युपगमात्। अभ्युपगमेवादंडरूपवदन्यथासिद्धत्वात्। परस्परजत्वासन्निरूपस्येष्टत्वात्। परके
चित्तुस्वरूपसंबंधविशेषःकारणताप्रतियोगित्वादिवत्तत्परिचायकएवायंधर्मविशेषउक्तइत्याहुः। ननु
कारणत्वादन्येनरूपेणासिद्धभावानन्यथासिद्धत्वमित्याश्रयः। सिद्धिपदस्योत्पत्तिपरतायांनित्यमात्रेतिव्या
प्तिः। ज्ञप्तिपरत्वेसंभवः। हेतोरपिप्रमेयत्वादिनाज्ञप्तिरितितयोर्गिकार्थमपहायरूढमन्यथासिद्धिपदार्थ
माह। अन्यथेतिअयचपिस्मुक्तोमांजलिप्रकाशोपंचधान्यथासिद्धिरुक्तातथाप्यवच्छेदकजनकजनकयो

कि॰अ॰म॰
३१२
दंड
312

रत्रैवप्रवेशान्नतत्संग्रहायकोऽपेरद्वयमुक्तम्। अतएवकुसुमांजलिमकरंदेपितृव्यैर्विभावितमस्मा
त्तिरिति। यत्नसहैवेति। तेनतदन्यथासिद्धमितिशेषः। ननुशब्दादिनांपूर्ववर्त्तित्वग्रहंविनापितद्रूपपूर्ववर्त्तित्वा
ग्रहसंभवान्नियमासिद्धः। नचप्रत्यक्षेतिविशेषणीयंअतोनान्यथासिद्धव्याप्तिः। एवंनियमशब्दाविवक्षायां
दंडरूपत्वेवदंडस्यान्यथासिद्धापत्तेरितिवेत्ता। रूपत्वमादायातिप्रसक्तत्वाद्दंडरूपत्वेनैवपूर्ववर्त्तित्व
ग्रहोवाच्यः तच्चवसाहितस्यनियमात्। नचैवंद्रव्यत्वादेरतिप्रसक्तत्वाद्दंडत्वेनैवदंडस्यपूर्ववर्त्तित्वग्र
हादन्यथासिद्धिरस्त्वितिवाच्यंयेनसहपृथगन्वयव्यतिरेकवत्तासहैतत्पर्यात्। अत्रापिपृथगन्वयादिमतइत्यपिय
स्येतिविशेषणंदेयंतेनदंडेनदंडसंयोगस्यनान्यथासिद्धिः। एतद्विशेषणमहिम्नैवयच्चोऽनयरूपविशेष ३१२

णावच्छेदेनैवान्वयाद्यनुविधानं तत्रैकेननापरस्यान्यथासिद्धिः। यथोक्तरूपतेजसोरित्येको। यत्रोभयवि
शेषणावच्छेदेनैवान्वयाद्यनुविधानं तदवच्छिन्नत्वेन विशेषणान्तरादृश्यस्थलेतिप्रसंग इत्यन्ये। ॐ नकारपि
ताप्यत्रैवान्तर्भवति ॐ नकारत्वेन तदनन्यथासिद्धत्वस्येष्टत्वात् ॐ नकारपिंडत्वेनैवान्यथासिद्धत्वं वाच्यं।
तत्र च तत्साहित्यनियमात् तान्न्वेवमुक्ततरूपतेजसारिव दृष्टचदंडत्वयोरपि नैकेनापरस्यान्यथासिद्धिः स्यात्।
उभयोरुभयविशेषणावच्छेदेनैवान्वयाद्यनुविधानात् तान्नवदृष्टत्वचक्रत्वमिश्रजनकत्वस्यान्वयाद्यनु
विधानमिति तु भयोरुभयविशेषणाद्यवच्छेदेनैवान्वयाद्यनुविधानमिति नैकेनापरस्यान्यथासिद्धिः स्यात्।
अपि च ॐ नकारपिंडत्वेनान्यथासिद्धस्यापि ॐ नकारत्वेन दंडरूपत्वेनान्यथासिद्धस्यापि रूपत्वादिना

वि॰ अ॰ न॰ ३१३

313

नन्यथासिद्धत्वमस्तु। ननु तदतिप्रसक्तमिति चेत्। तत्किमतिप्रसक्तत्वमप्यपरान्यथासिद्धिः तथा चानन्य
थासिद्धत्वनियतपूर्ववर्त्तित्वयोः प्रतिरूपे किं तेन। किं च फलानुपहितवृत्तित्वस्यातिप्रसक्तस्य दंडादिसाधा
रणत्वात्। अतो हेत्वाभस्य चाशावाहानचाफलानुपहितनित्यवृत्तित्वस्य तथात्वं। रूपत्वेन नित्यरूपस्यापि घटजनक
त्वाविरोधात्। तादृक्रूपयोः प्रतिरूपात्। अन्यरूपत्वेन वा हेतुत्वमस्तु। न च तेन रूपेणान्यत्र क्लृप्तत्वत्रां तद्व
तीति वाच्यं। तर्हि दंडरूपत्वेनापि तथास्तु किमुक्तान्यथासिद्धेति चिन्त्यम्। अन्यं प्रतीति। ननु शब्दोऽष्टद्व्यातिरि
क्तद्व्याश्रितः। अष्टद्व्यानाश्रितत्वे सति गुणत्वादित्यनेनाकाशासिद्धौ शब्दपूर्ववर्त्तितामज्ञात्वापि तेनादिकं
प्रतितस्यपूर्ववर्त्तित्वं ज्ञायत एवेति चेत्। न। तेनापि विपक्षबाधकतया शब्दकारणतामुपजीव्यैवाकाशा ३१३

सिद्धरित्याहुः। नचैवं संयोगादिकमपि प्रत्याकाशस्यान्यथासिद्धत्वप्रसंगः। आकाशत्वेनेष्टत्वात्।
द्रव्यत्वेन शब्दपूर्ववर्त्तित्वमज्ञात्वापि तत्पूर्ववर्त्तित्वग्रहात्। नच्चैवं योगादेरपूर्वेन्यथासिद्ध्यापत्तिः। स्व
र्गप्रतिपूर्ववर्त्तित्वेज्ञानेऽएव तस्यान्यं प्रतिनत्क्रहादितिवेत्। न। साक्षादितिपूर्ववर्त्तित्वविशेषणादित्या
हुः। तत्पूर्ववर्त्तित्वानुपपादकं यस्य पूर्ववर्त्तित्वं गृह्यत इत्यर्थादित्येके। नत्र परत्वादिपूर्ववर्त्तित्वग्रहा
नंतरं अन्यकार्यदिक्कालयोरुक्तहेतुत्वन्यथासिद्धिः तत्क्रहं विनाप्यधिकरणत्वेन कार्यमात्रपूर्ववर्त्तित्वग्र
हात्। कुंभकारपितुरप्येवान्यथाभावः। ननु कुंभकारपितृत्वेन तथात्वेपि वेत्रत्वादिना तस्यानन्यथासिद्धिरि
तिचेत्। न। तेनापिरूपेण कुंभकारजनकत्वं ज्ञात्वैव तस्य घटं प्रत्यन्वयादिग्रहात्तदानीं तस्मिन्नद्वातस्या

वि॰अ॰भ॰
३१५
314

सत्त्वान्नियमेनाकाशकारकारैरेव घटनियतपूर्ववर्त्तित्वग्रहादिति। न च यं प्रति पूर्ववर्त्तित्वे ज्ञात एवेत्य
न्वयिकेन केनचित्सर्वेण वा। नाद्यः। दण्डादावतिप्रसंगात्। नान्त्यः। शब्दनित्यत्वानित्यत्वसंदेहेपि शब्दका
रणतामनुपश्यन्ती व्याख्या शब्दाश्रयत्वेनाकाशासिद्धौ ज्ञानादिपूर्ववर्त्तित्वग्रहसंभवान्निरुपाधित्वादेरपि विप
र्ययबाधकत्वसंभवात्। वस्तुतः शब्दनित्यत्वनिर्णयवतो मीमांसकस्यान्तस्पूर्ववर्त्तित्वमज्ञात्वैव ज्ञानादिपू
र्ववर्त्तित्वग्रह इति नियमासिद्धिः। किं च द्रव्यत्वेनैवाकाशस्य संयोग इव ज्ञानादौ हेतुत्वमस्तु। न च ग्राहका
भावेन तेन रूपेणानियतपूर्ववर्त्तित्वाग्रह इति वाच्यं ग्राह्यसत्त्वे ग्राहकाभावासंभवात्। न च तेन रूपेणा
ज्ञानन्तर्भवतीति वाच्यम्। तथा सत्याकाशत्वेनापि तथात्वोपपत्तेः। अपि चैवं शब्दसाक्षात्कारं प्रत्यपि तस्या ३१५

न्यथासिद्ध्यापत्तेः। न च शब्दस्य पूर्ववर्त्तितामज्ञात्वापीन्द्रियत्वेन तस्य पूर्ववर्त्तित्वग्रहः इति वाच्यं। श्रोत्रत्वेन तथाप्य
न्यथासिद्ध्यापत्तेः। तस्याकाशाघटितत्वात्। आकाशस्य च शब्दपूर्ववर्त्तित्वग्रहं विनासिद्धेरनभ्युपगमात्। अ
न्यथाज्ञानेपि तस्यान्यथासिद्धत्वं न स्यात्। एवं च पांचभौतिकशरीरं प्रत्यपि तदन्यथासिद्धम्। किं चेश्वरज्ञाना
देः क्षितिपूर्ववर्त्तित्वेज्ञाते एव घटपूर्ववर्त्तित्वग्रहात्तेनाप्यन्यथापत्तेः। न च कार्यमात्रे कर्त्तृमात्रस्यैव पौर्वा
पर्यग्रहात्तेनैवमिति वाच्यं। प्रकृतेपि कार्यमात्रे विभुमात्रस्यैकदैव पौर्वापर्यग्रहस्य सुग्रहत्वादिभिः संभवाद
न्यथासिद्धतावापत्तेः। विभुत्वेन पूर्ववर्त्तित्वमात्रं गृह्यते न तु जनकत्वमिति चेन्न। ततः किं न हि जनकत्वग
र्भप्रकृतानन्यथासिद्धिः। आत्माश्रयापत्तेः। यत्त्वन्यमित्यस्यायमर्थः। तेनयं प्रति पूर्ववर्त्तित्वेग्रहात्तत एव तत्

वि॰ अ॰ म॰
३२५
315

र्थः। न च क्लृप्तत्वादिति तथा। अन्यत्र पूर्ववर्त्तित्वग्रहणेऽपि तत्संभवेन नियमाभावात्। अत एव न परत्वादिना दि
क्कालयोरन्यथासिद्धिरिति। तन्न। प्रकृतेऽप्यन्यथासिद्ध्यभावापत्तेः। शब्दस्यापि वर्णध्वनिभेदेन नानात्वात्।
अन्यतरपूर्ववर्त्तित्वग्रहणेऽपि संभवेन नियमाभावात्। न च शब्दत्ववदत्राप्यनुगतपदतावच्छेदकस्या
न्यतमत्वादेः संभवादिति। अन्यत्रेति। एतच्च प्रायिकमवश्यकल्प्यं यद्यत्पूर्ववर्त्ति तत्समवधाननियत
त्वं तत्त्वमित्यत्र तात्पर्यात्। तेन गुणेन दोषाभावस्य महत्त्वेनानेकद्रव्यवत्त्वस्यान्येषां च गुरूणां पदार्थानामन्य
थासिद्धिर्भवति। अत एव पंचम्या हेतुत्वाभिधाने आत्माश्रय इत्यपास्तं। पूर्ववर्त्तिन इत्यत्राऽवधौ पंचमीत्य
न्या। अत एव रासभादेरपि यथाश्रुतान्यथासिद्धत्वाभावेनान्यथासिद्धपदेनैव तद्धारणे नियतपदं व्यर्थ ३२५

मित्यपास्तं। निरुक्तस्य रासभेपि सत्त्वात्। नन्वेवं दंडरूपाकाशादेरप्यैवं नश्रीवेतत्संग्राहकान्यथा
सिद्धेरानर्थक्यं। किंचावश्यकल्प्यत्वनियतपूर्ववर्त्तित्वमात्रेण कारणतया वा। नाद्यः। गंधं प्रतिरूपविशे
षप्रागभावस्यापि तथात्वेन तन्न गंधप्रागभावान्यथासिद्ध्यापत्तेः। न द्वितीयः। आत्माश्रयापत्तेः। अपि च स रू
कादीनां परस्परान्यथासिद्ध्यापत्तेः। द्वयोरप्यवश्यकल्प्यलघुनियतपूर्ववर्त्तित्वेन तत्समधाननियतत्वात्।
न च दृष्टप्रागन्वयाद्यननुविधायित्वे सतीत्यपि विशेषणमात् तद्विदृष्टप्रागन्वयादिग्रहाविषयत्वं समनियतत्वं वा।
नाद्यः। रूपप्रागभावस्यापि शब्दादिना दृशाग्रहविषयत्वेनातथात्वापत्तेः। नान्त्यः। आलोकतद्रूपादेरी
श्वरज्ञानादेश्चैवमपि परस्परान्यथासिद्ध्यापत्तेः। एतेनावश्यकल्प्यपूर्ववर्त्तिन एव कार्यसंभवे तन्नियत

चिं·अ·म·
३१६
316

सहकृतत्वमित्यर्थः। पंचमीचावधित्वेन हेतुतायामित्यपास्तमिति। ननु येन सहैवेत्यन्यथासिद्धिर्यागपा
त्यत आह यागेति। अपूर्वानुपस्थितावपि विधिना यागकारणत्वबोधनात्। ननु तेन सहेत्यर्थः। तदेवाह नत्व
वगम्यमान इति। नन्वेवमपूर्वेण यागवत्कुलालपिताप्यन्यथासिद्धो न स्यादित्यत आह यत्रेति। कुलालं प्र
ति पूर्ववर्त्तित्वे ज्ञात एव घटं प्रति कुलालपितृत्वेन पूर्ववर्त्तित्वग्रहात्तेन सोन्यथासिद्ध इत्यर्थः। नन्वेवं कु
लालपितृवद्यागोप्यन्यथासिद्धः स्यादित्यत आह यत्र चेति। पूर्वोक्तरीत्या तत्रोक्तान्यथासिद्धेरभावा
दिति भावः। नन्वेवं चक्रभ्रमणेन दंडसंयोगस्यापि कुलालपितृवदन्यथासिद्धिः स्यादित्यत आह दंडेति।
तत्र द्वयोरपि समवधानसंभवेन स्वातंत्र्येणापि नियतपूर्ववर्त्तिताग्रहसंभवेनान्यं प्रति पूर्ववर्त्तित्वे ज्ञात ३१६

एवेत्यवधारणासंभवादिति भावः। स्वस्वेति। स्वं कारणत्वेनाभिमतं दंडादि तदनन्तरोत्पत्तिकं तत्संयो
गादिवदितरसकलसमवधाने सतीत्यर्थः। कश्चित्तु स्वस्यानंतरोत्पत्तिकसकलसमवधाने सतीति पाठः। त
त्र स्वपदं रूपपरं। ईश्वरेति। एतच्चोपलक्षणं यस्याभावादिति पंचम्या हेतुत्वार्थत्वात्तन्मात्रस्य यः यत्रावनि
यतः कार्याभाव इति विवक्षायां च स्वसत्वे तस्यानन्तरोत्पत्तिकव्यतिरेकेण यत्र कार्याभावस्तत्र व्यभिचारः।
द्वितीयपाठे दंडानंतरोत्पत्तिकचरमकारणसमवधाने चक्राद्यभावात्कार्याभावाप्रतीतिसिद्धिस्तत्राव्या
प्तिः। उक्तानन्यथासिद्धत्वस्यैव कारणतारूपतासंभवे च शेषवैयर्थ्यमुभयत्रेत्यपि द्रष्टव्यम्। बाधकाभा
वेनेति। यद्यप्येकत्र लघुगुरुत्वविषयतासंभवे लाघवं सहकारि अन्यथा मानांतरेण लाघवावतार

संज्ञवेगुरुमात्रस्यासिद्धिप्रसंगात्तथापियत्रैकसिद्धिरपरसिद्धिविरोधिनातत्रैवलाघवावतारस्यगुरु
सिद्धिप्रतिबंधकत्वमित्याहुः॥ ॥ननुनिःश्रेयसानुकूलतयाप्रमाणतत्वविवेचनमत्रप्रतिज्ञातंनचा
नुमानस्यतद्धेहेतुत्वेमानमित्यतआह परमेति। वक्ष्यर्थिप्रवृत्त्यादिकमपितत्प्रयोजनमतःपरमित्युक्तं।
यद्यपिश्रुतिर्नसाक्षादपवर्गहेतुतामाह तथापिदुःखेनात्यन्तंविमुक्तश्चरतीत्याद्यनुवादसमभिव्याहृ
तातथात्वेनबोद्धव्या। यद्यपिमन्तव्यइत्येवप्रवृत्तोपयोगितथापिपरज्ञानान्नावेमननासंभवतिश्रोतव्य
इत्युक्तं। तस्यचात्मविनाशिनोद्वारकांक्षायांनिदिध्यासितव्यइत्याद्युक्तं। यद्यपिद्रष्टव्यःश्रोतव्योमंतव्यो
निदिध्यासितव्यइत्याकारिकाश्रुतिस्तथाप्यग्निहोत्रंजुहोतिप्रयागंरूपवतीतिवदृष्टद्वारकताकल्पना ३१७

छाद्युक्रमातिक्रमणं। अनेनार्थक्रमोपादानेपर्यवसितार्थतया साक्षात्कर्त्तव्य इति व्यत्ययेन व्युत्क्रमेण वनि
र्दिश्यते इति बोध्यम्। ननु दुःखेनात्यन्तविमुक्त इत्यादिना दुःखात्यन्ताभावो परग्यं येन स्मर्यते तस्य च सिद्धत्वा
न्नानुमानप्रयोजनत्वमित्यत आह स चेति। तथा च तदसहवृत्तित्वमेव वस्तुतात्यन्तिकत्वमिति भावः। इद
नीतनदुःखध्वंसातिव्याप्तिवारणाय दुःखप्रागभावासहवृत्तित्वं ध्वंसविशेषणं। दुःखप्रागभावासमान
कालत्वर्थः। संसारिदुःखप्रागभावसमानकालतया शुकादिमुक्त्यव्याप्तेराह समानाधिकरणेति प्रागभाव
विशेषणम्। स्वसमानाधिकरणेत्यर्थः। संयोगादिप्रागभावसमानकालतया दोषतादवस्थ्यादाद्यदुःखप्र
तेदपदं। एतच्चैकविंशतिदुःखप्रभेदपरं। अतस्त्वचरमभोगरूपदुःखप्रागभावसमानकालदेशतयाऽसं

चि·अ·म·
३१८
318

न्तवबारकत्वात्। केचित्तु दुःखप्रागभावासहवृत्तित्वं दुःखविशेषणमतो नोपान्त्यदुःखध्वंसे तिव्याप्तिरि
त्याहुः। रूपध्वंसादावतिव्याप्तेराह। चरमदुःखपदं। न च तत्र समानाधिकरणदुःखप्रागभावाप्रसिद्धेर
प्रसंगः। विषयत्वेरूपादेरपि दुःखत्वात्ताननुदुःखांतमुक्तावतिव्याप्तिः। तेन नराः सुखमन्त्यवदिति श्रुतेर्मर
णस्य दुःखव्याप्तत्वासंभवात्। न च तत्र सुखपूर्वकालीनदुःखध्वंस एव मुक्तिः। तत्राप्युक्तलक्षणातिव्याप्तेः।
तत्सुखज्ञानस्यापि दुःखतया तत्प्रागभावसमानदेशत्वान्मुक्तस्य सुखोत्पत्त्यसंभवाच्चेति चेत्। न। तेन नरा इत्यादि
श्रुतेरन्यापेक्षया मरणोत्तरदुःखाभाव इत्यत्र तात्पर्यात्। तथानुपपत्तिं विना न मुख्यार्थत्याग इति वाच्यं। दुःखविशेषहे
त्ववयवादिपीडनसत्वे दुःखोत्पादस्यावश्यकत्वात्। ताननुमरण दुःखं मे माभूदिति कामनया प्रयागे स्नातो य ३१८

त्रमतस्तत्रकागतिरितिचेत्ताना। तत्रहिमैकोनैवबाधिता। यत्रचमुक्तौदुःखंनवर्त्तितिकामनयास्नातस्तत्र
कागतिः। यदिचकारणबाधात्तत्रदुःखंबाधितमितिकामनाबाधस्तदादुःखसामग्रीसत्वेतदभावोपिवाधि
तइतितुल्यं। नचयेनायत्रसकलंदुःखमुपभुज्यसुखंभुक्तंतन्मुक्तावव्याप्तिः। तत्रापिशरीरनाशसमयेव
च्चयंदुःखोत्पत्तेः। नचभोगकादृष्टंविनाकथंदुःखोत्पत्तिरितिवाच्यं। अदृष्टांतरस्यभोगनदृशात्वेप्यवक्ष्या
त्पत्स्यमानमरणदुःखभोगकादृष्टस्यसत्वात्तानचैवमीश्वरस्यापिशरीरत्यागकालेदुःखोत्पत्तिःस्यादिवा
च्यम्। अदृष्टादिकारणबाधेनबाधादितिसंक्षेपः। असौदुःखध्वंसोनयुक्तःतस्यातीतादावभावेसविक
ल्पकासंभवादितिध्येयम्। हेत्वादावप्यतीतादिविकल्पदोषसत्वेवाहतदिति। मिथ्याज्ञानेप्यतीतादिविक

त्वसंभवाद्दृहसवासनेति। तथा चानागतस्याभाववर्त्तमानस्यायत्ननिवर्त्त्यत्वेन तद्वासनैव निवर्त्त्यत इति भा
वः। ननु वासनापि मिथ्याज्ञानमुत्पाद्य प्रवृत्तिद्वारा मुक्तिविरोधिनी न स्वतः। तथा च मिथ्याज्ञानप्रागभावाभा
वे तदसंभवात्तत्सत्त्वेपि न क्षतिरिति तन्निवर्त्त्यत्वे किं तत्त्वज्ञानेनानवतत्सत्त्वेऽशेषगुणोच्छेदलक्षणो न मोक्ष
इति वाच्यं। चरममुक्तेरिव तस्यापि कालाद्धिनाशासंभवादिति चेत्। न। अन्वयव्यतिरेकाभ्यां चरमदुःखध्वं
संप्रति तत्त्वज्ञानहेतुत्वमित्यस्य स्फुरत्त्वात्। तत्त्वज्ञानं कार्यव्यूहाभावेत्त्वनंतकर्मक्षयानुपपत्तेः। न चाप्येकत्व
विरोधितया तेनैव तद्वासनानिवर्त्तत इत्याशयात्। तादृशदुःखध्वंसश्च तत्त्वज्ञानोत्पाद्य इति समतः स्या
द्मुक्तावितिदुःखध्वंस एवेति। लाघवादित्यभिमानः। मितितानामिति। एकदा तावद्दुःखानुत्पादनतद्ध्वं ३१९

सस्यतत्वज्ञानासाध्यत्वादित्यर्थः।ननुतन्मेलकःसाध्यःस्यादित्यतआह मेकेलस्येति।तस्यमूलंकिंदुः
दुःखध्वंसानतिरिक्तत्वेतावतामुक्तेरत्याऽसाध्यत्वेयत्किंचिद्दुःखध्वंसोमुक्तिरित्यस्मदादिर्मुक्तःस्यादि
त्यर्थः।चरमदुःखध्वंसघटितस्तोमस्यमुक्तित्वेलाघवात्सएवमुक्तिरितिध्येयम्।मास्मूलतएवेति।तत्रमि
लितानामसाध्यत्वेपितत्पदवाच्यत्वेदोषाभावादितिभावः।जनकत्वस्यास्वरूपयोग्यत्वस्या।अपुरुषा
र्थत्वादिति।यद्यपिप्रथमपक्षेनायंदोषःतथापितस्यसंस्कारात्कालाद्वाविनाशइतिवार्त्तिकप्रदर्शने
नासंभवः।स्वरूपयोग्यताविवक्षायांसुतरामितिद्रूषणेतात्पर्यं।प्रयोजनकत्वादिति।मुक्तिप्रयोजन
कत्वादित्यर्थः।तथाचदुःखध्वंसस्यस्वतःपुरुषार्थत्वाभावान्नमोक्षत्वमितिभावः।अतोसत्यामिति।एत

श्रुतिपंचितं प्रत्यद्रव्यप्रकाशो। अग्निमद्रूण इति। तच्च प्रागभावेपीति भावः। नन्विति। तथा च स्वतः पुरुषा
र्थत्वकल्पनात्स एव मोक्ष इति भावः। फलोपहितसाधनताशां पुरुषार्थत्वं मोक्षमन्यमानो दूषयति अ
घेति। तथा च तस्य त्वास्यत्वविवादो युक्त एवेति भावः। किंतु पापोत्तरमिति। नन्वेवं काशीमृतस्य कृतप्रा
णांतिकप्रायश्चित्तस्य कथं मुक्तिः। नच तत्र पापांतरोत्पत्तिः। काशीमरणेनोत्पन्नतत्त्वज्ञानस्य दोषा
भावेन तदुत्पत्तेरसंभवादिति चेत्। अत्र वदन्ति। तत्र दुःखप्रागभावो नास्त्येव फलसंदेहपर्यवसि
ततत्संदेहाच्च प्रायश्चित्तप्रवृत्त्युपपत्तेः। तत्र तस्याः किंचित्करत्वेपि न कापि क्षतिः। नच निःफलत्वेन तद्बा
धकवेदप्रामाण्यं। सति दुःखप्रागभावे तस्य तथाजनकत्वमिति वदतां तात्पर्यात्सातिदोषनिषिद्धकर्मणः ३२०

पापजनकत्ववत्सतिविघ्नेमंगलस्य तद्ध्वंसजनकत्ववच्चेतिपापादिजननेदोषादेः सहकारित्वमिति
निषिद्धकर्मादेः सांगत्वाभावान्निःफलत्वेपिनतद्बोधकवेदप्रामाण्यं। इत्थंमंगस्यप्रायश्चित्तस्यनिःफ
लत्वेनतद्बोधकवेदप्रामाण्यंस्यादेवानहिदुःखप्रागभावफलेदुःखप्रागभावस्यापिसहकारित्वंयेन
तदभावेप्रायश्चित्तस्यसांगत्वंनस्यादिति। वयंतुब्रूमः। तत्रदुःखप्रागभावोनास्त्येवकाशीमरणस्येवतत्र
मनत्वात्। प्रवृत्तिश्चतद्भ्रमात्संशयाद्वा। नचैवंतद्बोधकवेदप्रामाण्यं। नचात्रतदस्ति। तत्रापिप्रायश्चि
त्तेनपापस्यनाशितत्वात्। अतएवप्रायश्चित्तेपापध्वंसकामएवाधिकारः नतुदुःखानुत्पादका
मनात्। तस्यास्तत्फलत्वात्। नचैवंदुःखानुत्पादएवस्वतःपुरुषार्थःतथाचतदर्थतयापापध्वंस

वि.अ.न. स्तत्रगौणंप्रयोजनंनतुमुख्यमितिनसमोऽङ्गइतितदर्थः।तदिदमुक्तंतस्यदुःखानुत्पादरूपत्वे
३२१ नपुरुषार्थत्वादिति।नप्रायश्चित्तस्यपापध्वंसःफलंतत्फलंचस्वतःपुरुषार्थोदुःखानुत्पादः।न
३२१ दिदंवक्ष्यति।नचप्रायश्चित्तस्यदुरितोत्पत्तिनिमित्तकत्वंपापनाशफलश्रवणादिति।नचपरमपुरुषा
र्थानिष्पत्तौवेदबोधितफलंजनयतोनिःफलत्वंतथात्वेविघ्नध्वंसंसमाप्तिंवाजनितवतोमंगलस्यज
त्साध्यस्यतःपुरुषार्थसुखाद्यनुत्पत्तौवेदवन्निःफलत्वापत्तेः।तस्मात्स्वागमाद्वासत्वेपितत्त्वनिःफलमिति
नतद्बाधकवेदप्रामाण्यमिति।अस्तुवानतत्रदुःखप्रागभावःपूर्वजन्मोत्पन्नंपापान्तरमासाद्य
कायव्यूहद्वारायांतनदुःखजननेमाद्दोत्पत्तेः।नहितज्जन्मकृतान्येवकर्माणितदाभुज्यंतइतिनियं ३२१

मः। तस्मा घदिनस्सत्वं तदा पापांतरभावरूपकं। अन्यथा तस्सत्वे भानानाभाव एव। प्रवृत्तिस्तु प्र
र्वशात्स्यैवेति। यत्तु प्रतियोगिजनकत्वेन प्रतियोगिनाशरूपत्वेन वेत्यर्थ इति। तन्न। तन्नाशरूपत्वं हि तज्जन्य
नाशप्रतियोगिध्वंसस्य प्रागभावनाशः प्रतियोगिजन्योऽन्ये द तदनुपपत्तेरिति। यायश्चित्तस्य चेति।
तत्प्रयोजनत्वर्थः कत्वं जः करंजन्या इति प्रसिद्धः। पद्ध्विचिशेष इत्याहुः। शुष्कमांसमित्यपरे। तथापि
तुल्यायव्ययत्वं न समाहितमित्युपसंहरति तस्मादिति। तथा च विवेकिनं प्रति न तुल्यायव्ययत्वमि
ति भावः। अन्यथा मुमुक्षुप्रवृत्त्यभावे सुखमपि पुरुषार्थो न स्यादिति भावः। नन्वस्तु तज्ज्ञानमित्यत आ
ह नचेति। परिहाराघस्ताबादिति भावः। पुरुषार्थत्व इति। निरूपधीछाविषयत्वेस्य तथाप्यनपायादि

वि॰अ॰न॰ ३२२

322

तिभावः। अनागतेति। योगजधर्मबलादिति भावः। मुक्तिलक्षणस्येति। पूर्वोक्तस्येत्यर्थः। अशेषविशे

षगुणोच्छेदस्य लक्षणमिति भावः। दुःखत्वव्यभिचारात्सत्यकमिति न सिध्यदित्याशयेन सर्वमुक्ति

साधयन्नाह दुःखत्वं चेति। आश्रयत्वावच्छिन्नासमानकालीनेत्यर्थः। ऽव्यत्वादौ व्यभिचारादाह मात्रेति।

यद्यपि ध्वंसत्वे व्यभिचारः स्वप्रागभावकर्मविवक्षया परिहर्तुं शक्यते तथापि यथाश्रुते ऽपरितुष्यन्नाह

संततित्वादिति। नन्वत्रापि दोषतादवस्थ्यमत आह संततित्वं चेति। नानाकालः पूर्वोत्तरकालः। ध्वंसवन्ना

त्तरकालः तस्यानन्तत्वात्। तथा च ध्वंसप्रतिकार्यमात्रवृत्तित्वादित्यत्र तात्पर्यं। एवमिति। तथा च नज्ञानत्वा

दिः पदत्वं कार्यमात्रवृत्तित्वमसिद्धमिति वाच्यं। जन्यज्ञानत्वादेः पदत्वात्। संततमुच्छेद इति। एवं चोपा ३२२

धिध्वंकापिप्रमुक्ता।रात्रीति।यथायएतारात्रीरधीयान्नस्यपितरोघृतकुल्यामधुदूरंतीत्यनुवादा=
पनात्तंफलंतथात्रापीत्यर्थः।नन्वशरीरमिति।यद्यपितत्त्वज्ञानवतोपिभोगार्थंशरीरित्वंतथापिदोषानुब
न्धाशरीरान्नभवतीत्यर्थः।तत्त्वज्ञानसिद्ध्यर्थमाह इत्युपक्रम्येति।तेनेति।नन्वेवमपिखंडप्रलयकालमाप्ता
यान्यथासिद्धिरितिवाच्यं।मुक्तिप्रकरणोक्तंतत्त्वेनतत्परत्वादित्याहुः।ननुयडंतत्त्वेवावसतमितिस्यात्
नास्यमत्ताछिन्द्विरितिनुम्निषधात्।तथाचवावेतिसंबाधनमतःदृणमात्राशरीरित्वेनान्यथासिद्धिरिति
चेत्।न।छांदसत्वेनोपपन्नेः।एतदस्वरसादेवाचार्यैस्त्विन्तुक्तमित्यन्ये।सवेति।एकसत्त्वेपिमिलितनिष
धसंतवान्नमुक्ताप्रमाणमितिभावः।ज्ञातज्ञाःप्रत्यकमुक्तिपरतयाप्युपपन्नेःसर्वमुक्तावुक्तानुमानमवज्ञार

वि॰ अ॰ म॰ णमित्याद्यत एवेति। अस्य श्रुतिपरामर्शात्मकमंनिवारयति। सर्वेति। दुःखत्वपदीकरणमित्यर्थः। लीलावती
३२३ कारमतं निरस्यति। यदिवेति। भट्टमतं निरस्यति नचेति। नित्यस्य सुखस्याभिव्यक्तिरित्यर्थः। सुखमात्रे चेति दृ
३२२ ष्टांतार्थं। तस्यैवासिद्धिमाशंक्याह अत एवेति। सुखमात्रस्य शरीरजन्यत्वादेवेत्यर्थः। एँवेति। उत्पन्नभावत्वा अस
देवेत्यर्थः। उपजनेति। इदानीमुत्पन्नं सुखमित्याद्यनुभवबलादिति भावः। अभिन्नत्वेनेति। अभेदे तथानु
पपत्तेरिति भावः। बाधस्य विशेषविषयत्वेन सामान्यतो योग्यतासंशयसत्त्वादन्वयः स्यादित्याह अथेति। सुख
वदिति। अन्यथास्मदादिसुखस्य दुःखसंभिन्नत्वनिश्चयाद्बाधापत्तेरिति भावः। उक्तरीत्या प्रथममपि नि
त्यसुखसिद्धिः संभवत्येवेति। अन्योन्याश्रय इत्यरुचेराह यद्वेति। तस्मादिति। अन्यथेति। यद्यपि छांदस ३२३

त्वेन लिंगव्यत्ययः संभवी तथाप्युक्तयुक्त्या तयोर्भेदतत्त्वपरतयैवेति भावः। एकदंडिमतं निरस्य
ति। एतेनेति। यद्यपि छांदसत्वेन मिथ्याज्ञाननिवृत्तिस्तत्त्वज्ञानव्यापारतया दुःखसाधनमेव तथापि
दुःखाभावस्य मोक्षत्वेनानभ्युपगमान्मुमुक्षूणां तदर्थितया प्रवृत्तिस्तन्मतेन स्यादित्याशयः। ननु ल
यः संयोगो विनाशो वा नित्यत्वविभुत्वाभ्यां न संभवतीति व्याचष्टे लयश्चेति। तथा च जीवात्मलय इत्यस्य
जीवात्मनि लिंगशरीरध्वंस इत्यर्थः। लिंगशरीरमेव किमित्यत आह लिंगेति। चक्षुरादीति। बुद्धींद्रियाणि
पंच। वाक्याणिपादपायूपस्थात्मककर्मेंद्रियाणीत्येकादशेंद्रियाणीत्येकादशेंद्रियाणि। सूक्ष्मेति। किं
चिन्मात्रया शरीरभावेनावस्थितानीत्यर्थः। उक्तव्याख्यायामानंदमयपरमात्मनो यल्लग्नकमेवेतिद

चि॰अ॰म॰
३२५
३२५

षस्त्येवाह॰ लिंगेति। दुःखसाधनेति। अहिकंटकादिध्वंसस्य यानागतदुःखप्रागभावप्रयोजकतया
प्रयोजनत्वं। न च दुःखप्रागभावो मुक्तस्येति तस्य प्रत्यंगत्वमिति भावः। मुक्तेरिति परममुक्तेरित्यर्थः। इ
ष्टापत्तिमाशंक्याह॰ विरक्तस्येति। स च दुःखप्रागभावमुद्दिश्यैव प्रवर्त्तते न सुखोद्देशेनेति तस्य सएव पुरु
षार्थ इति भावः। प्रसंगादाह मोक्षश्चेति। ननु ब्रह्मवादिगृहस्थस्य चवानप्रस्थाद्यतिस्तत्र पत्युपक्रम्य स ब्र
ह्मसंस्थोमृतत्वमेतीति श्रुत्या यतेरेवाधिकारबोधनमव्यवहितानंतर्येण तत्पदान्नस्यैव परामर्शादित्य
त आह आकांक्षायाइति। आनंतर्यस्येति॰ अव्यवहितानंतर्यस्येत्यर्थः। बाधकं विना संकोचानुपपत्तेरिति
भावः। कथमिति। तद्बलादेव कथमित्यत आह तत्त्वज्ञानेति। एवंस्थितमनंतं विदधतीत्यन्वयः। गृहस्था ३२५

दिरपीति शेषः। इति श्रुतेरिति। इत्यादिश्रुतेरित्यर्थः। शरीरादिभिन्न इत्युपलक्षणं। इष्टसाधनीभूतमन
नविषयं चेत्यपि द्रष्टव्यं। इतरभिन्नत्वानुमितौ प्रतियोगिज्ञानद्वारा शास्त्रोपयोगं दर्शयति शास्त्रेणेति
उपपत्तिबोधद्वारापि तदुपयोगमाह तथा चेति॥ एवं चेति। ज्ञानहेतुत्वाभ्युपगमे तथैव कर्मणां हेतुत्व
मिति तुल्यवदुभयप्राधान्यमित्यर्थः। केचित्तु एवं तत्त्वज्ञानमात्रं न प्रयोजकं किंतु प्राधान्येन कर्मणोपि त
थात्वमित्यत आह एवं चेति। तथा च सिद्धान्तग्रंथ एवायं। न तस्तटस्थः पूर्वपक्षत्वमन्नते ज्ञानमात्रतः
नुपरे वा परद्वारनिरस्ते सिद्धांतावतार इत्याहुः। सन्निपत्योपकारकं यदि तत्त्वज्ञानसहकारि स्याद्दान्मु
क्तिहेतुत्वं न दानां गांगिभावः किंतु समप्राधान्यमेव तच्च दूषितमेवाप्रधानीभूततत्त्वज्ञानद्वारारनि

वि॰अ॰प॰
३२५
325

ष्यादकत्वमेव तद्वाच्यं॰एवं सत्याहृ तत्वज्ञानेति। नापीति। असंकल्पितफलमभिलापविषयसंक
ल्प्यविषयफलकाम्यं। कामनापूर्वकृतं स्तुत्यादितत्समुच्चय इत्यर्थः। चवर्थेति। तच्च काम्यत्वमात्रस्यैव नि
षेधादितिभावः। द्वयोरेवेति। ज्ञाने कर्मणि च सतीत्यर्थः। प्रसिद्धिः प्रकृष्टासिद्धिर्मुक्तिरित्यर्थः। नवद्भ
वेति। न च फलान्तरार्थत्वेनांगत्वानुपपत्तिः। न ह्यतिरिक्तफलत्वेनैवांगत्वहतिः किंत्वप्रधानातिरिक्तोप्त
त्याद्दृष्टफलवत्वेनान्यथा विघ्नध्वंसफलकमंगलस्यापि ग्रंथांगत्वं न स्यादितिभावः। जातिस्मरत्वेनेतिभा
वः। तत्समर्थनं पूर्वकृतमेव कर्मस्मृत्वानानिष्ठितानीत्यर्थः। आचार्यमतमाह। अत्रेति। सन्निपत्येति
कर्मापूर्वद्वारा संनिधायोपकारकमित्यर्थः। ननु ऊनेनावमत इत्यादिना न तस्य तज्जात्वमित्यरु ३२५

चेराह तत्कर्मसाध्येति। अपूर्वद्वारेति। प्रायश्चित्तपापनाशफलश्रुतेस्तथात्वमिति भावः। समुच्चयवा
दी परमतं दूषयित्वा स्वमतमुपसंहरति तस्मादिति। अत्रेति। नैयायिक इति शेषः। मात्रपदव्यवच्छेद्यं
कर्ममात्रमित्याह तत्रेति। मिथ्याज्ञानोच्छेद इत्यर्थः। तस्य तत्त्वज्ञानस्य। कर्मणामिति। तं विद्याकर्मणी स
मन्वारभेते विद्याचेव तपश्चेवेत्यादिश्रुतिरित्यर्थः। यद्यपि तत्त्वज्ञानहेतुत्वमप्यदृष्टद्वारा तथाच
तद्वारा मुक्तिहेतुत्वमेवास्तु ज्ञानं प्रत्यपि हेतुत्वकल्पने गौरवात्तथापि तं ब्राह्मणा विविदिषन्ति यज्ञे
न ज्ञानेन तपसेति श्रुत्यैव दानं प्रत्यपि यज्ञादेर्हेतुत्वसिद्धेः प्रामाणिकं गौरवमिति भावः। विपरीतश्रु
तिरित्याह समाद्याचस्येति। दोषाभावेनेत्युपलक्षणं प्रागभावाभावेनेत्यपि द्रष्टव्यं। अन्यथा प्रतियोग्युत्पत्ते

वि·अ·न·
३२६
326

गावश्यकत्वात्। नन्विति। तथाच तृणारणिमणिन्यायेन मोक्षविशेषे ज्ञानकर्मणोर्हेतुत्वमिति भावः। ला
घवादिति। उभयहेतुत्वकल्पने गौरवादित्यर्थः। संप्रदायमतेन समाधत्ते ज्ञानकर्मणोरिति। ननु नै
रपेक्ष्यमपि न श्रूयत इत्यरुचेराह साहित्यबोधकमिति। द्वौमेवसानावित्यादौ च यत्कर्त्तव्यं तदनया
सहेत्यादि साहित्यबोधकमेवास्तीति न विकल्प इति भावः। ननु नान्यः पंथा विद्यतेऽयनायेति श्रुतिः सा
हित्यबाधिकेति न विकल्प इत्यरुचेराह वस्तुतस्त्विति। यद्यपि बाधकं विना सामान्यपरत्वमेव तथा
प्युक्तश्रुतेर्विशेषपरत्वेनाप्युपपन्ने निःसंदिग्धं श्रुत्यंतरमाह· तमेवेति। तं विदित्वैवेत्यर्थः। तदेवाह
नान्य इति। नान्यस्तत्त्वज्ञाननिरपेक्षः। अन्यथेति। तथा च यथा सुखत्वावच्छेदेन तद्धेतुत्वकल्पना। ३२६

सर्वत्र तत्त्वज्ञानकल्पनापातिभावः । नन्वेवं कर्मश्चनादिशात्रोः प्रत्यक्षयानुपपत्तौ न मोक्ष इत्या
शंक्य परमतं तावद्दूषयितुमुपन्यस्यति तत्त्वज्ञानादिति । दृष्टांतासिद्धिमाशंक्य निराकरोति नचे
ति । ननु निषिद्धकर्मणां नरकफलकत्वाभावात्तदुपपादकतया पापस्यैवाभावात्कुतः प्रायश्चित्त
स्य तन्नाशकत्वमतः पुनरपि दृष्टांतासिद्धिरित्यत आह अत एवेति । वक्ष्यमाणहेतोरित्यर्थः । प्रायश्चि
त्तेति । नन्वेतदेवकुतः इत्यत आह दुःखेति । प्राणांतिक इति । कर्मांतराभावेन तदधिकारार्थितयाः प्र
वृत्तेरित्यर्थः । ननु शाब्दबलादित्यसिद्धं तादृशशाब्दाभावादित्यत आह स्मर्यते हीति । हृदयग्रंथिः सि
ध्याज्ञानवासनाकर्मादृष्टं तन्निबंधनं दोषः कर्मण्यदृष्टानीत्यर्थः । शाब्देति । यदि वा भोगोपि शाब्दबो

धितः तदा तद्भिन्नत्वं विशेषणं बोध्यं। कीर्त्तनादिनापि तन्नाशाद् आह उत्सर्गत इति। प्रायश्चित्तेति॥
प्रायश्चित्तादिविधिनेत्यर्थः। तप इति। तथा च तत्त्वज्ञानवतः कायव्यूहो सिद्ध एव तस्य ज्ञानेनैव क
र्मक्षयादिति भावः। यौगपद्यं चेति। बलवद्वृत्तिनिरोधवत्कर्मणामेकदावृत्तिलाभसंभवादिति भा
वः। तप इति। पूर्वं कायव्यूहहेतुत्वमुक्तं इदानीं तद्यौगपद्यमित्यपौनरुक्त्यं। विमतिपदमिति। एत
च्च प्रायश्चित्तादिनाश्यकर्मत्वाद् भोगबाधासिद्धिवारणार्थं। ज्ञानस्येति। तथा च ज्ञाननाश्यत्वेपि भोगना
श्यत्वं तत्र मन्यथा कर्मत्वमात्रस्यैव तंत्रतया प्रायश्चित्तादिरपि तन्नाशको न स्यादिति भावः। ननु न
त प्रायश्चित्ते कथं व्यभिचारः तत्र भोगसंभवेन तन्नाशाद्यभ्रमेवत्याहुः। अधिकृते क्विकत्वसंभवादि ३२७

त्यत आह तस्येति। योग आदिर्यस्य तदपूर्वं तथा च प्रधानापूर्वनाशपत्वादित्यर्थः। तस्य यागशरी-
रनिष्पादकतया तन्नाश्यत्वमेवेत्याह। अधिकृतेति। अधिकृतस्याधिकारो यत्र तदधिकृताधिकारमंगं
तत्रेत्यर्थः। यागार्थितया। प्रधानार्थितयेत्यर्थः। स्तुतियोऽयन्ति। तावदेवेति। प्रधानार्थितयेति। प्रधा-
नापूर्वार्थितयेत्यर्थः। यद्यप्येवं तत्र प्रागुक्तो व्यभिचारोऽभावनमयुक्तं तथाप्यनुग्रायादेव नत्र व्यभि-
चारोऽभावनमिति ध्येयं। यद्वानन्तित्रप्रयोजनापेक्षासामग्री तदुत्पत्तिस्तत्र तत्संभवात्। एतदनुग्रा-
याद्देवाह तत्सत्त्वेपाति। क्रयश्चेति। क्रीयन्ते चास्य कर्माणीत्यत्रेत्यर्थः। कर्मणइति। तथा च नानुक्तमिति
श्रुतिरुत्सर्गतो योगेन क्रयमाह ज्ञानस्य कर्मनाशकत्वं योगद्वाराप्युपपद्यतइति तत्र तद्बाधइति। भा

वि॰ अ॰ म॰
३२९
328

वः। अत्र पूर्वोक्तदूषणमात्रं क्वनिराकरोति नवेति। अन्वयव्यतिरेकाभ्यां दुःखध्वंस इव तद्विशे
षेण दुःखत्वमिति भावः। वस्तुतोऽनियमः। यत्कर्मजदुःखप्रागभावोऽस्ति तस्य भोगेनैव नाशः। तत्प्रा
गभावस्यादृष्टसहकारेण प्रतियोगिजनकत्वनियमात्। अन्यथा तन्नाशकाभावेन तस्यानन्त
भावत्वापत्तेः। यत्कर्मजदुःखप्रागभावो नास्ति तस्यानन्यगत्याऽदत्तफलस्यैव तत्त्वज्ञानान्नाश
इति युक्तमुत्पश्यामः। अनुमाने विमतिपदमत्र उत्पन्नेति दूषणमात्रस्य विलम्बापदवाच्यत्वा
भावादिति भावः। तथा चोक्तश्रुतिरप्यनन्यथासिद्धा तत्र प्रमाणमेवेति तात्पर्यम्। अत एवापास्त
मपि तत्त्वज्ञानपूर्वकमुपपद्यते अन्यथा तदायिम दूषण एवमोद्रापत्तौ तदसंतवादिति॥ ३२९

॥रुचिदत्तापरनाम्ना भगवत्कृतिना विनायासं।प्रकटीकृतः प्रकाशो विशदश्चिंतामणेरुपरि।
श्रीः॥ ॥इति श्रीमहामहोपाध्यायरुचिदत्तविरचितोनुमानप्रकाशः समाप्तः॥छ॥ श्रीः॥

न्याय

[illegible]

[illegible]